1 ०ति न J, K. 2 पृजदा० PS. 3 अथैनान् PS. 4 सर्वास्थानिकं C; ०सारिकं J, ०स्वारं H. PS. 5 ०माणम् C; ०भापा॰ J; ०गानम् PS. 6 ति C. 7 ०तीति H. PS. 8 ०यो C. 9 वाशो J; वा H. PS. 10 त्वस्मा० C, J, K. 11 C, J, K, PS, H. PS. repeat it 12 In B only. 13 एका J, K. 14 छा० B. 15 नात्व० J. 16 नात्व० B, J. 17 ०वृत्ति C क. 18 ०तो वा C. J, K. 19 ना J; wanting in K. 20 अथात्र C, J, K. 21 ०ते सति । C, K. 22 ०त्पादात् B.

अथ योनौ यज्ञं[1] तन्वानस्य कथं[2] रेतं[3]स्यारथन्त[4]रवर्णे[5] स्यातामिति ।
उभे यथास्थान१ स्यातामिति ।
बहिष्पवमाने चोत्पन्ने भवतः ।
न चा[6]पि निवर्तयति ।
5 अथापि यथा गायत्रं यज्ञा[7]यज्ञीयधर्मान् प्रति[8]पद्यते एवमपि यज्ञायज्ञीयं गायत्रधर्मान् प्रतिपद्येत ।
ब[9]हिष्पवमान एष धर्मो भवतीत्यपरम् ।
नान्[10]यत्र गायत्राच्च चान्यत्र बहिष्पवमानादिति ॥ ७ ॥
अथ[11] गायत्रस्य काम्याः सामान्ताः ।
10 यावन्निगद१ स्युरित्येके ।
स्वर[12]स्यैते प्रत्याम्नाया भवन्ति ।
तत्र किमर्थोऽवयवं प्रतीयादिति ।
[अ[13]थाप्येवमव्याहृतं गायत्रं भवति ।
अथापि य[14]था काम्यस्याविप्रयोगस्तत्कुशलम् ।
15 अथाप्येष प्रयोगाणां धर्मो येन प्रक्र[15]मस्तेन समाप्तिरिति ।
बहिष्पवमान इत्यपरम् ।
एतद् गायत्रस्य विकारस्थानम् ।
अथाप्येतद् धुरां[16]१ सामा[17]न्ता नातियन्ति ।]
अथाप्येवमजामि भवति ।
20 अथाप्येवं यथाभूयिष्ठं भवतीति ।
प्रथमायामिति वा[18]र्षगण्यः ।
एतद्[19]बहिष्पवमानस्याशीः[20]स्थानम् ।
अत्र हि काम्याः प्रतिपदो भवन्तीति ।
रथन्तरवर्णायामित्यपरम् ।
25 एषा च विकृततमा ।
अपि च पथ्य[21]प्रक्रमं पथ्यावसानं भविष्यतीति ।
ब्र[22]ह्मण आज्य इत्यपरम् ।

1 तत्वानानस्य J, K. 2 कथन्त C, J. 3 रेवर्णे J. 4 ०य० C. 5 ०रधर्मे B. 6 चातिनि० B; चापि निवर्त० C, J, K. 7 यज्ञीयं J. 8 पद्यत G1, G2. G1, G2 resume from here. (see p. 30 note 9). 9 C, G1, G2, J add गायत्रस्य. 10 वान्य० C. 11 Wanting in C, G1, J. 12 ०स्येमे C, G1, G2, J, K. 13 B omits the portion within brackets. 14 याथा० C. 15 प्रक्रमेरन् J, K. 16 धरा० G1. 17 ०माना J, K. 18 यार्ष० G1. 19 एतत्पव० B. 20 ०शीर्द्धानम् C, G1, G2, J, K. 21 पद्य० G1. 22 ब्रा० K.

ब्रह्मसाम ह्याशी[1]:स्थान[2]मिति ।
उत्तरयोः पवमानयोरित्यपरम् ।
एतदेतेषा[3]ं सामान्ताना[4]ं स्थानम् ।
अथाप्येवं रोहो भवति
5 अपि चान्ताख्यानि कर्माणीति ।
यद्येतज्जामीत्यजामि वा कल्पयेत, अर्थो[5]ऽजामिकरण इति वापि तितिक्षेत ।
अनृ[6]च्येके गायत्रं गायन्ति ।
कस्य हेतोरिति[7] ।
स्वरायैतत् स्थानं कुर्वते ।
10 स न इत्थं केवलः स्वरो गीतो भविष्य[8]तीति ।
ते[9] व्याध्मत्यृचि प्रस्तुत्यानृचि गाय[10]न्ति ।
प्रतिहारस्य चानुत्सादमनुपाया[11]च्च निधनस्य चानिधनस्वरित[12]त्वान्निधन-मु[13]त्सीदेदित्याचार्याः ॥ ८ ॥
अथ बृहद्रथन्तरयोर्वदति ।
15 तयोः समा[14]नं निधनमासीत् ।
तस्मिन्नातिष्ठेतामिति ।
किन्नि[15]धनमिति ।
अ[16]हरिति कौत्सः ।
अकारमेवान्य[17]त् ।
20 सकारोपसृष्टं भेजे[18] ।
हकार[19]मन्यत् ।
सकारोपसृष्टं सकारमेव, अहमनयोः समानं निधनं मन्य इति धानञ्जय्यः ।
स हु[20]भयत्र दृश्यत इति ।
निधनब्राह्मणमेवाहमिदं मन्य इति वार्षगण्यः ।
25 द्वे खल्विमे पृष्ठे भवतः ।
एकं पृष्ठस्थानं तस्मिन्न स्पर्धे[21]तामहंपूर्व[22]तया इति ।

---

1 त्याशी० J. 2 ०शीर्द्धा० C, G1, G2, J, K. 3 ०देवेषा० K. 4 सामन्ता० G1, G2. 5 आमिकरण J; अर्थ्यो० K. 6 ०नृचोके J. 7 इति is wanting in B. 8 ०ष्यमीति G1, G2; ०ष्यसीति J, K. 9 व्या घ्व नृचि B; तथा प्रक्षविप्र० C; ते व्याचत्यृचं प्रस्तुत्यानृचि G1, G2; 10 गायन्तः C, G1, G2, J, K. 11 ०थाच्च K. 12 ०स्वरत्वान्नि० B; ०नं स्वरित्वानि० C; ०स्वरित्वान्नि० G1, G2; ०न ⋯ स्वान् J. 13 ०मुसीच्चदेदि० G1. 14 सामन् B. 15 ०धा० B. 16 ह० C ख, G1, G2, J; आहु० K. 17 ०न्ये C, G1, G2, J, K. 18 C, J omit भेजे ⋯ सकारोपसृष्टं. 19 ०मभ्यास० G1, G2. 20 फम० G1. 21 ०र्द्धेयथामहं० G1, K; ०र्द्धेथामहं० G2; ०र्द्धेयथमहं० J. 22 ०ताया G1, G2, J, K.

अथैतेषु पुरस्ताज्जपेषु वेति ।
एतदुदस्ये[1]दित्येक आहुः ।
एतानि मनसान्वीक्ष्योद्गायेदिति हि भवतीति ।
अन्यदिदं तेभ्यो भवतीति ।
5 यथाधीतमित्याचार्याः ।
न चोदासो विज्ञायते ।
अपि चार्थस्यादूषकम् ।
अथापि सꣳशयेऽलोपो लोपान्न्या[2]यतर इति ।
ते[3] कथं पवमानगतयोरिति ।
10 कर्तव्या इत्येके[4] ।
सामसंयुक्ता हि[5] भवन्ति[6] ।
अकर्तव्या इत्यपरम्[7] ।
स्थानसंयुक्ता हि भवन्ति ।
अथापि पवमानसामनी[8] अ[9]प्रधानभूते भवत इति ।
15 अथापि यद्युहैनान् पुरस्तात् स्तोत्रा[10]दकरिष्यद् व्यपेता[11] अन्यैः सामभि[12]रभविष्यन्, यद्धनन्तरान्[13] स्तोत्रव्यपायो[14]ऽभविष्यत्[15] ।
एतेन वामदेव्य[16]यज्ञायज्ञीये व्याख्याते ।
बृहतः स्तोत्रोत्तमायां ब्राह्मणोक्तानां रोहाणामुत्तमं न रुह्यात्[17] इत्याचार्याः ।
Ārṣ: K. V. 18. b; 19 a; 70 a.
20 अप्रथमा[18]यैवꣳ ह्याह—बृहतो रोहा वृणीमहा मादायिषु[19] वान्तौ पूर्वौ वृद्धौ[20] निधनोपाये च द्वितीयमक्षरं वर्धयेत् स तृतीयः ।
तदुपरिष्टात् स्तोत्रस्य प्रत्य[21]वरोहे देवं हि स ग्रुवानमृत्विज[22]मनूचानं प्रेतमाहुः—एनम[23]प्रत्य[24]वरूढं परावधीदिति ॥ ९ ॥
अथ यज्ञायज्ञीय[25]स्योत्तरयोर्द्व्यक्षरेण प्रस्तौति ।

---

1 ०स्मेदि G1, G2, J, K. 2 लोपान्याय० G1, G2; लोपान्याय्य० K. 3 Wanting in G1, G2, J, K. 4 ०त्ये G1, G2. 5 Wanting in J, K. 6 ०ति J. 7 म्. is wanting in J, K. 8 ०साम्नी B. 9 अ is wanting in C. 10 स्तोद्वयवत्रा० J, K. 11 व्यवेता G1, G2, J, K. 12 ०मे० J. 13 यद् द्वयन० C; यद्वयतंतरां G1, J यद्वयनंतरां G1, G2, J, K. 14 ०व्यवायो० C, G1, G2, J, K. 15 ०यो न भवि० G1, G2. 16 ०देव्या० G1; वामदेतेनवामदे J. 17 रोहेत् C, G1, G2, J, K. 18 अप्रमाधायै० B; अप्रमाथायै० G1, G2, J. 19 ०मादा इषु वन्तौ B; मदायिषु० C; मदयिषु J. 20 वृ is wanting in G1. 21 वात्येव० G1; वाव० G2; व्रावराहे J. 22 ०नमस्तृ B; 23 C, G1, G2, J add बृहद्. 24 त्य is wanting in J. 25 ०ज्ञीयोत्त० B; ०ज्ञीयोस्योत्त० G1, G2, J.

यथा बृहद्रथन्तरयोः ।
तदपि शश्वद्ब्राह्मणं भवति—
तानि ह वैतानि द्वादशाक्षर[1]प्रस्तावानि ककुबुत्तराणि सामानि बृहद्रथन्तरे यज्ञायज्ञीयश्चेति ।
5 अथ खल्वाह—"यदग्निष्टोमयाज्यनृतमाह, तदन्वस्य यज्ञः स्रवति, अक्षरेणान्ततः प्रतिष्ठाप्य[2]म्" इति । PB. 8. 6. 13.
किमनृतं किमक्षर[3]मिति ।
वेत्येतदक्षरम् ।
वकारादिराकारो गकारान्त इत्येक आहुः ।
10 तस्य गकारलोपं ब्राह्मणं क्षिपे[4]तीति तदर्पितमुपेयुः[5] ।
एवं कृत्स्नेन "अक्षरेण यज्ञस्य छिद्रमपि दधाति" इति । PB. 8. 6. 13.
आर्चिकमेवैतदक्षरमित्यपरम् ।
एतस्मिन् ह्यक्षरशब्दात् प्रतियन्ति ।
15 अष्टाक्षरे[6]ण प्रथमाया ऋचः प्रस्तौति ।
द्व्य[7]क्षरेणोत्तरयोश्चतुरक्षरेण बृहतः प्रतिहरतीति ।
न[8] स्तौभिकैः सहोपपद्यते ।
तस्माद्यदेवा[9]न्त्यमक्षरं तन्निधनमुपेयुः ।
यथाधीतमित्याचार्याः ।
20 स्वरतन्त्राण्यक्षराणि भवन्ति, स्वरान्ततामेवाक्षरस्यै[10]च्छद् ब्राह्मणमेवमवक्ष्य[11]दिति ।
अथापि बहुलैषा छान्द[12]सी वृत्तिः ।
[13]वाङ्निधनानीति चैतान्याचक्षते, वागुपा[14]यानीति च ।
यद्वेतदार्चिकमक्षरमिति, यथाधिकारमेतद् भवति, स्तौभिकस्ये[15]हाधिकारो
25 विज्ञायते ।
[16]अथापि संशये प्रकृतिसविधमेव प्रत्येतव्यमिति प्रत्येतव्यमिति ॥ १० ॥

षष्ठः[17] पटलः

1 ०रा प्र० G1. 2 प्य is wanting in J, K. 3 ०रा० G1, G2. 4 श्रीयतीति B. 5 ०मुपपे० B. 6 G1 repeats here यज्ञस्य ... ०तस्मि (lines 11-13) within brackets. 7 तृ J. 8 प्रद्व्य० J 9 ०देदान्त्य० J. 10 ०स्ये० K. 11 ०क्ष० G1, G2. 12 ०सि B; छ० J. 13 J adds त्रि. 14 ०णा० G1, K. 15 ०स्येह्यधि० G1, G2, J, K. 16 तथा० B. 17 In B only.

अथ द्रव्यसमुद्देशः ।

राथन्तराणि रथन्तरपृष्ठेऽभिरूपाणि, बार्हतानि[1] बृहत्पृष्ठे[2], उभयविधान्यु[3]-भयसाम्नि । cp. PB. 8. 3. 7; Caland ibid.

द्रवद्[4]िडानि रथन्तरपृष्ठे, ऊर्ध्वे[5]डानि बृहत्पृष्ठे । cp. PB. 10. 12. 4.

5 अथ यत्र रथन्तरपृष्ठे बार्हतानि क्रियेरन् बृहदीप्सया तानि[6] विद्यात् । cp. PB. 8. 3. 7; Say. ibid.

एवमेव बृहत्पृष्ठे[7] राथन्तराणि स्वयोनीनि[8] सर्वत्राभिरूपतराणि ।

अस्वयोनिभ्यः सामान्या[9] ऋचाम्[10], असामान्याभ्यश्छन्दसि[11] प्रथमाः सामान्या[12] इत्याचक्षते ।

10 अथ या[13] यज्ञप्रवादाः[14] [सत्रप्रवादाः][15] क्रतुप्रवादाः स्तोमप्रवादाः सर्वत्र[16] ता अभिरूपाः ।

शुक्रवत्यो[17]ऽप्रवादाः पूर्वयोः[18] पवमानयोः ।

होतृप्रवाद[19] हविष्प्रवाद[19] समिद्धवद्धोतुराज्यम् ।

हुतवन्ति पीतवन्ति तृप्तवन्त्युत्तराणि ।

15 मरुत्व[20]त्यो[21]ऽन्नप्रवादाः क्रतवत्यो[22] माध्यन्दिनीयाः ।

परिवत्यः कोश[23]वत्यो निषण्णवत्यो माध्यन्दिनीयाः[24] ।

गाय[25]त्र्यां वा त[26]त् त्रिष्टुभि वा मरुत्व[27]च्चिकीर्षितं भवति ।

अथ खल्वाह—"त्रीणि सवनानां छिद्राणि, तानि तेनापिधीयन्ते" इति । PB. 7. 3. 19.

20 "कतमानि छिद्राणीति ।

प[28]वमाना अदेवतास्तुतयः[29], तानि छिद्राणीति ।

अथाप्यन्तरेण पवमाना[30]वर्त्तीनि च हविर्भिः प्रचरन्ति, तानि छिद्राणीति ।" cp. Say. PB. 7. 3. 19; Caland ibid.

1 बार्हत्पृ० G1. 2 ०ष्ठेषु C. 3 ०धाबु० C. 4 द्रवद्दानि B; प्रवदितानि C; द्रव्यदिडानि J, K. 5 ह is wanting in B. 6 तामि G1, G2, J. 7 ०ष्ठेन C. 8 नीति G1, G2, J, K. 9 सामन्याक्रँ C, सामन्या J, K. 10 ऋचासोमेमन्या० G1; ऋचामसामन्या० G2; ऋचसामान्या० J; ऋचमसामन्या० K. 11 ०श्छान्दसी C, G2, J, K; ०श्छन्दसी G1. 12 सामन्या C; समन्या J, K. 13 वा B. 14 दात् B. 15 Wanting in B, K. 16 सर्वत्राभि० B. 17 ०त्योजः प्र० B. 18 B adds श्रुतवत्यो. 19 Wanting in J. 20 त्व is wanting in G1, G2, K; ०मरुयोत्यो० J. 21 ०त्यो ह्यप्र० C, G1, G2, J. 22 ऋत० C, G1, G2. 23 कौश० G1, G2, K; कैश० J. 24 मध्यन्दिनान्तयाः B; माध्यदिनांतीया G1, G2; मार्ध्यदिनांनीयान्व J, K. 25 य is wanting in G1, G2, J. 26 तस्मि० C. 27 त्व is wanting in G1. 28 पवमाना···प्रचरन्ति wanting in J. 29 ०याः C, G1, G2, J, K. 30 S has ०नमावृत्तीनि.

वामदेव्यं[1] मैत्रावरुणसाम सर्वत्राभिरूपम्, तदपचारे तल्लिङ्गीयां[2]श्चिकीर्षेत् ।
अथैतानि तार्तीयसवनिकानि[3] रूपाणि ।
स्वादुमत्यो मधुमत्यो मद्वत्य[4] ओजस्वत्यो विश्ववत्यश्चित्रवत्यः सूर्यवत्यो[5] दक्षिणवत्यो[6] निह्नुतवच्च वृद्धवच्चोक्थेषु[7] ।

5 अथ नार्मेधस्तोत्रीये वदति—
"ककुप् प्रथमाथोष्णिगथ[8] पुरउष्णिगनुष्टुप्" इति । PB. 8. 8. 26.
ककुबेव[9] प्रथमा, उष्णिग् द्वितीया, "पुरउष्णिक् तृतीया, दाशतयेनाध्यायेन[10] तां बह्वृचा अधीयते—Sāy. ibid.
'युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे ।

10 इन्द्रवाहा वचोयुजा[11] ॥' इति । RV. 8. 98. 9; SV. 2. 62.
तत्र वयं चत्वार्यक्षराण्युपाहरामः 'स्वर्विदा'[12] इति ।
सानुष्टुब् भवति[13] उपरिष्टाज्ज्योतिः" ॥ ११ ॥ Caland quotes 1.5-13 on PB. 8. 8. 26.
कथमु षोडशी ज्योतिष्टोम इति ।

15 अकर्तव्य इति शौचिवृक्षिः ।
अन्तरितो[14] ब्राह्मणसमाम्नायेन[15], तथा ऋक्समाम्नायेनेति[16] ।
कर्तव्य इति गौतमः ।
षोडशिनः स्तोत्रे[17] "देयेति[18] भवतीति ।
अथापि न आर्षेयकल्पो दर्शयति[19]—

20 "द्वादशाहस्य[20] षोडशिमन्तावतिरात्रौ[21]" इति । Ārṣ. IX. 1. a.
अथापि मन्त्रवर्णो[22] भवति—
"त्रीणि ज्योतींषि सचते स षोडशी" इति । PB. 12. 13. 32.
त्रिरुपेतो[23] द्वादशाहो[24] भवतीति वैतद् भवति ।

---

1 ०व्यमै० B, J. 2 ०या० C, G1, G2, J, K. 3 तात्रीयवसवनिका G1; तार्त्रीयवसवनिका G2; तार्तीयवसवनिका J; नि is wanting in K. 4 मध्वस्वत्यो वि० C, मधत्योधस्वत्येत्यो वि० G1, G2; मध्वत्यो वि० J, K. 5 ०त्या J. 6 दक्षिणतात्यो निह्नूत० B; दक्षिणवद् योनिदूत० C. 7 क्थे wanting in J. 8 ०मा यो० C, G1, G2, J. 9 क वे B. 10 दाशतय्यान्तां S. 11 ववायु० J. 12 सुवर्षिदां B; सुवञ्चिदा S. 13 बृहता S. 14 ०रिते C, G1, G2, J, K. 15 ०येनेति C. 16 तथा ऋक्समाम्नायेनेति wanting in C; त समा० G1, G2; तत्समा० J, K. 17 हे० G1, G2. 18 C, G1, G2, J, K add हि. 19 ०यतीति B. 20 ०शान्तस्य B; ०शाहात्य G1, G2; ०शाह्त J. K. 21 ०न्तवेतिरात्रौविति G1, G2, J. 22 G1 adds व. 23 ०पेते B. 24 ०हे B, G1, G2, J, K.

सर्ंस्थाम[1]प्यस्यैतां विद्यमानो[2]ममन्यत इति गौतमः ।
एवं च रहस्यब्राह्मणे दर्शयति—अप्य[3]नेन षोडशिसर्ंस्थेन यजेतेति ।
नोहा[4]स्यैषा सर्ंस्था विद्यत इति शाण्डिल्यः ।
अतिरात्रे तु कृ[5]ताकृतो भवति ।
5 एवमिवाध्वर्युब्राह्मणं भवति—नोथ्[6]ये ग्राह्यो नाँ[7]तिरात्रे[8] ग्राह्य इति ।
सन्[9]धी इमौ भवत इति धानञ्जय्यः ।
उदयसन्धिरसाव[10]स्तमयसन्धिरय[11]म् । Ars. K. V. 22 b.
त[12]स्माद्यः कश्चातिरात्रः षोडशि[13]मा[14]नेवै स कु[15]शलेनेति ।
"तस्यैता ऋचः पञ्चविर्ंशत्यक्षराः पञ्चपदाः पञ्चाक्षरपादाः ।
10 नवोपसर्गाक्षराणि[16], आदितस्त्रयाणां पादानां त्रीणि त्रीण्युपसर्गाक्षराणि पादा[17]न्तेषु भवन्ति ।

तेऽष्टाक्षराः सम्पद्यन्ते ।
पञ्चाक्षरावुत्तरौ, द[18]शाक्षरोपयुक्ताश्चतुस्त्रिर्ंशदक्षराः सम्पद्यन्ते ।" Say. PB. 12. 13. 22.

15 अन्त[19]स्थास्तदुपसृष्टाः ।
केनो वि[20]द्यामेति ।
इत्थर्ं ह्येव[21] वयमधीमहे ।
तथा बह्वृचा इति ब्राह्मणेनेत्याहुः—"चतुस्त्रिर्ंशदक्षराः सर्ंस्तु[22]तो भवति" इति । PB. 12. 13. 24.

20 अनु[23]पसृष्टः कनीयानिति वैतद् भवति ।
अथाप्यु[24]द्ध्रिय[25]माणेषूपसर्गाक्षरेषु नैवार्थो हीयते, न वृ[26]त्तिर्दुष्यति ।
अथापि शश्वदेना अनुपसृष्टा आथर्वणिका अधीयते[27] ।
अथापि निर्धारितानामुपसर्गाक्षराणां वदति ।

---

1 म is wanting in G1, G2, J. 2 ॰नां मन्य C, G1, G2, J, K. 3 अथ तेन C. 4 ना॰ C, G1, G2, J, K. 5 कृता॰ G1, G2, J but G2 strikes off कृ and writes कृ above it. 6 ॰क्थ्यो C ख, G2, J; नोप॰ C क; ॰क्थ्योथ G1; G1 adds (नाहास्यैषा सर्ंस्था विद्यत इति शाण्डिल्योऽतिरात्रे तु). 7 ऽति॰ C, G1, G2, J, K. 8 J repeats ग्राह्यो ऽतिरात्रे. 9 सन्धि B. 10 ॰म॰ B. 11 ॰रपि C; ॰रये J. 12 एत॰ C. 13 ॰शिनमा॰ G1, G2, K. 14 ॰ने J, K. 15 ॰न्येति॰ B. 16 ॰राश्च C; 17 पदा॰ B. 18 दशाक्षरावेकस्ताश्च॰ C; दशाक्षरोवैकस्ताश्च॰ G1, G2, J, K, S. 19 न स्था उप॰ C; अतस्था उप॰ G1, J. 20 विद्या मे तीर्थ॰ C, G1, G2, J. 21 ह्येतमधीमहे । J; ॰ह्येतवमहीमहे । K. 22 ॰स्कृतो B; ॰स्तुतो G1, G2, J. 23 ॰क॰ G1, J. 24 ॰प्युध्री॰ C. 25 य is wanting in J, K. 26 व्यतिदु॰ G1, G2, J. 27 ॰न्ते G2.

"अथर्वा एता एकपदास्त्र्यक्षरा विष्णोश्छन्दो भुरिजः शक्वर्यः" इति ।
PB. 12. 13. 22.

त्र्यक्षराण्यपि भुरिजो भवन्तीति ।[6]

तत्रैतद् गौरीवितं गायत्रीसामँ, आनुष्टुभम्, रात्र्या समानभागः समानभक्षो
5 भवतीति ।

स यद् गौरीवितं गौरीवित्य ईमा ऋचः स्वयोनिं[11] कुर्वते ।

ऋषिः स्वयोनिर्भविष्यतीति[12] ।

एतेन सौभरनार्मेधे व्याख्याते, रेवती च वारवन्तीयम् ॥ १२ ॥

ज्योतिष्टोमात्पादमेके षोडशिनं ब्रुवते ।

10 तत्र चास्य ब्राह्मणमधीयते ।

अथापि कथमेवं कृत्स्नं कर्माकृतमन्तरयिष्यदिति ।

"चतुर्थोत्पादं वयं तत्र चास्य ब्राह्मणमधीमहे ।" Ārs. K. V. 20 b.

अथाप्याह—एकविंशायतनो वा एव यत् षोडशीति ।

तदेकविंशमहर्भवति ।

15 अथाप्याह—दाशतय्य ऋचश्चतुरुत्तरंच्छन्दः, क्रमे वा एवंविधमुत्पद्यते न
प्रथमकृताविति ।

अह्नो भवती३ रात्रेरिति ।

अह्नो भवतीत्याहुः ।

अभुंज्यं चास्य हविर्भवति ।

20 अथापि नियुक्तधर्मा भवति[21] ।

विद्वांश्छिल्पवान् ग्रहवान् ।

यथाहरेवं रात्रेरित्यपरम् ।

रात्र्या समानभागः समानभक्षो भवतीति ।

---

1 उप वा K. 2 ०पा० B. 3 ०दा अक्ष० G1, G2. 4 भूरितः G1; भू० G2, J. 5 ०रा ह्यपि C, G1, G2, J, K. 6 B here reads एतेन सौभरना… 7 ०सामान्या B; सामाभ्यासानु० C, G1, G2, J. 8 Wanting in C; गौरु० B; ०वतं G1. 9 मा G1, G2, J. 10 ०चोऽस्व० C, G1, G2, J, K. 11 ०योन्युरुत B. योनि कु० G1, G2, J, K. 12 ०न्ती० C. 13 ०मेव C, J; ०मैक G1. 14 ०तमितिरै-ष्यिदिति B. 15 अथाप्या G1, G2, J, K. 16 ऋचो चा० C, G1, G2, J, K. 17 ०रं C, G1, G2, J, K. 18 ०त्पा B. 19 ०वति B. 20 अह्वर्जे C, G2, J; अह्र्ज्जे G1. A second hand in G2 strikes off व; अहर्वर्जे K. 21 ०वती G1, G2 but the latter corrects it; ०वतीति J, K. 22 निवद्धाञ्छि० C; निविद्धाञ्छि० G1, G2. 23 गृह० B. 24 ०पराम् G1, G2, J, K. 25 B repeats it.

तौ खल्विमौ द्वौ सन्धी भवतः।
तयोरसौ नित्यः कृताकृतो[1]ऽयम्।
कस्य[2] हेतोरिति।
सार्द्धं[3] तेन रात्रिः[4] पञ्चदशविधतां लभते।
5 कृतं पञ्चदशविधमहरिति।
अथापि न तमुद्धृत्य पराक् स्तोत्रं रात्र्या[5]वलप्स्यत।
कृतान्यत्रा[6]वर्तीनि।[7]
अथापि न तमुद्धृत्य तद्देवत्यं स्तोत्रं रात्र्या[8]वलप्स्यत।
कृतान्यत्रै[10]न्द्राणि।
10 अथापि विद्यते तस्य कालस्य स्तुतिर्नास्य विद्यते।
[कस्मात्[11] तस्य न विद्यते।][12]
पराङे[13]तस्यां वेलायामादित्यो भवति, नो परा[14] च स्तुतिर्विद्यते।
उदाहरन्ति द्वे[15] च परां[16] च स्तुतिम्।
हिरण्यस्तू[17]पे भवति—
15 'अस्था[18]द्देवः प्रतिदोषं गृणानः' इति। RV. 1. 35. 10.
"अथ खल्वा[19]ह—'शाक्करीषु षोडशिना स्तुवीत' इति। PB. 12. 13. 13; LŚ. 10. 2. 1.
तत्रैके महाना[20]म्नीः प्रति[21]यन्ति।
एताः शक्कर्यो भवन्तीति।
20 एतास्वेव शक्करीप्रवादो भवतीत्यपरम्।
एताश्चाधिकृता भवन्तीति।" cp. Caland PB. 12. 13. 13.
ओङ्कारो विशेष[22]श्रुतेः सर्वसा[23]मसु स्यादित्येके।
स वाचा रथन्तरे[24] निवर्तेत।
यथा त्र[25]यस्त्रिंशं[26] तृ[27]तीयसवनमिति।

1 कृतोकृतः J. 2 करस्य J. 3 साध्यं B; राद्धं J. 4 रात्रि J. 5 ०र्त्र्या० G1, G2, J. 6 ०त्रावर्तिनि B; ०त्रावर्त्तीनि G1; ०शवर्त्तीनि G2, J. 7 Wanting in C along with the next line. 8 ०वत्यासु G1, G2, J, K. 9 ०र्त्र्या० G1, J. 10 ०न्या० J. 11 ०त्तु C. 12 Wanting in B. 13 परोडे० G1; परांद्दे० J, K; परोद्दे० G2. 14 पचरा B; G1, G2, J read पशव for परा च. 15 C, G1, G2, K read त्वेव for द्वे च; त्ये J. 16 ०रा च स्तुति B; पशवस्तु० G1, G2; वशवस्तु० J; पशवः स्तु० K. 17 ०स्तवे B. 18 ०देवः C. 19 ०ल्वाद G1, G2, J but a second hand in G2 has changed द into ह. 20 ०नाम्निः B; ०नाम्नी G1, J, K. 21 प्रवि० G1, G2, J. 22 ०षः श्रुतः C; ०षश्रुतः J. 23 ०सामं सं B. 24 ०रेण C; ०रा G2; ०रो J. 25 त्रय-स्त्रिंशत्० G1, G2, J; त्र त्रय० K. 26 ०शे G2, J, K. 27 त्रयस्त्रिंशस०B, G1.

अभिपरीत्य[1] प्रत्यपकर्ष[2]स्ताद्दशमेतद्[3] भवतीति[4] ।
समुच्चयो वाऽनन्यार्थत्वात्[5] ।
प्रस्तावशान्त्यर्था[6] हि वाक् ।
उद्गीथादिशान्त्यर्थ[7] ओङ्कारः ।
5 वाक्पूर्वा[8] सामान्यात्[9] ।
एवं यथान्तरप्रत्यासत्तिः ।
उत्तरां[10] वाक्[11] सामान्य[12]विधेराचाराच्च ॥ १३ ॥

---

1 अहरत्यस्तोमस्यन्त्याभिपरित्य B. 2 प is wanting in B. 3 ०र्षस्ता० C. 4 ०वति C, G1, G2, J, K. 5 वा नानार्थ० G1, G2, J, K. 6 ०शान्तर्था G1, G2; ०शान्ततर्था J. 7 ०थादे० G1, G2. 8 वाक्तु पू० C; वाक्तुपूर्वं G1, G2, K; क्तुपूर्वं J. 9 सात् C, G1, G2, J, K. 10 उत्तरी G1, G2, J. 11 वा C, G1, G2, J, K. 12 जघन्य० C, G1, G2, J, K.

अथ तृतीयः प्रपाठकः

अथ का प्रथमा सꣳस्थेति ।
आग्निष्टोमीं[1] प्रथमां मन्य इति शाण्डिल्यः ।
प्रथमं[2] ह्येव स्थानं भवति ।
अथापि प्रथममधीमहे[3] ।
5 अथाप्यर्णु[4]प्रमुखानि भूतानि भवन्त्य[5]परोवरीयां[6]ꣳसि ।
अथाप्याह—"यज्ञमुखं[7] वा अग्निष्टोमः" इति ।
अथाप्येतया सꣳस्थया चरति ।
अथाप्येषा समा[8]रब्धतमां[9] ह[10] भवती[11]ति ।
अथापि नाग्निष्टोममकृत्वा[12]परे सꣳस्थे[13] करोति ।
10 नह्यनुपादाय प्रथमामुत्तरयोः सिद्धिरस्ति ।
अनुपादायोत्तरे प्रथमा सिध्यतीति ।
अथाप्या[14]ह—प्रजापतिर्वा एषा सꣳस्थानां यद[15]ग्निष्टोमः ।
तां यदकृत्वाथान्यां कुर्यात्, प्रजापतिरस्य हिꣳसि[16]तः स्यादिति ।
यावदादेशमुत्तरे सर्वत्र ।
15 अथाप्यूर्ध्वानामेव सꣳस्थानां कृतानां वदं[17]ति—
"देवा वा[18] अग्निष्टोमम[19]भिजित्योक्थानि नाशक्नुवन्नभिजेतुम्"[20] इति ।
PB. 8. 8. 1.

---

1 अग्निष्टोमं B. 2 ०मां C, G1, G2, J. 3 B adds इति. 4 ०प्युणु० G1, J. 5 ०न्ति परो० C, G1, G2. 6 ०य० G1, G2. 7 ०खमग्नि० C, J; ०खन्वाग्नि० G1. 8 ससा० J. 9 ०मां G1, G2, J, K. 10 Wanting in C, G1, G2, J, K. 11 ०वति G1, G2, J, K. 12 ०पार G1, G2, J. 13 स्थे ... सꣳस्थानां (line 12) wanting in J. 14 अथा प्राह G1. 15 यदग्नि० J. 16 ०ꣳस्यसित G1. 17 ०दे० G1. 18. Wanting in G1, G2. 19 ०ष्टोमंभिजित्योस्थानि G1; ०जित्यो-स्थानि G2; ०ष्टोमभेजित्या स्थानिस्थानि J. 20 C, J add देवा वा उक्थान्यभिजित्य रात्रिं नाशक्नुवन्नभिजेतुम्; G1, G2 add देवा वा उक्थान्यभिजित्य रात्रिं नाशक्नुवन्नभिजेतुं देवा वा उक्थान्यभिजित्य (०जि G1) म्.

अथापि नैत[1]द्देवताः प्राहू राका सिनीवाली सरस्वती विष्णुरिति ।
सौ[2]विष्टकृतं खल्वेतत् सोमस्य स्थानं यदाग्निमारुत[3]म् ।
[4]योऽयं देवताः शꣳसन्[5] सोऽप्यतिरात्रे स[6]तीहैव प्र[7]त्याहृत्य शꣳसती-
त्यु[8]क्थ्या ।
5 तां प्रथमां मन्य इति गौतमः ।
एवमा[9]ताहर्मात्रासमानि सवनानि अभ्यु[10]द्ध्रियन्ते ।
आभवच्छन्दाꣳसि अनु[11]विधीयन्ते ।
प्रस्थितया[12]ज्या ग्रहैश्च शस्त्रैश्च ।
अप्यहमेनं[13]मागूर्त्तिनमिव मन्ये योऽग्निष्टोमयाजीति ।
10 ध्रुवमनु द्वादशस्तोत्रात्पूर्वं तत्प्रस्थितयाज्याभिर्वि[14]जानीम इति ॥ १ ॥
अतिरा[15]त्रीं प्रथमां मन्य इति धानञ्जय्यः ।
कृत्स्नं पूर्वं कर्म[16] परिपा[17]दया इति ।
अथापि सं[18] मिमीते ।
"एषा वाग्निष्टोमस्य सम्मा[19] यद्रात्रिः ।" PB. 9. 1. 23.
15 "एषा वा उक्थस्य सम्मा यद्रात्रिः ।" इति । PB. 9. 1. 25.
कु[20]तो दृष्टेन प्र[21]मा स्या[22]दिति ।
अथापि नः स्तोम[23]समाम्नायः[24] ।
प्राह—अतिरात्रस्यैव स्तोम[25]समाम्ना[26]यो भवति[27] ।
अथापि न उक्थ[28]समाम्नायः ।
20 प्राह—अतिरात्रस्यैव प्रथममुक्थानि[29] समाम[30]मनामः ।
अथापि नः कर्मणो यजूꣳ[31]षि प्राहुः—
उपरि सन्धिभक्षात्[32] स्तोमविमोचनम[33]धीमहे ।

---

1 नोन्तदेवताः B; नोतद्देवताः G1, G2, J. 2 ०विकृष्ट० K. 3 ०तस्य B. 4 C, G1, G2, J add स; सा यायं K. 5 शꣳशिशस्ता अप्य० C; शꣳसिशस्ता अप्य० G1, G2, J, K. 6 स is wanting in B. 7 प्रन्या० C, G1, G2, J. 8 ०क्थं C; ०क्थ G1, G2, J; ०क्थ्य K. 9 एवं प्राप्ता० C. 10 अप्यु० C, G1, G2, J, K. 11 अनुधी० B. 12 ०तय्राह्या C; ०तयाह्या G1, G2, J. 13 ०मेतमेवमा० C. 14 ०भिहर्वि० B. 15 ०रात्रं C. 16 ०र्मा B. 17 परिपादधा B; ०परीपादाया C. 18 सम्मिते B. 19 सेंमा इंद्रात्रिः G1, G2, J. 20 कु is wanting in G1, G2, J, K. 21 प्रामा G1, G2, J, K. 22 स्य० B, G1, G2, J, K. 23 ०मः स० G1, G2, J, K. 24 ०यय: G1, G2 J. 25 ०मः स० B. 26 ०भक्ष्यतो B. 27 ०न्ति G1, G2, J, K. 28 ०क्थ्य० C, G1, G2, J, K. 29 ०क्थ्यानि C. 30 समाम is wanting in G1, G2. 31 यज्ञꣳसन्धिं प्रा० C क. 32 ०भक्ष्य G1; ०भक्ष्यत् G2, J. 33 ०ना० G1, G2, J.

यन्नूनमन्या प्रथमा[1] संस्थाऽभविष्यत् प्राक्तनं[2] स्तोमविमोचनं समाम्नास्यदिति ।

अथापि शश्वद्बह्वृचा अतिरात्रीमेव[3] प्रथमामधीयते[4] ।
तासां का[5] काम्या का सर्वाभिप्रायेति[6] ।
5 अग्निष्टोमीं[7] चातिरात्रीं च ब्रुवते शौचिवृक्षाः ।
सर्वाभिप्रायेऽनवधारितकामे भवत[8] इति ।
"एकस्मा अन्यो यज्ञः कामायाह्रियते सर्वेभ्योऽग्निष्टोम" इति न काममवधारयति । PB. 6. 3. 2.

ज्योतिष्टोमेनातिरात्रेणर्द्धिकामो[9] यजेतेति नैव काममवधारयति ।
10 "पशुकाम उक्थेन स्तुवीत" इति काममवधारयतीति । PB. 8. 8. 8.
सोऽशिथिला परिसंस्थिता भवतीति ।
सर्वाः सर्वाभिप्रायाः ।
सर्वासु काम्यानि विद्यन्त इति शाण्डिल्यः[10] ।
तथा गौतमधानञ्जय्यौ ।
15 सर्वाभिप्रायः[11] खल्वयं ज्योतिष्टोमः ।
[12]सर्वाभिरेव संस्थाभिः सर्वाभिप्रायो भवतीति[13]
यद्वेतदवधारितकामेति, पश्यामो वै वयं सर्वाभिप्रायेषु काममवधार्यमाणम् ।

यथोपर्वती[14] ग्रामकामस्य, प्रतिष्ठाकामस्य रथन्तरं सन्धिषामेति रथन्तरं सन्धिषामेति[15] ॥ २ ॥
20

सप्तमः[16] पटलः

तस्य खल्वस्य ज्योतिष्टोमस्य षड् व्यञ्जनस्थानानि भवन्ति—
प्रतिपद् गायत्रंणिधनं[17] त्रिष्टुतिर्ब्रह्मसामोक्थप्रणयः सन्धिषामेति[18] ।
तेषां किं[19] काम्यं किं सर्वाभिप्रायमिति ।
25 यद्यत्[20] खल्वस्य ज्योतिष्टोमस्य[21] चरति[22] तत्तत्सर्वाभिप्रायम् ।
अथ यत्कामं[23] निवर्तते तत्काम्यम्[24] ।

1 प्र० is wanting in G1, G2, J, K. 2 ०क्तरं C, G1, G2, J, K. 3 ०त्रमेव B; ०त्री G1, G2, J. 4 ०मम० B. 5 Wanting in C. 6 सर्वाप्रयेति B. 7 अग्नि० B. 8 Wanting in K. 9 ०मे B. 10 ल्य is wanting in G1, G2, J. 11 ०प्रायसं ख० G1, G2; ०प्रायः सं ख० J; ०प्रायस ख० K. 12 C, G1, G2, J, K add 13 ०वती G1, G2, J, K. 14 ०वीती G1, G2, J, K. 15 C does not repeat it. 16 In B only. 17 ०त्रं त्रिणि० C. 18 ०न्धिसा० C, K. 19 Wanting in J. 20 प्रतिपद्यत् C, G1, G2, J, K. 21 ०म G1, G2, J. 22 चरिते B. 23 ०काम्यं C, G1, G2, J, K. 24 ०कामप्र० B. C, G1, G2, J, K.

प्रतिपत् सर्वाभिप्राया।
सर्वा ह्यवधारितकामा भवन्तीति।
उपवतीत्याहुः[1]।
प्रथमामन्वेनामधीमहे[2]।
5 अपि चैनां[3] ग्रामकामस्योह[4]—ग्रामैः[5] सर्वाभिप्रायो भवतीति।
अथाप्यस्याचारं[6] दर्शयति—
ततश्चतुर्षु मासेषु शुनासीर्यस्य[7] लोके[8] ज्योतिष्टोमोऽग्निष्टोम[9] उपवती[10] प्रतिपदिति।
"एषां[11] रथन्तरपृष्ठेऽग्नियवती बृहत्पृष्ठेऽग्नियवद् बार्हतं रूपमुपवद्राथन्तर-[12]
10 मुपवती रथन्तरेऽग्नियवती बृहतीति च भाल्लविनाम्।" Ārṣ. K. V. 18 a.
अथाप्येनां साहस्रोत्तमे[13] स्तोत्रीयस्योत्तमां[14] दर्शयति—
औभयसाम्यात्[15] तां न प्रथमाम्।
ब्राह्मणेनैव[16] तद् व्याख्यातम्।
15 अथाप्याहाभिषेचनीये—
'यत्[17] 'पवस्व वाचो अग्रियः' इति, SV. 2. 125; RV. 9. 62. 25; PB. 4. 2. 17; Ārṣ K. I. 1 b.
तेन यज्ञमुखान्न यन्ति।" इति। PB. 18. 8. 10.
प्रकृत्यापश्रयं[18] दर्शयति।
20 तदपि[19] शश्वद् ब्राह्मणं भवति—
एते वांव[20] प्रतिपदौ[21] सर्वाभिप्राये यदुपवती चाग्रियवती च।
[कामाय वा इतरा आह्रियन्त इति।][22]
स्वरो गायत्रणिधनानां प्रथमा[23] विष्टुतीनां[24] श्यैतनौधसे[25] ब्रह्मसाम्नाम्।
षडुक्थानि सर्वाभिप्रायाणि भवन्ति।
25 साकमश्वं सौभरनामैधे हारिवर्णोद्वंशीये[26] आष्टादंष्ट्रमिति[27]।

---

1 अपव० J. 2 ०मां चैनाम० C; ०मां चैनामधीनामधीमहे G2. 3 तां C; चैतां G1, G2, J; च तां K. 4 ०स्य इ० C. 5 ग्राहः B. 6 ०स्याश्चिरं C; ०स्याश्चरिं G1, G2, J, K. 7 ०नाशी० C; ०नाप्सीर्य J. 8 ०क J. 9 ज्योति ज्योतिष्टोम G1, G2; ज्योतिष्टोम उप० J; 10 उपपदी B. 11 एषां B. 12 C, G1, G2, J, K omit द्राथन्तरमुपव. 13 सासह० G1, G2, J. 14 ०त्र० G1, G2, J. 15 औभय व्यौभय० G1, G2; औभयत्यौभय० J. 16 ब्र० G1, G2, J, K. 17 G1, G2, J omit य. 18 ०त्यपिश्रयं B; ०त्या प्रश्रयं C; ०त्या प्रत्ययं G1, G2; ०त्या प्रश्रययं J. 19 त is wanting in G1, G2. 20 वा B. 21 ०पादौ G1, G2, J. 22 Wanting in B. 23 B, K add प्रथमा. 24 धिष्ठ० J. 25 ०श्ये० G1, G2. 26 ह्रावर्णोद्व० G1, G2; ह्रार्वणोद्व० J. 27 आष्ट्रा० B.

तषां कान्युक्थे कान्यतिरात्र इति ।
सर्वेषां याथाकामीति[2] शाण्डिल्यः ।
हारिवर्णोद्वंशीये वा हारिवर्णाष्टादंष्ट्रे[3] वोक्थान्ते [चैवं[4]] कुर्यादिति
गौतमः ।
5 अतिरात्रे[5] सौभरनामेधे ।[6]
तच्चर्या[7] जानीमः ।
हारिवर्णोद्वंशीये वा हारिवर्णाष्टादंष्ट्रे[8] वोक्थान्ते[9] चैव कुर्यादिति[10] ।
अतिरात्रे[11] चेति धानञ्जय्यः[12] ।
सौभरनामेधे त्वेवोक्थान्ते[13] न कुर्यादिति ।[14]
10 रथन्तरं सन्धिषाम्णां[15] सर्वाभिप्रायम् ।
तद्धि[16] चरति ।
तत्र यानि कामावधारणानि सर्वाभिप्रायेषु[17] तानि भवन्ति ।
तानि खल्वेतानि व्यञ्जनान्येकजातीयान्येव समादध्यात् ।
एवं चाव्याहृतः क्रतुर्भवति[18] ।
15 अपि चैवमार्षेयकल्पो दर्शयति ॥ २ ॥

अथानुष्टुभस्य[19] भागस्य का छन्दोभक्तिरिति ।
एकाक्षरां ब्रुवते[20] शौचिवृक्षाः[21][22] ।
तद्विजानीमः ।
बहुरक्षरप्रवादो भवति ।
20 एकाक्षरा वै वाक्[23] ।
अक्षरेणान्ततः प्रतिष्ठाप्यमक्षरम् ।
व्यक्षरमुच्छिष्यत इति हि भवतीति ।
सर्वैव द्वात्रिंशदक्षरेति शाण्डिल्यः ।
तथा गौतमधानञ्जय्यौ ।

---

1 कन्यु० J. 2 ०मी G1, G2, J, K. 3 हावर्णा० G1, G2, J. 4 Wanting in B, C; वव G1, G2, वैव J. 5 ति is wanting in G1, G2, J. 6 B reproduces here त्वेवोक्थान्ते न कुर्यादिति रथन्तरं सन्धिषाम्नां सर्वाभिप्रायं तद्धि चरति । (lines 9-11). 7 ०च्चर्याय B; ०चर्यो J. 8 ०र्णावाष्ट्रा० B. 9 ०क्थ्यंक्थाते G1, G2, J. 10 ०र्यात् C. 11 रात्रे G1, G2, J. 12 ०य्ये B. 13 वो० C; न्वो (त्वे G2) वोक्थान्ते कुर्यादतिरात्रे चेति धानञ्जय्यः सौभरनामेंधे वो० G1, G2, J. 14 K repeats रात्रे चेति…कुर्यादिति. 15 ०षाम्लं G1; ०षाम्लां G2, J, K. 16 तद्विच० C, G1, G2, J. 17 ०ये स्तुतानि C. 18 ०वुर्त्तवति G1, G2, J. 19 ०ष्टुभाग० G1, G2; ०ष्टुप्भाग० J. 20 ०तो G1, G2, J. 21 शो० G1, G2, J. 22 ०क्षः G1, G2, J. 23 वा is wanting in G1, G2, J.

एतामनुष्टुबित्याचक्षते ।
अ[1]थाप्येनामनुष्टुबर्थे [निधी[2]यमा[3]नां] पश्यामः ।
अथापि यस्तावद[4]कुशलं छन्दसामौ[5]क्थिकामनुष्टुभं पृच्छेदेतामेव द्वात्रिंशदक्षरामाच[6]क्षीत ।
5 तत्खलु गायत्रं प्रातःसवनं, त्रैष्टुभं[7] माध्यन्दिनं, जागतं तृतीयसवनम् ।
यदूर्ध्वमुक्थेभ्य[8] आनुष्टुभः[9] स भाग इति ।
कथमु द्वादशस्तोत्र [10]आनुष्टुभो भागः स्यादिति ।
सवनानि प्रति[11] प्रविष्ट इति गौतमः ।
"अष्टाक्षरा गायत्री, हिङ्कारो नवमः, एकादशाक्षरा त्रि[12]ष्टुप्, द्वादशाक्षरा
10 जगती छन्दोभि[13]रेवानुष्टुभमाप्नोति यजमानस्यानवलोपाय ।" इति । PB. 6. 3. 13.
अन्त[14]स्थान एष भाग इति शौचिवृक्षिः[15] ।
एकविंशस्तोमो वाक् सामा[16]न्तः ।
एष नूनं द्वादशस्तोत्र[17] आ[18]नुष्टुभो भागः स्यादिति ।
15 सर्वैव षट्त्रिंशदक्षरेति शाण्डिल्यः ।
तत्र[19] यच्चत्वार्यक्षराण्युपा[20]हरति परोक्षीचि[21]कीर्षन्निति ।
प[22]दप्रत्यवरोहं शौचा[23]दिरेयः ।
यथैतद् ब्राह्मणम्—द्वादशाक्षरमेकादशाक्षरमष्टाक्षरं वाग्द्वात्रिंशीति[24] ।
प[25]ञ्चदशस्तोत्रे सवना[26]नि प्रति प्रविष्ट इत्येव गौतमः ।
20 अच्छावाकस्तोत्रीये शौचिवृक्षाः[27] ।
अथ षोडशिनि सर्वैव चतुस्त्रिंशदक्षरेति शाण्डिल्यः ।
तत्र यद् द्वे अक्षरे[28] उपाहरति परोक्षीचिकीर्षन्निति[29] ।
उपसर्गाक्षराणि शौचिवृक्षाः ।

---

1 तथा० B. 2 Wanting in B; G1, G2 repeat य. 3 ०मानानां C, K. 4 ०दन्कु० G1, G2;० दक्कु० J. 5 ०क्थिक० C, G1, G2, J, K. 6 G1 repeats पृच्छेदेतामेव द्वात्रिंशं; G2 repeats within brackets पृच्छेदेतामेव द्वात्रिंश. 7 C, K add सवनं; G1, G2, J read ०नसवनंसवनं. 8 ०भ्यो G1, G2, J. 9 ०भं G1, G2, J, K. 10 अ० G1, G2, J. 11 Wanting in G1, G2, J, K. 12 त्रै० G1, G2, J. 13 भि is wanting in G1, G2, J. 14 अन्तन्त० C, 15 ०क्षः G1, G2, J. 16 ०म० G1, G2, J. 17 ०त्रस्यानु० C; ०त्रं अनु० G1, G2, J; ०त्रं मानु० K. 18 षट् त्रिंश० C. 19 ०त्रैव C. 20 ०प० B. 21 ०तिकीर्षमिन्निति G1, G2; ०तिकीर्षमिन्नति J. 22 पाद० B. 23 शौवाजिरे० B; शौचादितरेयः C. 24 B omits ति. 25 C, G1, G2, J, K add अथ. 26 ना is wanting G1, G2. 27 ०क्ष G1, G2. 28 G1, G2, J add अक्षरो. 29 इति is wanting B, K.

दशाक्षरपादꣳ शौचादिरेयः[1] ।
अथातिरात्रे सर्वैव द्वात्रिꣳशदक्षरेति शाण्डिल्यः ।
तां यदभ्यासेन करोति परो[2]क्षीचिकीर्षन्निति ।
वैतद्[3]व्यस्तोत्रीये[4] शौचिवृत्ताः[5] ॥ ४ ॥
5 अथायꣳ सन्धिरन्तर्भागं भवती[6]३ बहिर्भागमिति ।
बहिर्भागमित्याहुः ।
समाप्तेषु भागेष्वागच्छति ।
[अथाप्यैस्या[7] छन्दसा भक्तयति बहिर्भागमिवैव स तत[8] इति ।[9]
अन्तर्भागमित्यपरम् ।
10 का सा भक्तिर्या बहिर्भागमिति ।
अथाप्येनमुक्थैः सम्मिमीते ।
अन्तर्भागमुक्थानि[10] भवन्ति ।
अन्तर्भागः सन् किंभागः स्यादिति ।
गायत्र इत्याहुः ।
15 समाप्तेषु भागेषु पुनरुपक्रमे कोऽन्यो[11] गायत्रवान्[12] स्यादिति ।
सर्वभाग इत्याहुः ।
सर्वभागं पृष्ठं ह्यत्र रथन्तरमिति ।
आनुष्टुभ इत्यपरम्, रात्रानुबन्धतयेति ।
क्रमे भवती३ समास इति ।
20 क्रमे भवतीत्याहुः ।
समस्तेऽक्षरे रात्रिपर्यायाः क्रमे सन्धिरिति[13] ।
अपि वा क्रमे रात्रिपर्यायाः समस्तेऽक्षरे सन्धिरिति ।
नैतदिह[14] विज्ञायत इति शाण्डिल्यायनः[15] ।
अमुत्र खल्वेतद् दशरात्रे[16] विज्ञायते ।
25 इदं पदस्य स्थानमिदमक्षरक्रमस्येदं वृद्धेरिदꣳ समासस्येति ।
तत्र[17] हि द्विर्भागाः प्रकल्पयन्त[18] इति विज्ञायत एवेति ।
वाजाः[19] पदस्थान्यहःसवनानि क्रमे, षोडशी तमप्यभिविहारꣳ शꣳसति[20] ।

1 शौवाजिरेयः B. 2 परो is wanting in G1, G2, J. 3 त is wanting in G1, G2. 4 ॰त्राये G1, G2, J. 5 ॰क्षः G1, G2, J. 6 भवति B. 7 ॰प्यास्यास्या G1; ॰प्या॰ G2, J. 8 त G1, G2, J. 9 B omits up to p. 50. 17. 10 ॰क्तानि G1. 11 कोत्या G1, G2, J. 12 ॰त्र G1, G2; ॰त्रत्स्या॰ J; ॰त्रः K. 13 रि is wanting in G1, G2, J. 14 ॰दिहर्वि॰ C. 15 ॰ल्योनः G1, G2, J. 16 ॰तद्देश॰ G1, G2, J. 17 तर्हि for तत्र हि in G1, G2, J. 18 ॰ल्पन्त J, K. 19 वाज्यः पदः स्थान्यहः स च भानि क्र॰ G1; वाज्यः पदः स्थान्यहः सव॰ G2, J, K. 20 शꣳ is wanting in J.

एतमेवा[1]क्षरक्रममनुचिख्यापयिषन् वृद्धौ रात्रिपर्याय[2]स्थानमप्यभ्यस्यति ।
"अभ्याघात्य[3]सामानो हि छन्दोमाः" इति । PB. 14. 9. 30.
तदप्युभयोः सन्ध्योः सतोरेतमेव सन्धिरित्याचक्षते समासादिति ।
एतेन[4] सर्वैकाहेषु सामभागा व्याख्याताः ॥ ५ ॥

5 अथ दशरात्रे कथं भागा इति ।
याथा[5]कामी भागानामित्येक[6] आहुः ।
अ[7]स्त्येवैक[8]भाग्यमस्ति सर्वभाग्यम् ।
अपितु त्र्यहःश एव भागा स्युः ।
गायत्रः प्रथमस्त्र्य[9]हः ।
10 त्रैष्टुभो द्वितीयः ।
जागतस्तृतीयः ।
आ[10]नुष्टुभः षोडशी ।
आनुष्टुभं दशम[11]म् ।
तदप्येवं[12]मिव ब्राह्मणं भवति—"प्रातःसवने[13]नैव प्रथम[14]स्त्रिरात्रः[15] कल्पते ।
15 माध्यन्दिनेन सवने[16]न द्वितीयः,[17]" तृतीयसवनेन तृतीयः, अग्निष्टोमेन साम्नैव दशममहः ।" इति । PB. 10. 5. 11.
अथापरं गायत्रं] [18]त्रैष्टुभं जागतमिति प्रथमस्त्र्यहः, एवमेव द्वितीय[19] एवं तृतीय[20]ः ।
आ[21]नुष्टुभः षोडशी ।
20 आनुष्टुभं दशमम् ।
अथापरं गायत्रं त्रैष्टुभं जागतमिति प्रथमस्त्र्य[22]हः ।
आनुष्टुभो द्वितीयः[23] ।
गा[24]यत्रं त्रैष्टुभं जागतमिति तृतीयः ।
आ[25]नुष्टुभः षोडशी ।
25 आनुष्टुभं दशमम् ।

---

1 एतम० G1, G2, J; एवमे० K. 2 ०र्यायास्तानप्य० C; ०र्यायास्थानप्य० G1, G2, J; ०र्याया० K. 3 ०त्यसा० G1, G2, J, K. 4 अनेन K. 5 याथोकामी G1, G2, J. 6 क is wanting in G1, G2, J. 7 अस्तोवै० G1, G2, J, K. 8 ०कल्पम० G1; ०कग्ल्य G2. 9 ०स्त्रहः G1, G2, J. 10 अनु० J. 11 ०म्यं G1, G2. 12 ०प्येवतिव G1, G2, J, K. 13 ०सर्व० G1. 14 थ is wanting in G1, G2, J.— 15 ०त्रः । क० G1, G2. 16 Omitted by J. 17 तृतीयः J, K. 18 B resumes from here (see p. 49 line 8). 19 ०या G1, G2, J, K. 20 ०या G1. 21 अनु० J. 22 ०स्त्रयी० B. 23 ०यम् B. 24 गः य० G1, G2, J. 25 अनुष्टुभ G1, G2, J.

अथापरं गायत्रं त्रैष्टुभं जागतमानुष्टुभमिति प्रथमश्चतुरहः ।
एवमेव छन्दोमचतुरहो बहिर्भागे[1] पञ्चमेषष्ठ[2] इति ।
अथापरं पदस्थः प्रथमस्त्र्यहः, अक्षरस्थो[3] द्वितीयः, वृद्धस्तृतीयः[4] ।
आनुष्टुभः षोडशी ।
5 आनुष्टुभं दशमम् ।
ते खलु शश्वद् भाल्लविनो भक्षाननुव्यूहन्ति ।
जगती प्रातःसवन[5] आगमत् ।
तत्र जगच्छन्दसा[6] भक्षयिष्याम इति ।
न वयमनुव्यूहामः[7] ।
10 सवनभक्तिज्ञात्रा एव भक्षेषु स्म[8] इति ।
अथ संवत्सरे[9] चतुर्विंशं लुप्तभागमिति[10] शौचिवृद्धिः ।
गायत्रं वा स्तोमज्ञात्रेण, त्रैष्टुभं वा स्थानेन, सर्वभागं वैकाह्यात्[11] ।
अथाभिप्लवा ऐकाहिका[12] वा स्तोमज्ञात्रेण षाडहिका[13] वा तन्त्रज्ञात्रेण ।
त्र्यहभागात्स्वरसाम्नामानुष्टुभो विषुवांश्चातुर्थ्यात्[14] सर्वभागो वैकाह्यात्[15] ॥६॥
15 अथाहीनेषु द्विरात्राणां गायत्रं पूर्वमहः ।
त्रिभागमुत्तरं यत्प्राग् ब्रह्मसाम्नस्तत्[16] त्रैष्टुभम् ।
ब्रह्मसामप्रभृति जागतम् ।
आषोडशिनः षोडशिप्रभृति[17] परमानुष्टुभम् ।
त्रिरात्राणां गायत्रं प्रथममहः, जागतं द्वितीयम्, त्रैष्टुभं तृतीयम्[18] ।
20 आषोडशिनः षोडशिप्रभृति परमानुष्टुभम्।[19]
वैदत्रिरात्रे[20] सर्वभागान्यहानि ।
चतूरात्राणां गायत्रं त्रैष्टुभं जागतमिति त्र्यहः ।
अक्षरान्तरे[21] चतुर्थमिति शौचिवृक्षिः ।
समस्तेऽक्षर[22] इति गौतमः ।[23]
25 पञ्चरात्रेष्वक्षराक्षरयोरेव चतुर्थपञ्चम इति शौचिवृद्धिः ।[23]

1 ०र्भागं C, G1, G2, J, K. 2 ०म इत्ये ष० G1, G2, J; ०म इत्य ष० K. 3 अत्वस्थो B. 4 वृद्धिस्थस्तृ० C, G1, G2, J, K. 5 ०नमागमं C; ०ने मागमं G1, G2, J; ०नं मागमत् K. 6 जागतच्छ० C; जागतं छ० G1, G2; जगतं छ० J. 7 ०व्यु० G1, G2, J. 8 सम B. 9 सुव० B. 10 ०ब्ध० C, G1, G2, J, K. 11 वैकाह्यादिति C, G2, J, K; वैत्यकाह्यादिति G1. 12 ऐक G1; एके G2, J, K. 13 षोडाहिका B; षाडाहिंका G1, G2; -डहिंका J. 14 ०र्थ्या G1, G2, J, K. 15 ०ह्यादिति C, G1, G2, J, K. 16 B omits तत्. 17 ०शिनप्र० G1, G2, J, K. 18 Wanting in G1, G2, J. 19 B repeats it; wanting in J. 20 ०ति० B. 21 अरक्षराक्षरे G1, G2, J, K. 22 ०स्थे० B. 23 G1 omits it.

समस्तेऽह्नर इत्येव गौतमः ।
षड्रात्रप्रभृतिषु दाशरात्रिका[1] भागा[2] यावद्यावदभिप्राप्नुयुः[3] ।
अथ यत्राहीन[4] एकाहैर्वर्तेत सर्वभागास्तत्रैकाहाः[5] स्युरित्येके ।
आहीनिका[6] भागा यथास्थानमित्यपरम् ।
5 एतेनाहीनेषूपधीयमाना व्याख्याताः ।
अथ[7] ये ऊर्ध्वं दशरात्रादुपधीयेरन् ये वा मध्ये दशरात्रस्य भागपर्वणि सर्वभागा एव ते स्युः ।
एतेन सत्रेषूपधीयमाना व्याख्याताः ।
अहीनैकाह[8]समासा[9] ह्येव सत्राणि भवन्ति ॥ ७ ॥

10 अथ सुब्रह्म[10]ण्यायां विचारयति—
ऋग्नु[11] खल्वियं भवती[12]३ सामेति ।
ऋग्भवतीत्याहुः[13] ।
ऋच इवास्या नामधेयꣳ सुब्रह्म[14]ण्येति ।
सामेत्यपरम् ।
15 गीतꣳ हि भवति ।
अथाप्याहुः—मन्त्र एव खल्वियं[15] शिथिलो भवति, आह्वानार्थ[16]स्तस्येयमभ्या[17] इयꣳ स्यादिति (?) ।
अथाप्याहुः—नैवेयमृङ् न साम सुब्रह्मै[18]वेदमिति ।
ब्रह्मणो भवती[19]३ उद्गातुरिति ।
20 ब्रह्मणो भवतीत्याहुः ।
एतेन ह्यग्रे संयुज्यते ।
अथापि ब्रह्मा सुब्रह्मण्य इति नाम[20]धेयसारूप्यात् ।
अथाप्येवꣳ[21] सर्वा अहोरात्रा[22] वषट्[23]कारिण्यो भवन्ति[24] ।
उद्गातुर्ह्याग्नीध्रः सम्पद्यत इति ।
25 उद्गातुरित्यपरम् ।

---

1 दश० G1, G2, J, K. 2 B adds वा. 3 यद्या० B. 4 योऽहीन B. 5 त्सर्वे भागाः । स्तत्रै० G1, G2; त्सर्वं भागाः स्तत्रै० J; त्सभा० K. 6 ०क C, G1, G2, J, K. 7 B reads अत for अथ ये. 8 अहैनै० G1, G2, J. 9 ०मासो B, G1, G2, J, K. 10 ह्म is wanting in C. 11 ऋगु C; अग्नु G1, G2, J. 12 ०ति B. 13 इदमृ० B. 14 ह्म is wanting in G2. 15 खल्वियं B. 16 ०ह्वार्थ० B. 17 ०स्येयमभ्याꣳयियꣳ० C; ०स्येमभ्यायियꣳ सा स्या० G1; ०स्येमभ्यायियꣳ सा स्या० G2, J; ०स्येमभ्याप्रियꣳ सा स्या० K. 18 ०ह्म० B. 19 ०वति B. 20 भागधेय० G1, G2. 21 अशाप्येव G1, G2; अशाप्येवा स० J. 22 होत्रा B. 23 ०ट० C. 24 ०वति G1, G2.

गीतकारी हि[1] भवति ।
[सं[2]] यद्भ[3]क्ताः पुरा ह्यभक्तेभ्यः कर्मापं[4]वृज्यत इति ।
अथैनाँ[6]नागतत्वात् कालादहीनेषु सत्रेषुँ[7] याजमानात् "नामग्राहः किमर्थः" इति । Ārs. K. V. 7a.

5 उच्चावचचरणाः स्त्रियो भवन्ति ।
स इह[8] देवसादये च मनुष्यसादये च येषां पुत्रो वक्ष्येते[9], तेषामेव पुत्रो भविष्यामि, यांश्च[10] पुत्रान् वक्ष्यंति[11] ते मे पुत्रा भविष्यन्तीति[12] शाकटीमन्ववरुह्याह्वयेद्राज्ञो[13]ऽप्रत्यारोहायाप्रत्यारोहाय ॥ ८ ॥

अष्टमः[14] पटलः

10 अथातो दशरात्रः ।
तस्य ब्राह्मणेनैव द्रव्यसमुद्देश उक्तः ।
यानि चैतानि ज्योतिष्टो[15]मानि द्रव्यलँक्षणानि[16] ।
यानि च पृष्ठैः समानँ[17]रूपाणि ।
यानि च[18] दशँ[19]रात्रेण समानसङ्ख्यानि ।
15 यथैतत् प्रथँ[20]मानि प्रथमे[21] द्वितीयानि द्वितीय इति ।
स्थानतो[22][23]ऽसमानँसङ्ख्य[24]ं सम्पश्येत् ।
अथैताः सप्त नामँ[25]विभक्तयः—
स तं तेन तस्मै तस्मात् तस्य तस्मिन्निति ।
आमन्त्रिताऽष्टमी ।
20 स खलु विभक्तिमामन्त्रितां प्रथमेऽहनि करोति ।
कस्य हेतोरिति ।
प्रत्यक्षविभँ[26]क्ति रथन्तरम् ।
आमन्त्रितस्य न परोक्षमस्तीति ।
[अथाप्येषा प्रथँ[27]माग्निमन्थनीया भवति, तां चतुर्थेऽहनि करिष्यन् भवति ।[28]

1 ह C, G1, G2, J, K. 2 Wanting in B. 3 ०भक्षेभ्यः C; ०भक्ताः G1, G2, J; ०भक्षाः K. 4 स्य भ० C, G1, G2, J, K. 5 कर्म प्रवृ० C; कर्मा-वृ० J, K. 6 अतिनागतत्वात् B; अथैतानाग० C. 7 G1 adds स. J. 8 ह G1, G2. 9 वक्ष्येते B; वक्ष्यते, तेषामेव पुत्रो is omitted by C. 10 यंश्च० G1. 11 वक्ष्ये C; वक्षे J, K. 12 ०ष्यतीति G1, G2, J, K. 13 ०ज्ञा प्र० B. 14 In B only. 15 ज्यौ० C. 16 द्रव्याणि C. 17 न is wanting in G1, G2, J. 18 चतुर्द० G1, G2. 19 दशारेण B; ०र्शरात्रे J; ०रात्रे K. 20 प्रायत्मानि G1, G2, J. 21 प्रथमद्वि० C, G1, G2, J, K. 22 G1, G2, J add संख्य. 23 ०तोऽपि स० C, 3, K. 24 ०न० द्रव्य०सम्प० C; ०न० सम्प० G1, G2, J, K. 25 म is wanting in B. 26 वि is wanting in B, C. 27 प्रथिमा० G1, G2, J. 28 Wanting in B upto p. 54. 17.

तमिति द्वितीया, तां द्वितीये।
तेनेति[1] तृतीया, तां[2] तृतीये।
तस्मा इति चतुर्थी, तस्यां[3] न द्रव्यं विद्यमानमाहुः।
एकामुदाहरन्ति—
5 'प्र तव्यसीं नव्यसीं धीतिमग्नये' इति।
RV. 1. 143. 1.
सैषा प्रतवती[4] भवति भागान्तेऽपरूपा।
स इति प्रथमा, तां चतुर्थेऽहनि करोति।
कस्य हेतोरिति।
10 प्रत्यय एष भागानां प्रत्यय[5] एष विभक्तीनाम्।
प्रत्यये प्रत्ययम्।
अथापि नामधान्येषा भवति।
एतस्मिन्नहन्यग्निं जनयन्ति।
जातस्यो नाम[6] धीयत इति।
15 तस्य ब्राह्मणं भवति—"देवा[7] वै श्रियमैच्छं[8]स्तान्न[9] प्रथमेऽहन्यविन्दन्न[10] द्वितीये न तृतीये, तां चतुर्थेऽहन्यविन्दन्[11]" इति। PB. 10. 7. 2.
एतां श्रियमाह—
नामधेयं[12] ह विभक्त्यः[13] श्रिता भवन्तीति[14]।]
अथाप्येषा[15] द्विसंशया पञ्चमेऽहनि भवति।
20 तस्येति वा तस्मादिति[16] वा।
तस्मादिति भवतीति गौतमः।
तां[17] शश्वदेके चतुर्थीं[18] ब्रुवते।
तां ततो नामधान्या प्रच्युतामनन्तरस्मिन्नहन्यनुगृह्णाति[19]।
तदप्येवमेव[20] ब्राह्मणं भवति[21]—"तेनो[22] श्रीः प्रत्युपोदितेति"। PB. 10.
25 7. 2.

---

1 ते is wanting in G1. 2 Omitted by G1, G2. 3 Wanting in G1, G2. 4 तस्मा G1, G2. 5 प्रवती G1, G2, J, K. 6 प्रत्यय ··· विभक्तीनाम् wanting in J. 7 मम G1, G2; नामम J; मान K. 8 दैवा J. 9 ०मिच्छंस्तान्य G1, G2, K, J. 10 ०विदन्यविदन्न K. 11 ०हन्य हन्य विद० G1, G2. 12 ०धेये G1, G2, J, K. 13 ०क्तियः G1, G2, J, K. 14 ०तीति G1, G2, J, K. 15 B resumes from here (see p. 53. 24); G1, G2, J, K omit भवन्तीति ··· तस्मादिति (line 20). 16 तस्मादिति वा is omitted by C. 17 तां स्विदेके B. 18 चतुर्थं B, G2, J. 19 ०तामन्यतर० C. 20 ततप्येवामेव G1. 21 ०तीति K. 22 तेना B, G1, G2.

ब्र[1]ह्मण आज्ये निरु[2]च्यते—

'इन्द्रात्परितन्वं ममे[3]' इति। SV. 2. 340; RV. 8. 76. 12.

त[4]स्येति भवतीति धानञ्जय्यः।

सा षष्ठी, तामामन्त्रितया प्रच्युतामनुगृह्णाति।

5 अथाप्येतयोः पूर्वयोस्तृतीयया समानं द्विवचनम्।

स तयै[5]वं ते उपा[6]त्ते अमँस्त—

अपि वा प्रत्यवरोहार्थं एवाकरिष्यत्।

समूढा[7]ज्ये निरुच्यते।

'अग्ने[8] स्तोमं मनामहे सिध्रमद्य दिविस्पृशः।

10 देवस्य द्रविणस्य[9] वः॥' SV. 2. 755. RV. 5.13.2; MS. 4. 10.2: 145. 12; KS. 20. 14.

इत्यभविष्यदिति।

अथा[10]पि व्यूढाज्य एव भवति।

'तव श्रियो वर्ष्यस्येव विद्युतः' इति। SV. 2. 332. RV. 10. 91. 5;

15 PB. 13. 2. 1.

त्वं[11]च्छ्रिय इत्यभविष्यदिति।

आमन्त्रि[12]तैव षष्ठे भवति।

ए[13]वमाद्यवसानसमाधिरिति॥ ९॥

"अथैषा स्वरवि[14]भक्तिः—औ[15]शनं प्रथमे, वासिष्ठं द्वितीये, उभयतः स्तोभं[16]

20 गौतमं तृतीये, आभीशवं चतुर्थे, आ[17]नूपं पञ्चमे, इहवद्वामदेव्यं षष्ठे।

अथैषा निधनवि[18]भक्तिः—नौधसं प्रथमे, श्यैतं[19] द्वितीये, महावैष्टम्भं तृतीये,

आथर्वणं चतुर्थे, बा[20]र्हद्गिरं पञ्चमे, गो[21]ष्ठं षष्ठे।

[22]अथैषैडावि[23]भक्तिः—कालेयं प्रथमे, मा[24]धुच्छ[25]न्दसं द्वितीये, रौरवं तृतीये,

---

1 नवै ब्रा० C क. 2 न G1, G2, J. 3 ममेति। B. 4 J, K add तस्मादिति ०स्यैति G1, G2, J. 5 तायै० G1, G2, J. 6 ०त्ते B. 7 समूढाज्योतिनि० G1, G2, J. 8 अग्ने G1, G2, J. 9 य इति विणस्य व G1, G2, J. 10 पि is wanting in G1, G2. 11 न्वच्छ्रियत C. 12 ०न्यचैवं G1, G2; ०न्त्रिवैवं J. 13 एवामा० G1, G2. 14 ०रभ० B. 15 औथनं G1, G2, J. 16 स्तोमं J. 17 आन्वयं G1, G2, J. 18 ०नभक्तिः B; ०नविभक्ति G1, G2, J. 19 श्येतं B, J. 20 बाहं० G1, G2. 21 गौ० G2. 22 अप्यैषेडा C, J; अथेषेडा K. 23 ०डाभक्तिः B. 24 माध्व० J. 25 ०श्छ० G1, G2, J.

पृश्नि चतुर्थे, रायोवाजीयं पञ्चमे, गोष्ठ एव षष्ठे।" Agni. LŚ. 4. 5. 18.
अथैषं[1] छन्दोमेष्विडाविभक्तिः[2]—
जराबोधीय१ सप्तमे।
इडानां[3]१ सञ्चारोऽष्टमस्य सती नवमेऽहनि[4] क्रियते।
5 प्रतीचेनेडं[5] काशीतं नवमे।
उत्सेधो[6] दशमे[7]।
अथ नौधसे वदति[8]—
'इन्द्रं गीर्भिर्हवामहे'[9] इति। RV. 8. 76. 5; PB. 11. 4. 4.
तत्खलु हवामह इत्येव कर्तव्यम्।
10 विधिंप्रमाणात्[10][11]।
कथमयथाविधि कुर्यामेति।
आम्नायद्वैतेन ब्राह्मणमुपवर्णयतीत्यपरम्[12]।
तन्नियोगाय न प्रभवतीति।
एतेनैतद्[13] व्याख्यातम्—
15 'अक्रान्त्समुद्रः परमे[14] विधर्मन्[15]' इति। SV. 1. 529; 2. 603; RV. 9. 17. 40; PB. 15. 1. 1.
यानि चैवंजातीयानि—
यथाक्षारे[16] वदति—
"यः पुरा पुण्यो भूत्वा पश्चात् पापीयान् स्यादाक्षारं ब्रह्मसाम कुर्वीत"
20 इति। PB. 11. 5. 11; LŚ. 10. 1. 13.
किं तस्य स्थाने स्यादिति।
एते एवान्[17]योन्यस्य स्थानं व्यतिहरेत्।
नौधसमुष्णिहि कुर्यादिति।
तदाहुः—व्यतिहरति चेद्यत्र बृहत्षोडशिसामं[18] स्याद् गौरीवितं नूनं
25 द्वितीयस्याह्नः पृष्ठं कुर्यादिति।
अथ वै सञ्चारयेदिति[19]।

---

1 ०षां G. 2 ०डाम० B; ०विक्ते G1, G2, J. 3 इज्याना१० G1, G2; इज्यना१० J. 4 G1, G2, J add क्रिय हनि. 5 ०नैडं G1. 6 उत्सोधो G1, G2; उत्सोधो J. 7 ०मः G1, G2, J, K. 8 वदन्ती G1, G2, J, K. 9 ई गी० G1, J; ईन्द्र गी० G2. 10 विधिः प्र० G1, G2, J. 11 ०णाः C, G1, G2, J, K. 12 G1, G2, J omit व. 13 ०नैव G1, G2, J, K. 14 प्रथमे SV, RV but PB has परमे. 15 ०र्मन्निति. G1, G2, J, K. 16 ०क्ष्यरे G1, G2. 17 वा० C ख, G1, G2, J, K. 18 सामा G1, G2, J. 19 ०येति G1, G2, J, K.

सञ्चारयति चेद्गौरीवितमेवानुष्टुभि कुर्यात्, गौरीवितं षोडशिसामेति[1]।
अथ वै प्रतिनिदध्यादिति[2]।
प्रतिनिदधाति चेद्यत्र[3] बृहत्षोडशिसाम स्यात्, किं तत्र बृहत्सदृशं द्वितीयस्याह्नः पृष्ठं कुर्यादिति।
5 अथ कथं स्यादिति।
सञ्चारयेदहः[4]।
नानाहःसु[5] यानि सञ्चारिधर्माणि[6] स्युः प्रतिनिदध्यात्।
समानेऽहनि व्यतिहरेत्, यत्र व्यतिहारमभिरूपं मन्येत।
प्रतिनिधिष्विहाभिरूपतरम्[7][8]।
10 पौष्कलमुष्णिहि[9] कुर्यात्।
एतच्च ज्योतिष्टोमानां[10][11] द्रव्याणां[12] दशरात्रे निहितं भवति।
अपिच पदनिधनं राथन्तरेऽहनीति।
यज्ञायज्ञीयमग्निष्टोमसाम[13], यज्ञे यज्ञे कुरुतेति।
तदेवाभिवदति।
15 अथाप्येष तृतीयसवने[14] सामान्तस्तमदिदर्शयिषीत्[15]॥ १०॥
"अथ वैरूपे वदति—
'यथा मण्डूक आद् करोत्येवं निधनमुपयन्ति' इति। PB. 12. 4. 16.
कस्येदं ब्राह्मणं स्यादिति।
कृता राथन्तरीडा[16] कृता बार्हतीति कौत्सः।
20 तदिदमकृतकारं ब्राह्मणमर्द्धेडाब्राह्मणं[17] स्यादिति।
पञ्चमे सेयं[18] प्रत्याहृता भवतीति गौतमः।
तां परोक्षीकृत्याभिव्याहरेयुः[19][20]।
एवं पञ्चमेऽहन्ययातयामा भवतीति।
तदप्येवमिव[21] ब्राह्मणं भवति—'अयातयामतायै' इति। cp. PB. 12.
25 4. 16.

1 ०समेति० G1, G2; ०सनेति J. 2 ०विति G1. 3 च० G1, G2, J; त० K. 4 चारये (ति सञ्चारयति चेद्गौरीवितमेवानुष्टुभि कुर्याद्गौरीवितं षोडशिसमेति। अथ वै प्रतिनिदध्या किं) दह G1; वारयेदह G2, J. 5 ०हास्सु C. 6 ०धर्मिणि B. 7 ०निधिस्त्विहा० C; निस्त्विधिहा० G1, G2, J; ०निध्विस्त्विहा० K. 8 ०तरः C, G1, G2, J, K. 9 हि is wanting in G1, G2. 10 ज्यौ० C. 11 B adds अत्र. 12 हव्याणां G1. 13 ०ज्ञीतिम० G1, G2. 14 ०सवनं सा० C; ०सवनसा० B, K. 15 ०मदी० B. 16 ०रीडाः G1, G2, J. 17 ०णार्द्धेसाम्रा० B. 18 ०ह्वेयं C, G1, G2, J, K. 19 ०त्तल० G1, G2, J. 20 ०व्याई० G1, G2, J, K. 21 ०प्येतमि० B; ०वम Caland.

तत्र कः परोक्षीभाव इति ।
आकारटकारौ[1] वा कुर्युरिकारेकारौ[2] वा ।
एवमेकवर्णविकारैः[3] ।
इकारन्त्वेर्वायिकारीकुर्युः ।
5 एतस्मिन् परोक्षीभाव उपलभ्यत इति ।" Caland ibid.
पदंदैवतं[5] व्यत्यस्यति[6] ।
वैरूपे विरूपंमचिकीर्षत्[7] ।
अवरमेवेदमहः[8] सत् परमत्यस्तं[9] भवतीत्यपरम् ।
व्यत्यासे व्यत्यासं करिष्यामीति, स्तोत्रवशेनेति धानञ्जय्यः ।
10 यदं[10]व्यत्यस्यन्[11] पदंदैवतम् ।
पदा यत्प्रत्याहारयिष्यदिति[12] प्रत्यवेतं[13]स्तदा प्रतिहारोऽभविष्यत् ।
यद्यु[14] वै देवतायै बहिर्ऋचं प्रतिहारो[15]ऽभविष्यत् ।
अथेत्थ[16]मनतिप्रत्याहृतो[17]ऽन्तर्ऋचं भवतीति ।
अथाप्यस्य[18] छान्दसमध्या[19]यं विद्यमानमाहुः ।
15 "अथ[20] खल्वाह—'द्वादश वैरूपाणि भवन्ति ।' इति । PB. 12. 4. 17.
कस्येदं ब्राह्मणं स्यादिति[21] ।
संवत्सरब्राह्मणमित्याहुः ।
संवत्सरे द्वादशकृत्वो होतृषाम भवति ।" Caland ibid.
तस्येदं संवत्सराप्तिं वदेदिति ॥ ११ ॥

20 अथ[22] प्रेमं[23]हिष्टीये वदति ।
हिंसितोऽन्वीक्षेत, यमिच्छेत् प्रसृज्यमानं न[24] प्रत्येयादिति ।
तमनुगायेद्[25] दक्षिणमक्ति[26] निकुब्य सव्यं सक्थि [उद्[27]]गृह्य[28] ।

1 ०रगकारौ B; ०रंकारौ G1, G2, J, K. 2 ०र्युंकारणकारौ G1, G2; ०रिकारणकारौ J, K. 3 ०रन्त्वे० G1, G2, J. 4 ०वाइका० B, K; ०वाईका० G1, G2, J. 5 पदादेवतं G1, G2, J. 6 स्यति is wanting in G1, G2. 7 B, K repeat रूप. 8 अपर० B; एवरामवेदमभ्यहः G1, G2; एवरामवेदमहः J. 9 परमभ्यस्तं C, K; परामभ्यस्तं G1, G2, J. 10 यदि व्यत्यस्मिन् B. 11 पदं दैवताम् B; यद० C. 12 ०ष्यदति C, G1, G2, J, K. 13 ०वेतस्तथा C, G2, J, K; ०चेतसूथा G1. 14 अद्यु B. 15 प्रतिभवि० G1, G2, J. 16 अत्थमनत० G1, G2; अत्थमनति० J. 17 ०हृतोर्ऋचं G1, G2, J; ०हृतोन्तर्ऋचं K. 18 ०स्यैतं छा० C, G1, G2, J, K. 19 ०मधसयं J. 20 अप्यथ C. 21 स्यादिति ··· तस्येदं (line 19) is omitted by G1, G2, J. 22 अत्र B. 23 प्रथम० B; प्रथमं ये हिष्वी G1, G2, J. 24 Wanting in G1, G2, J, K. 25 ताम० G1. 26 दक्षिणमन्विति कुब्य सव्यं C; दक्षिति कुब्य सव्यं G1, G2, J. 27 उद् is omitted by B; द् is wanting in G1, G2, J, K. 28 ०गृह्य C.

अथायं[1] न प्रत्येयादिति काकुभ उक्थप्रणयः[2] पृष्ठच्छन्दसोऽन्वभिवृद्धिः[3] ।
"अथ स्वःपृष्ठस्याङ्गिरसस्य निधनयोरानुपूर्व्ये विवदन्ते ।
स्वः[4]पूर्वमिडोत्तरेत्येके ।
एवमेतयोः सामन्तयोरानुपूर्व्यं[5][6][7] भवति ।
5 इडां वयं पूर्वां कुर्मः[8] ।
एवमनयोः समानोपायादभिव्याहारं पश्यामः ।
यथा[9] राजने[10] माधुच्छन्दस इति ।" Caland PB. 12. 9. 19.
अथ वैराजं त्र्यनुतोदमेके[11] कुर्वन्ति ।
एवं[12] छान्दसोऽध्याय इति ।
10 चतुरनुतोदं वयम् ।
एवमाचार्यवच[13] इति ।
'तेन[14] वात्सप्रं[15] समादध्यात् ।' Dh. Dr. Ś. 40 b. 13.
"यदीदं त्र्यनुतोदं[16] [स्यात्[17] त्र्यनुतोदं[18]] तत् ।
यदि[19] चतुरनुतोदं[20] चतुरनुतोदं[21] तत् ।" cp. Dh. Dr. Ś. 40 b. 13;
15 41 a. 1.
तदप्येवमिव ब्राह्मणं भवति—एतस्मिन् वै वैराजं[22] प्रतिष्ठितमिति ।
अथ कतमे विष्टम्भा इति । cp. PB. 12. 10. 10.
देवता इत्याहुः ।
देवताभिः पदानि विष्टब्धानीति[23] ।
20 तदाहुः—एकादशेमा[24] देवता दशकृत्वो विष्टभ्नोतीति ।
दशैताः सप्राया[25] भवन्ति ।
अपि वा[26] य एते देवतान्तरेषु पदैवत्स्तोभास्तान्[27] विष्टम्भानवोचत ।
तैर्देवता विष्टब्धा इति ।

---

1 अशा० G1, G2, J, K. 2 उक्थः प्र० C, G1, G2, J; उक्थ्यः प्र० K. 3 ०च्छन्दोऽन्व० C; प्र (पृ G2, J) छन्दोन्व० G1, G2, J, K. 4 स्वः is wanting in B. 5 ०न्तरयो० C, G1, G2, J. 6 ०रनु० G1, G2, J. 7 ०पूर्वं G1. 8 कूर्मः C; कुर्म्म J, K. 9 अथा G1, G2. 10 ०जा० G1, G2. 11 ०नुतदे० B; ०नुनोद० G1, G2. 12 वं is wanting in G1, G2. 13 एव इति मार्य० G1, G2; चा is wanting in J. 14 तन G1, G2, J. 15 वाक्र प्र० G1. 16 ०तोतं B. 17 B, C omit the portion within brackets. 18 अनु० G1, G2, J, K. 19 यति G1, G2, J. 20 Wanting in C, K. 21 ०रा० G1, G2. 22 राजं C, G1, G2, J, K. 23 विष्टम्भानीति C; विष्टब्दानीति G1. 24 ०शमा G1, G2, J, K. 25 सत्यं प्रा० C, G1, G2, J, K. 26 वपायैर्ये दे० B. 27 दशस्तो० C, G1, G2, J, K.

अथैतयोरक्षरयोर्विवदन्ते ।
"ऋगक्षरे स्तोभाक्षरे" इति ।
ऋगक्षर इति लामकायनः ।
तदभिव्याहारेण जानीमः—यादृशे इमे ऋगक्षरे तादृशे इमे भवत
5 इति ।
अथाप्यादित्यसदृशं वैराजम् ।
यादृश इत आदित्यस्तादृशः परस्तात् ।
तद्रूपं दिदर्शयिषन् प्रथमे ऋगक्षरेऽन्त्याक्षरं परिहरति ।
अथाप्युच्चावचाः सामवृत्तयो भवन्ति ।
10 यथैतत् साम्न्युपेतानि पुरारब्धादीनि[12] ।
तन्न्यायं मन्यन्ते ।
स्तोभाक्षर इति धानञ्जय्यः ।
पश्यामः खलु पदानुरूपान् स्तोभानृचोऽन्वयतः ।
यथैतज्जनद्वत्यामृचि जनद्वान् स्तोभोऽपि[18] ।
15 सिद्धमतो हि राद्वोग्नीषु ।
एवमिमे पीतवत्यामृचि पीतवती स्तोभाक्षरे भवत इति ।
अथाप्यादित्यसदृशं[19] वैराजम् ।
यादृश इत आदित्यस्तादृशः परस्तात् ।
तद्रूपं दिदर्शयिषन् पदानुरूपे स्तोभाक्षरेऽन्तं परिहरति ।
20 नो एतत् कंचन पश्यामः ।
प्रथमे ऋगक्षरेऽन्तं परिह्रियमाण इति ।
अथैषातिजगती भावप्रत्यये छन्दस्तोमरोहमदिदर्शयिषीत् ।
विराजं वा वैराजेऽहन्यचिकीर्षीत्[28] ।

---

1 आथेत० J. 2 खेरा० J. 3 रूपं B. 4 ०यिष्यन् B, G1, G2. 5 ०रे अन्तं प० C; ०रे अन्नं प० G1, G2, J, K. 6 अथायरुच्चा० G1, G2; अथापरुच्चा० K. 7 समावृ० B. 8 ०त्तोयो G1, G2, J, K. 9 ०थैकवत् C. 10 साम्भ्युपे० C; साम्युपे० G1, G2, K; साम्यूपे० J. 11 पुनरा० C. 12 ०धानीति C, G1, G2, J, K. 13 नान्यां C; नान्यायं G1, G2, J, K. 14 मन्येत C, G1, G2, J, K. 15 पश्यामेः G1, G2, J. 16 ०चोव्यवयन्तः C, G1, G2, J, K. 17 ०द्द० J. 18 ०भोऽप्रसिद्धवतोऽपि रा० C; ०भ्योय (०भोप G2, J) सिद्धवन्तोऽपि रा० G1, G2, J. 19 ०शां G1, G2, J, K. 20 ०दृशे B. 21 ०यिषीत् B; दिदिदशयिन् G1, G2, J. 22 यदा० C, G1, G2. 23 ०न्तरं B. 24 ०त क्ष्वच G1, G2, J; ०तद्वचनं K. 25 ०भागप्रत्यवाये B; भागप्रत्ययाये K. 26 म is wanting in B, J, K. 27 ०दर्शयिर्शषोत् J. 28 ०कीषत् B, G1, G2, J.

विराडियं[1] पञ्चाशदक्षरा[2], बृहत्यावुत्तरे, तेन बृहतीभ्योऽनपेतं भवतीत्यनपेतं[3] भवतीति ॥ १२ ॥

नवमः[4] पटलः

अथैतासु महानाम्नीषु[5] विप्रतिपादयन्ति[6]—

5 इदं[7] शाक्करमिदमशाक्करमिति।

अशाक्करी प्रथमा द्विपदा, शाक्कराणि[8] त्रीणि पराणि पदानि।

धातुरशाक्करः पञ्चाक्षरः।

स एष कृताकृतो भवति।

वत्सोऽशाक्करोऽष्टाक्षरः।

10 [ऊधः[9]] शाक्करमष्टाक्षरम्।

अभ्यासवत् तस्य[10] त्र्यक्षरान् पदादीन्[11] प्रतिनोदा[12] इत्याचक्षते।[13]

पुरुषोऽशाक्करः पञ्चाक्षरः, शाक्कराण्येव त्रीणि पराणि[14] पदानि।

अभ्यासोऽशाक्करोऽष्टाक्षरः।" Sāy. PB. 13. 4. 2.

तस्य प्रस्तावयति[15], न प्रतिहारयति[16]।

15 एतेनैवोत्तरयोः[17] शाक्कराणि[18] चाशाक्कराणि [च[19]] व्याख्यातानि[20]।

त्र्यभ्यासोत्तमा[21] शक्करी[22] भवति।

अभ्यासाः[23] किमर्था इति।

लोकोक्ताः शक्कर्यः[24] साभ्यासा इमे लोका भवन्ति।

अग्निर्वायुरिति पूर्वयोः।

20 आदित्यश्चन्द्रमा इत्युत्तरस्य[25]।

तस्माद् त्र्यभ्यासोत्तमा शक्करी भवति।

अथ खल्वाह—"त्र्यौपशाः[26] संस्तुता भवन्ति" इति। PB. 13. 4. 3.

कस्येदं ब्राह्मणं स्यादिति।

उत्तमाया त्र्यभ्यासाया[27] इत्याहुः।

---

1 विराजडियं G1, G2, J. 2 पञ्चादशद० B; पंचावराक्षरा G1; पञ्चादशक्षरा G2, J; पञ्चादशाक्षरा K. 3 ०भवतीत्यमपेतं G1, G2, J. 4 In B only. 5 ०म्नीसु G1, G2, J. 6 ०न्ती C. 7 दशाक्षरमिदम० C. 8 श० B. 9 Wanting in B 10 तस्या G1. 11 पादा० C. 12 प्रतीतोदा C, G1, G2, J; प्रती० K. 13 S omits this line. 14 Wanting in C. 15 ०तावयती K. 16 ०हारयति K. 17 ०रायो G1. 18 ०रा G1, G2. 19 B omits च. 20 ०ख्यानि G1, G2. 21 ०मात्तमा G1. 22 ०शा० C, G2, J; साकरी G1. 23 ०सा C; ०सं कि० G1, G2, J; ०सं कि० K. 24 शा० C, G1, G2, J. 25 ०त्तमस्य C, J, K. 26 त्र्यौपशाः C. 27 त्र्यभ्या० G1.

एकाध्यासे पूर्वे[1] द्व्यध्यासोत्तमा ।
तस्यां[2] इदमभिनन्दं[3] ब्राह्मणं वदेदिति ।
अपि वा समस्तब्राह्मणमेव स्याद् ।
द्व्योपशे[4] पूर्वे[5] द्व्योपशोत्तमेति[6] ।
5 ऊधसोऽभ्यासब्राह्मणं मन्य इति वार्षगण्यः ।
एवमिव ब्राह्मणं भवति—“इडे[7]ऽभितोऽथकारं तस्माच्छृङ्गे तीक्ष्णीयसी[8] स्तूपात्[9] ।” इति । PB. 13. 4. 4.
उपशोकानि[10] शृङ्गाणि भवन्तीति ।
अथ खल्वाह—“दिशः[11] पञ्चपदा[12] दाधारर्तून्[13] षट्पदा छन्दांसि[14] सप्तपदा
10 पुरुषं द्विपदा[15]” इति । PB. 13. 4. 2.
“प्रतिलोमं वदन्ति[16] ।
पादतश्[17]छिद्रोहो भविष्यतीति ।
सप्तपदा प्रथमा शक्वरी, षट्पदा द्वितीया ।
यद्धि[18] प्रथमाया उत्तमं[19] पदं तद् द्वितीयायाः प्रथमम् ।
15 प्रगाथः सानु[20]पृष्ठ[21]मिति पञ्चपदोत्तमा ।
यद्[22] द्वितीयाया उत्तमं तत् तृतीयायाः[23] प्रथमं च द्वितीयं च ।” Say. ibid.
नवपदाः पुरा बभूवुरिति लामकायनः ।
ताभ्यो[24] रेवत्यो[25] निर्मिताः ।
20 द्वे प्रथमायाः पदे, त्रीणि द्वितीयायाः, चत्वारि तृतीयायाः ।
तदप्येवमिव ब्राह्मणं भवति—“सिमाभ्यो[26] ह्यधिरेवत्यः प्रजायन्ते ।” इति । PB. 13. 9. 4.
नवपदा एव भविष्यन्तीति, ऊधश्चाभ्यस्यति[27] पदं चानुसंहरति ।
अथापि नवपदा एवाभिरूपतरा[28] न विपर्याये[29] त्रिणव इति ॥ १३ ॥

---

1 पूर्वे द्व्यध्यासो is wanting in G1, G2. 2 तसा G1, G2, J. 3 ०नन्दां B; ०नन्दा G1, G2, J, K. 4 Wanting in C; ०पदेशे G1, G2, J, K. 5 Wanting in C. 6 ०योप० C; द्वयोपदेशो० K. 7 इमडे० G1, G2. 8 ऽतितिष्णयसि B. 9 ०याद् C. 10 ०शौका० G1. 11 दश B. 12 पञ्चदा B. 13 दाधार is wanting in B. 14 ०दांऽस्ति C; ०दंऽसि G1. 15 ०पदेऽपि । G1, G2. 16 वदति Ck; भवति Ckh, G1, G2, J, K. 17 वादत० G1, G2, J. 18 यादि G1; यद्धि G2, J, K. 19 उत्तमं पदं ... द्वितीयाया (line 16) is wanting in K. 20 साधु० B. G1, G2, J. 21 ०ष्ठा० G1, G2. 22 अथ B; य G1, G2, J. 23 द्वितीयायाः B. 24 ताभ्या G1, G2, J. 25 ०वत्या G1, G2, J. 26 समा० B. 27 ०स्य C, G1, G2, K; स्यति is wanting in J. 28 ०रूप्यन्तदनरा G1, G2, ०पान्तदरा J. 29 ०र्यायोऽहिकृण० B; ०र्ययेति त्रि० G1, G2, J, K.

अथ चतुर्थः प्रपाठकः

अथ खल्वाह—"गायत्रमयनं भवति, त्रैष्टुभमयनं भवति, जागतमयनं भवति[2]।" cp. PB. 13. 4. 10

किमयनꣳ स्यादिति।

ऊधसि विकारो दृष्टः[3] इति[4] गौतमधानञ्ज्यौ।

5 [यँ][5] एँ[6]ष मध्य ऊधसोऽथकारस्तꣳ स्वरिति कुर्यात्।

तद्गायत्रमयनम्।

अथेति त्रैष्टुभम्।

इडेति जागतम्।

तदाहुः—विकृतो[7]ऽथकारः, अविकृतस्य को विकारः, यँ[8] एवाभित इडे[9] ते

10 विकुर्यादिति।

सर्वमेवोधं[10]र्विकारार्थमागच्छतीत्यपरम्।

सर्वमेवोधर्विकुर्यादिति।

अथाप्याहुः—अविकृतमेवोधः स्यात्, अन्त्येडा[11]मेव विकु[12]र्यात्, अन्त्याख्यानि कर्माणीति।

15 अथा[13]प्याहुः—अविकृतैवान्त्येडा स्यात्, यदेवं[14] प्रागन्त्येडायास्तद्विकुर्यात्, तद्ध्ययनं भवतीति।

ते[15] कस्य हेतोर्जागतमयनꣳ समारप्स्यन्तीति[16]।

नेदं[17] जागतमिति शाण्डिल्यायनः।

---

1 In C only. 2 ०तीति C, G1, G2, J, K. 3 दृष्टम G1, G2, J. 4 ति is wanting in G1, G2. 5 Wanting in B. 6 ए is wanting in G1, G2, J. 7 ०र्वितो यथाकारः G1, G2; वि–तोयथोकोरः J. 8 ये चाभि० C; यो वाभि० G1, G2, J; ये वाभि० K. 9 ०डेति वि० C, G1, G2. 10 ०धषुका० B. 11 अन्तेडा० G1, G2. 12 कुर्यादन्ता० C; कुर्यांकस्यदन्ता० G1, G2, J, K. 13 अथापार वि० G1; अथाप्यार वि० G2. 14 ०वं G1, G2, J, K. 15 एकस्य हे० G1, G2, J, K. 16 ०न्तेति C, G1, G2, J, K. 17 तदिदं B.

यानि त्व[1]त्र निधनानि तानि स्वरिति कुर्यात् ।
तद् गायत्रमयनम् ।
अथेति[2] त्रैष्टुभम् ।
इडेति जागतम् ।
5 अथेदं मिश्रनिधनꣳ सर्वाभिप्रायम्—
यथेदमधीमह इति ।
ऊर्ध्वꣳ शक्करीभ्यः पञ्च[3] पुरीष[4]पदानि पञ्चाक्षराणि, तेभ्यः प्रस्तावयति, न प्रतिहारयति, न शश्वदेकेऽध्यासपुरीषपदानां प्रस्तावयन्ति प्रतिहारो[5]-पायान् प्रस्तावोपेयादिति ।
10 प्रस्तावयामो वर्य[6]म् ।
अन्यदिदꣳ शक्करीभ्यः ।
तत्कथम[7]प्रस्तुतं क्रियेतेति[8] ।
सꣳरोधात्तु[9] नूनं प्रतिहारोपायात् ।
ते खल्विमे बह्वः प्रस्तावाः ।
15 कथमोङ्कार इति ।
प्रस्तावनिमित्त ओङ्कार इत्येके ।
प्रस्तावे प्रस्ताव ओङ्कारेणाददीत ।
अथाप्याह—रसो वा एष साम्नां[10] यदोङ्कारः[11] ।
नैतेनातिरेकोऽस्तीति ।
20 प्रथम एव प्रस्ताव इत्यपरम्[12] ।
स्तोत्रीयाया एतान्यङ्गानि भवन्ति ।
[13]सकृत्तु[14] खलु स्तोत्रीयाया ओङ्कारो भवति ।
अथापि परिचष्ट ऊर्ध्वं प्रतिहारादोङ्कारेणादानम् ।
अथाप्येवमन्यैः सामभिः समाधिरिति ॥ १ ॥
25 ते खलु शश्वदेके पुरीषपदैः[15] प्रतिपद्यन्ते ।
पञ्चविधेन पञ्चमस्याह्नः पृष्ठं प्रतिपत्स्यामह इति ।
अथाप्येवꣳ शक्कर्यवसानꣳ स्तोत्रं भविष्यतीति ।
अथाप्याह—"गोष्ठः पुरीषम्[16]" इति कृत्वा वै गोष्ठं पशूनुपाकुर्वन्ति । PB. 13. 4. 13.

---

1 वत्र G1, G2, J. 2 ॰प्येति C. 3 Wanting in G1, G2. 4 ॰रु॰ B. 5 ॰हारा॰ B. 6 ॰याम् G1, G2, J. 7 कथं प्र॰ B; कथमस्तु॰ G1, G2, J, K. 8 क्रिययेतेति G1, G2. 9 नू प्र नं G1, G2, J. 10 साम्नां G1, G2. 11 यवोका॰ G1. 12 ॰रः C. 13 G1, G2, J add स. 14 सकृन्तु C, G1, G2, J. 15 ॰पादैः G1, G2, J. 16 ॰व B.

अन्ततो वयं कुर्मः ।
एवं च छान्दसोऽध्यायः ।
अपि चैवं[1] पञ्चविधं पञ्चमस्याहुः पृष्ठ[2]मनुसंस्थास्य[3]त इति ।
यद्वेतद् गोष्ठः[4] पुरीषमिति, इष्ट्वा[5] वै[6] पशून् गोष्ठं कुर्वन्ति ।
5 अथा[7]पि पश्चार्धसेविपुरीषमिति ।
तत्खलु सर्वाभिः सह स्यादित्याहुः ।
तृचदृष्टय इमा भवन्ति लोकदृष्टयः ।
तदिदमन्तेऽनुषङ्गस्थाने समाम्नातं भवति ।
अथाप्येवं सर्वा[8]स्विस्य पुरीषा भविष्यन्तीति ।
10 व्यवायश्चाभविष्यदतिगुरू[9] च ।
[अथ वै विष्टावान्तेषु विष्टावसमा[10]धय इति ।
व्यवायश्चैव गुरू च ।][11]
अथ वै पर्यायान्ते[12]षु पर्यायस[13]माधय इति ।
व्यवायश्चैव गुरू च ।
15 अथ वा[14] उत्तमामेवानुचरेत् ।
एतया हि सहोत्[15]पन्नं भवतीति ।
व्यवायश्चैव गुरू च ।
सकृदन्ततः स्यादित्याहुः ।
एतच्चा[16]सां लघिष्ठम् ।
20 अपि चैवम[17]व्यवायः ।
अथापि परिनिष्ठायाशिषमुदित्वान्तेऽनुज्ञां वदिष्याम इति ।
अथापि पश्चार्धसेविपु[18]रीषमिति, तासां धर्मो नियुज्यते—
न व्याहरेत्, नाश्नी[19]यात्, अभिनद्धाक्षं[20] आसीत ।
प्र[21]वेकोऽयं ब्र[22]ह्मणो भ[23]वति ।
25 तन्नो ह प्रतिलभ्य प्र[24]देहेत् ।
एतमेवाहं ब्रह्मचर्य[25] धर्म[26]मु मन्य इति गौतमः ।

---

1 वैवं G1, G2, J. 2 षष्ठम० G1; षष्ठः म० G2, J. 3 ०प्यत इति। C; ०स्यति। G1, G2; ०स्य इति। J, K. 4 ०ष्ठमपु० B. 5 इष्या B; इष्ट्वी G1, G2; तांष्ट्वी J. 6 B adds व. 7 अपि G1, G2. 8 सर्वाः सपुरीषा भ० C; सर्वास्व पुरीषो भ० G1, G2, J, K. 9 ०रु C, G1, G2, J 10 ०सधय G1, G2, J. 11 अथ ··· च wanting in B. 12 ०न्ते G1, G2, J. 13 ०सामाधाय G1, G2. 14 या B. 15 ०त्पनच्चव० G1, G2, J. 16 ०त सां G1; ०त-सां G2, J; एतश्चासां K. 17 चैव व्य० G1, G2. 18 ०र्ह्रीसावि० K. 19 नासीतयाया B. 20 ०द्धाक्षत्मासीत C; ०द्धाक्षि असीत G1, G2. 21 प्लवे० C. 22 ब्रा० B. 23 ०न्ति G2, J. 24 ०देहेत G1, K. 25 ०र्यंध० C. 26 धर्मं C, G1, G2, J, K.

तत्त्वं[1]तिगुरु वाभविष्यत्।
अपि च नो[2] ह मरणाशङ्किमिमास्तु स[3]र्वच्छन्दस्या भवन्ति।
आसां[4]मेव चरतः सर्वच्छन्दसामिव व्रतं चरितं भविष्यतीति।
अथाप्याहुः—यानि रूपाणि ब्रह्मचारी न पश्यति, या[5]न् रसान्नाश्नाति,
5 लब्ध्वा[6] हैनान् समावृ[7]त्य भवति।
तमेतद्रूपेभ्यश्च रसेभ्य[8]श्च समवरुन्धन् मन्यत इति ॥ २ ॥
तासां खलु त्रीन् संवत्सरान् ब्रह्मचर्यं चरेत्।
कृष्णवस्त्रः[9] कृष्णभक्ष आ[10]चार्याधीनस्त[11]पस्वी तिष्ठेद्दिवा[12]सीत नक्तम्।
सायं प्रातरुदकोपस्पर्शी सर्वभूतेभ्यः पन्थानमं[13]ददद्वर्षति।
10 शरणं नातीयात्।
नित्यं स्नि[14]ग्धवासा बुभू[15]षेत्।
उद[16]कसाधवो हि महानाम्न्य इति।
एवं खलु[17] चरतः कामवर्षी पर्जन्यो भवति।
उदकोपस्पर्शनं[18] किमर्थमिति।
15 अ[19]बुक्ताः शक्वर्य[20]स्ता एव प्रविशन् मन्यत इति।
अपि वा पशूनामेव[21] पायना[22]र्थं स्या[23]त्, पशूक्ताः श[24]क्वर्य इति।
स[25] खलु प्रथमां स्तोत्रीयामनुगाप्या[26]होरात्रे वाग्यतः परिणद्धा[27]आसित्वा
तस्याः[28] संवत्सरं ब्रह्मच[29]र्यं चरेत्।
एवमेव द्वितीयायाः।
20 एवं तृतीयायाः।
ते खलु श[30]श्वदेके प्रथमत एव परिणह्यन्ति।
प्रथमं[31]त एव यथा न प्रध[32]क्ष्यतीति।
अध्यासं प्रत्येके।

---

1 तत्त्वेंऽति० G1, G2, J, K. 2 नोहं रणाशङ्किमिमाः B; ०मिमस्तु C. 3 स्वसर्व० B; सर्वं० G1, G2, J, K. 4 ०सां मे C, G1, G2. 5 तान्यासन्ना० C; तान् G1, G2, J, K. 6 लब्धा B, G1. 7 ०दृ० G1, G2. 8 Wanting in K. 9 समत्वकुल B; सप्तव० J. 10 Wanting in G1. 11 ०नत० G1, G2, J. 12 ०द्दिवा० G1, G2. 13 ०मान्दयद्व B; ०मदददृद्व० G1. 14 सन्दिग्ध० B. 15 क्षुभू० G1. 16 ०के सा० G1, G2, 17 G1, G2, J add वु. 18 ०नी G1, G2. 19 अनुक्ताः C, G1, G2, J, K. 20 ०र्य इति खस्ता G1, G2. 21 ०मे G1, G2. 22 ०सार्थं K. 23 G1, G2, J add पशूर्थं. 24 शा० G1, G2. 25 Wanting in C, J, K. 26 ०गाया० C; ०गाय्या० G1, G2, J. 27 असि० G1, G2, J. 28 ०स्याः B, C. 29 ०चर्थं C. 30 शश्वादते G1, G2, J; ०देते K. 31 ०मन्त B. 32 प्रवक्ष्य० C, G1, G2, J, K.

अध्यासं प्रत्यध्यसिष्यामह[1] इति ।
अपि[2] तं[3] प्रातरभिवीक्षयन्ति, योऽन्यं[4] प्रधक्षन्तं मन्यन्ते, योऽग्निं वत्समादित्यम् ।
अपोऽभिव्यख्यमित्यपः[5] ।
5 ज्योतिरभिव्यख्यमित्यग्निम् ।
पशूनभिव्यख्यमिति वत्सम् ।
स्वरभिव्यख्यमित्यादित्यम्[6] ।
अथाप्येतं[7] दिवैवैता भवन्ति ।
आप इवाग्निरिव वत्स इवादित्य इवेति ।
10 अथ खल्वाह—"पार्थुरश्मं[8] राजन्याय ब्रह्मसाम कुर्यात्, बार्हद्गिरं ब्राह्मणाय, रायोवाजीयं वैश्याय[9]" इति । PB. 13. 4. 18
पार्थुरश्मं[10] चेद् ब्रह्मसाम स्यात्, बार्हद्गिरस्यैतद्[11]दन्तु कुर्यात् ।
यद्यु वै रायोवाजीयमेते[12] बार्हद्गिररायोवाजीये, स स्तोत्रीयेऽन्योन्यस्य स्थानं व्यतिहरेत् ।
15 कथमुभयेषु[13] समवयत्स्विति[14] ।
भूम्नो[15] वशं[16] नयेद्, गृहपतेरित्येके ।
अपि [वा[17]] बार्हद्गिरमेव कुर्यात् ।
नित्यं च श्रेष्ठ[18]वर्णीयं चेति ।
वैश्वामित्रस्तोत्रीये षोडशिना स्तूयमान आष्टमिकमुक्थ्य[19]स्तोत्रीयं प्रतिनि-
20 दध्यात्, असंश्चा[20]राय वीङ्कस्तोत्रीये वसिष्ठस्य प्रियमनुकल्पयेद् वसिष्ठस्य प्रियमनुकल्पयेत् ॥ ३ ॥

दशमः[21] पटलः

अथ षष्ठेऽहनि "रेवतीषु वारवन्तीयं पृष्ठं भवति ।" PB. 13. 10. 4.
तदेके प्रत्यक्षं ब्रुवते ।
25 एतत् प्रकृतौ दृष्टं भवतीति ।
अथापि यद्रेवत्यः पृष्ठम[22]भविष्यन्[23] पवमान आसां धर्ममकरिष्यन्निति[24] ।

---

1 °ध्या B; °ध्याम G1, G2, J, K. 2 अपि is wanting in G1. 3 च B. 4 यान्य प्रधक्ष° B; यान्य प्रवक्ष्यं C. 5 एवोभि° B; आयाभि° G1, G2, J. 6 म् । अथाप्येतदिवैवैता is wanting in G1, G2, J, K. 7 °तानि B. 8 पार्थ° B. 9 श्या is wanting G1, G2, J. 10 पार्थ° B, G1, G2, J. 11 °स्यैवर्धु C. 12 C, G1, G2, J, K add एव. 13 °ये G1, G2, J. 14 समावयस्थिति G1, G2; समावयत्स्थिति J. 15 भुम्नो C. 16 वभूशं G1, G2, J, K. 17 Wanting in B. 18 G1, G2 omit श्रेष्ठ. 19 °मुक्थ° C, K. 20 संचा° C. 21 In B· B. only (here ends the 1st daśati of the Paṭalas). 22 पृष्ठः मा भ° G1, G2. 23 °ष्यत् C, G1. 24 °ष्यदिति B, K.

अथाप्यनुरूपाग्निष्टोमसाम्नि वारवन्तीयस्यैवानुरूपं कल्पयतीति ।
रेवत्य इत्यौष्ट्राक्षीरेवतीषष्ठानां सृष्टिब्राह्मणं भवति ।
तासां धर्मो नियुज्यते—"तद् गवां घोषोऽन्वसृज्यत ।" इति । PB. 7. 8. 13; Dh. Dr. Ś. 6. 1. 6.
5 अथापि प्रतिपद्भिः पृष्ठानि संवर्णयन् रेवतीरेवाभिसंवर्णयति षष्ठे च विश्वजिति च ।
अथापि पृष्ठ्यस्तोमात् पृष्ठानि च्यावयन् रेवतीरपि च्यावयति ।
अथाप्यनुगृहीतपृष्ठे रेवतीरेवानुगृह्णातीति ।
अथापि परोक्षपृष्ठोपाङ्क्त्यपृष्ठयोरनुगृहीतपरोक्ष इति वारवन्तीयमेवानु-
10 गृह्णाति ।
यद्वेतदेतत् प्रकृतौ दृष्टं भवतीति, ब्राह्मणेनैव कारणं वदंति ।
यद्वेतत् पवमान आसां धर्ममकरिष्यन्निति, उपान्तं पृष्ठत्वं स्तोत्रीयेण मन्यते[13] ।
यद्वेतद् वारवन्तीयस्यैवानुरूपं कल्पयतीति, उक्तं वारवन्तीयस्य
15 परोक्षम् ।
तदेतद् रेवतीपरोक्षमेव भवतीति ॥ ४ ॥
अथ खल्वाह—"प्रायणतो द्विपदाः कार्या३ उदयनता३ इति ।" PB. 13 12. 1.
कथं प्रायणतः स्युरिति ।
20 प्रथमेऽहनीत्याहुः ।
एतद्धि प्रायणं भवति ।
अथापि दृश्यते प्रायणीयस्योक्थ्यत्वं यथा चतुर्विंशस्य ।
तथा षष्ठस्याग्निष्टोम्यं यथाभिप्लविकस्येति ।
द्वितीय इत्यपरम् ।
25 एतदुक्थानां प्रायणं भवति ।
अथाप्येवमुक्थव्यतिहारः सिध्यति ।
अथाप्येवं प्रकृतिसविधतरं भवतीति ।
"कथमावृत्ते पृष्ठ्ये संस्थाधर्मा" इति । Ārṣ. K. V. 44 a.

1 ०प्या० C. 2 रू is wanting in G1, G2, J, K 3 ०स्यानु० B. 4 ०द्राक्षी० G1, G2, J, K. 5 ०यन नेवती० G1, G2, J, K. 6 षष्ठी J. 7 पृष्ठा० C. 8 ०तपष्ठे G1, G2 J. 9 क्ष्य for क्ष in G1, G2. 10 ०पाङ्क्य C, G1, G2, J, K. 11 Wanting in G1, G2. 12 उपास्तं B. 13 ०न्यत् K. 14 ०यन्तीति B. 15 एव त० G1, G2, J, K. 16 ०कथ्यत्वं G1, G2, J, K. 17 Wanting in C. 18 ०क C; इति is wanting in G1, G2, J, K. 19 ०राम् G1, G2, J. 20 कतमा० C; कथमाहस्ते G1, G2, J.

आवृत्तस्याप्यन्त एव स्युरित्येके—यदा षडहः सन्तिष्ठत इति हि भवतीति ।
अथापि षडहधर्मा इत्याचक्षते ।
नचैतत् षष्ठस्य साधीयो[1] यथो च प्रथमस्य ।
"त्रयस्त्रिꣳशस्य त्वेव सꣳस्थायामित्याचार्याः[2] ।" Ārṣ. K. V. 44 a.
5 स[3] एतदा[4]वृत्तेरवयवः ।
य इत उपक्रमधर्मः स परस्तात् सꣳस्थाधर्मः ।
यः परस्तात् सꣳस्थाधर्मः[5] स इत उपक्रमधर्म इति ।
अथापि य एनानावृत्तस्यान्तं परिहरेत् सर्वाण्येव नूनꣳ सो[6]न्तलक्षणान्या-
वृत्तस्यान्तं परिहरेदिति ॥ ५ ॥

10 त्रीणि दशरात्रस्य विच्छिन्नानीति शाण्डिल्यः ।
पञ्चममभितो द्वे, षष्ठाद[7]ूर्ध्वमेकम् ।
तेषां सन्तानाय सन्तन[8]ीति ।
अनुपूर्वꣳ "सूक्तानुरूपाꣳश्छन्दोमान् करोति" पृष्ठ्य[9]च्छन्दोमानामकृत-
काराय । Ārṣ. K. V. 28 b.
15 अथाप्य[10]कृताः ।
[अतः[11]] प्राक् सूक्तानुरू[12]पतेति ।
अथापि प्रजा[13]पतिसꣳस्तावेषु प्रजास्थानमभ्यवर्द्धयिषीत्[14] ।
"बृहद्रथन्तरे पृ[15]ष्ठे" नहि षाडहिकान्यनुभवन्ति । Ārṣ. K. V. 28 b.
नो व्य[16]लुलुप्सीत् ।
20 अथापि शिथिलोक्ता
तेषां प्रत्यक्षाभ्यां पृष्ठाभ्यां दृढीभावो भविष्यतीति ।
अथापि तम उक्ताः ।
ते एते ज्योतिषी[17] साम्नाम्[18] ।
स कस्य हेतोः ।
25 बृहत्पूर्वं युक्त इति ।
कृतयोः क्रियमाणयोरेषा कृता[19]कृतिः ।
अथापि स्तोम[20]प्रत्यवाये पृष्ठतो रोहमदिदर्शयिषीत् ।

---

1 साधियो C; साध्ययो G1, G2, J, K. 2 ॰र्यैः B. 3 Wanting in C, G1, G2, J, K. 4 ॰दावृत्ते रूपम् C, K; ॰दारुपवृत्तै (त्ते J) रूपम् G1, G2, J. 5 ॰र्मैः B. 6 सोक्षोपणन्यावृस्यान्तं B; सोन्तलक्षणां न्या॰ G1, G2. 7 षष्ठे पूर्वमेकम् Ck. 8 ॰नी B. 9 पृष्ठ॰ G1, G2; पृष्ठ्यः छ॰ K. 10 ॰प्यप्रकृतवादः C. 11 Wanting in B, C. 12 ॰पयतेति C; ॰पत्येति G1. 13 प्रज्ञापथति॰ C; प्रजाति॰ G1, G2, J, K. 14 ॰यिष्यन् B. 15 षष्ठे J. 16 व्यलोलु॰ B. 17 ॰षि B. 18 ॰म्ना B. 19 कृत॰ C, G1, G2, J. 20 ॰मः प्र॰ G1.

वर्ष्मोक्तं[1] बृहदिति ।
अथापीदं[2] व्रतस्थानं बृहदासितया[3] व्रतस्य मानसंतया[4] ते व्यत्यासं[5] प्रयुङ्क्ते ।
तत् कुशलं वाङ्निधनानि मा[6]ध्यन्दिना[7]न्त्यान्यैडान्य[8]भवान्त्यानि[9] सवन-च्छन्दसोरनुग्रहाय ॥ ६ ॥

5 "अर्कपृष्ठान् पैङ्गिनो[10]ऽधीयते[11]" ।
सैषां[12] छन्दोमानां पृष्ठभक्तिः[13] ।
तेषां पृष्ठत्वे तिष्ठमानो[14] न साक्षात् करोति ।
बृहद्रथन्तरे वा[15] निकामयमानः पूर्वा[16]वाभवे करोति ।
एवं नेदीयसी पृष्ठानाम् ।
10 'सप्तमेऽहनि[17] कृताकृतो भवत्यब्रा[18]ह्मणविहितत्वात्[19] ।' Sāy. PB. 14. 5. 12; cp. Dh. Dr. Ś. 9. 3. 4.
कर्तव्य इत्याचार्याः[20] ।
छन्दोमानां चार्क[21]समाधिः ।
यथा चैतत्[22] "[23]पैङ्गिनोऽधीयते छन्दोगाश्चाप्येनमेकेऽधीयते[24] ।" Caland
15 PB. 14. 5. 12.
अथापि संरोधेऽनुगृह्यते, यथा त्रिवृति दशरात्र इति ।
नवमेऽहनि समे स्तोमे सति साध्यासां[25] बृहतीं करोति ।
कस्य हेतोरिति ।
साध्यासा पूर्वेऽहनि कृता ।
20 स एवम[26]प्रत्यवायः ।
अथापि बह्वियं चरति ।
तस्याः पथ्यता[27]मपिपादयिषीत् ।
दाशरात्रिकाणां[28] द्रव्याणां पथ्याख्या[29] ।
[30]अथाप्येतस्यामेवैतं सामयोगं साधीयो[31] ह्यश्नुत इति ।

---

1 वर्ष्मो० C, G1, G2, J, K. 2 वृ० C, G1, G2, J. 3 वृ० G1. 4 ०सता B; ०सं तया G1, G2, J, K. 5 वृत्यासं G1; व्रत्यासं G2, J, K. 6 ०मादितान्त्यार्भ० J. 7 ०नान्यन्त्या० C. 8 ०न्त्या० B. 9 ०ष्ठानि K. 10 पैं० C, G1, G2, J, नैगिनो० K. 11 ०न्ते G1, G2, J, K. 12 ०षां J. 13 ०विभ० Caland. 14 ०नो (?) Caland. 15 वा (?) Caland. 16 ०चाभवे C, G1, G2, K; Caland suggests here पूर्वास्त्वाभवे. 17 ०न्यर्कः कृ० S. 18 ०ब्र० J. 19 ०त्वा C, G1, G2. 20 ०र्यः G1, G2, J, K. 21 चर्क० G1, G2, J. 22 चैतान् C. 23 पैं० C, G1, G2; नैगिनो० K. 24 ०क धी० G1, G2, J, K. 25 साध्यानां K. 26 ०वम प्रत्ययवा० C; ०वं प्रत्यवा० B. 27 पर्थतमापि० B; ०मापि० C, ०मापिदयितीत् G1, G2, J. 28 B adds धर्माणां. 29 पार्थाख्या B; ०ख्यातं G1, G2, J. 30 अ is wanting in G1, G2. J. 31 ०योभ्यश्नुत C, K; ०योन्युत G1, G2; ०योभ्युत J.

त्रैककुभस्य निधने विवदन्ते ।
पदनिधनमित्येके[1] ।
यादृशे इमे ऋगक्षरे तादृशे इमे भवत इति ।
बहिर्णिधनमित्यपरम् ।
5 बहिर्णिधनस्थाने च युज्यते ।
अपि चास्य निधनवादो भवति ।
बहिर्णिधनानामुत निधनवादा भवन्ति[2] ।
अथाप्यापद्यते[3] ज्योतिर्विचारान् ।
यत् पदनिधनमभविष्यदित्यरेक्ष्यत[4] ज्योतिष्टोमीं मात्राम्, नास्य[5] प्रति-
10 निष्कारं[6] कल्पयति बहिर्णिधनस्येव सत इति सत इति ॥ ७ ॥

प्रथमः पटलः[7]

अथ दशमेऽहनि चतुर्ऋचꣳ होतुराज्यꣳ समामनामः ।
तस्य मध्यमे भवतः—तानूनपाती[8] च नाराशꣳसी च ।
द्वयानि कुलानि भवन्ति—तानूनपातीनि[9][10] च नाराशꣳसीनि च ।
15 तानूनपातीं[11] तानूनपातेषु कुर्यात्, नाराशꣳसीं नाराशꣳसेषु ।
वसिष्ठशुनका अत्रयश्च वाध्रयश्वाश्च[12] कण्वाश्च सङ्कृतयश्चैतानि नाराशꣳसानि । cp. LŚ. 6. 4. 13.

अथेतराणि तानूनपातीनीति ।
कथमुभयेषु[13] समवयत्स्विति ।
20 भूम्नो[14] वशं नयेत्, गृहपतेरित्येके[15] ।
अपि वा तानूनपातीमेव कुर्यात् ।
एषा भूयिष्ठानां कुलानां भवति ।
अपि चैतामेवैकेऽधीयते ।
अथाप्येषा समारब्धतरा भवतीति ।
25 अथ मानसम् ।
दशमस्य भवती ३ सर्वस्याँहो[16] एव दशरात्रस्येति ।

---

1 ०धनानामि० C. 2 ०न्तीति C, G1, G2, J, K. 3 ०वद्येते G1; ०पद्येते G2, J, K. 4 ०ष्यद् यत् परे० C; ०ष्यद् यत् परोक्ष्य० G1, G2, J, K. 5 न्ययस्य B. 6 प्रतिष्का० B. 7 J adds नास्य. 8 In B only. 9 G1, G2, J omit तानूनपाती ··· नाराशꣳसीनि च (line 14). 10 तानूनपातीनि ··· च wanting in C. 11 ०तिं B; ०तं C. 12 वध्र्यश्वाश्वक० C, G1, G2, J. 13 ०ष्वस० B, J. 14 भूम्नौ C. 15 ०पतितिरि० G1, G2, J. 16 ०ह्नौ G1, G2, J, K.

दशमस्येत्याहुः—
नैनं[१] दशमेनाह्ना विप्रयुज्यमानं पश्यामः ।
अथापि दशमधर्मा[२] इत्याचक्षते ।
अथापि साद्धं मानसेन[३] विराडनुष्टुप्[४]सम्पत्तिसिध्यति ।
5 अथाप्याहुः—सर्वमेवेदमहः[५] पुरा मानसं[६] बभूव ।
तदतिगुर्विति ।
वाचꣳ समापादयाञ्चक्रुरेकस्तोत्रं चित्तं[७] धर्ममनु प्राब्रुवन्[८] स्थास्यतीति ।
अथापि वागुक्तमहः[९] ।
संयुक्ते वाङ्मनसे[१०] भवत इति ।
10 न दशमस्येत्यपरम् ।
उपरिष्टात् पत्नीसंयाजानां भवति[११] ।
यन्नूनं दशमस्याभविष्यत् पुरस्तात् पत्नीसंयाजानामभविष्यदिति ।
अथाप्यत्र त्रिकस्तोमः[१२] ।
कथं त्रयस्त्रिꣳशं कृत्वा समानेऽहनि त्रिकं पर्यवैष्यदिति[१३] ।
15 अथाप्यत्र गायत्रं[१४] छन्दः ।
कथं त्रयस्त्रिꣳशदक्षराः कृत्वा समानेऽहनि गायत्रं[१५] पर्यवैष्यदिति ।
अथापि[१६] गायत्रं साम ।[१७]
कथमग्निष्टोमसाम कृत्वा समानेऽहनि गायत्रं पर्यवैष्यदिति ।[१७]
अथापि वागुक्तमहः ।
20 अन्या[१८] वाग्भवत्यन्यन्मनः[१९] ।
नास्य भूयान्[२०] दशमेनाह्ना सम्बन्धो[२१] यथो[२२] च[२३] प्रथमेनेति काप्टवः ।
सर्वं वैतद् दशरात्रस्य[२४], सर्वो वैतस्य दशरात्र इति शाण्डिल्यायनः ।
आयामवाचं दशकमं मनो व्याप्नुवाम[२५] ।
न[२६] संयुक्ते वाङ्मनसे भवत इति ॥ ८ ॥
25 अत्र[२७] गायत्रीः करोति ।

---

1 नैतद् Cक, K; नैव Cख, G1, G2, J. 2 साध्याद् B. 3 ०मासेन G1, G2, J. 4 ०राद् स० C, G1, G2, J, K. 5 मानं G1, G2, J. 6 ०तं० B. 7 वित्तं G1, G2, J. 8 प्रा० B. 9 वायुक्त० G2, J, K. 10 वाक् मा० B. 11 ०न्ति B. 12 ०कः स्तो० J, K. 13 ०वयिष्य० C, G1, G2, J, K. 14 ०त्र्यं B, G1, G2, J. 15 ०त्री G1, G2. 16 तथा० G1, G2. 17 C omits it. 18 अंत्या G1, G2, J, K. 19 ०न्यस्तनः C; ०न्यमानः G1, G2, J; ०न्यन्माना K. 20 भूयाद्दश० C; भूमान्दश० G1, G2, K; भूमान्द्दश० J. 21 ०बद्धो G1, G2, J, K. 22 यथा C. 23 Wanting in C. 24 ०त्र G1, G2, J. 25 ०नोऽप्यासवाम C, J, K; ०नोऽप्यास G1, G2. 26 G1, G2 omit न संयुक्ते. 27 तत्र C, G1, G2, J, K.

स्थानं गायत्रीणां यदि[1] परस्याह्नो गुर्वेवेद[2] स्तोत्रं तत्र लघिष्ठं छन्दोऽचिकीर्षीत् ।

अथा[3]प्येवमा[4]द्यवसानसमाधिः ।

प्रतिष्ठार्थो वाव गायत्रीः करोतीति[5] ।

5 तासु विवदन्ते—ऐन्द्र्य[6]ः प्राजापत्य[7]ः सार्पराज्ञ्य[8]श्चान्द्रमस्यः सौर्य इति शाकपूर्णि[9]ः ।

तथा धानञ्जय्यः ।

प्रत्यय आदित्यः, प्रत्ययो मनः ।

प्रत्यये प्रत्ययम् ।

10 तत्र[10] गायत्रं करोति ।

स्थानं गायत्रस्य यदि परस्याह्नो गुर्वेवेद[2] स्तोत्रं तत्र लघिष्ठं सा[11]माचिकीर्षीत् ।

अथाप्येवमाद्यवसानसमा[12]धिः ।

प्रतिष्ठार्थो वाव गायत्रं करोतीति ।

15 "यज्ञायज्ञीयगौरीवितिरथन्तरवामदेव्यान्येवंयुक्तानि सामव्यूह इत्याचक्षते ।" Ārs. K. V. 31a; 131b.

"अथैतस्मिन् ब्रह्मोद्ये वदति ।

भूयांसीव ह स्म शाण्डिल्यः प्र[13]तिदिशति ।

य[14]द्वादोऽश्वत्रिरात्रे ब्रह्मोद्यं तद्वा प्रत्ययिष्यद्यथा वैतद् ब्राह्मणा अधिमन्त्रं समुदाहर[15]न्तीति ।" cp. LŚ. 3. 8. 7-9.

20

वर[16]वरणमत्र भवत्यन्तनिर्वचना आशिष इति । cp. LŚ. 3. 8. 10.

वृत्वा[17] वरानौदुम्बरीं समभिपद्यन्ते, सर्व[18]कृतिं कृत्वा निस्वरिता इव मन्यन्ते । cp. LŚ. 3. 8. 11.

अत आत्मानमूर्जा प्रत्याप्याययन्तो मन्यन्ते[19] ऊ[20]र्गुदुम्बर इति ।

25 "स[21]मासे छन्दोव्यूहे सामव्यूहं कुर्[22]वीत इति गौतमः ।

अकृतकारा[23]र्थः" त्रयस्त्रिंशमग्निष्टोमसाम करोति । Ārs. K. V. 23 b.

---

1 यत् B. 2 सामचि० K. 3 यथा० G1, G2, J. 4 ०वसान० G1. 5 ०रोति B. 6 ०न्द्रः B. 7 प्राजापत्याः C, K; प्रजापत्यः G1, G2; प्रजापत्याः J. 8 ०ज्ञ० C, G1, G2; ०ज्ञः श्चा० J, K. 9 ०पूर्णाः G1; ०पूर्णि० G2. 10 त्र गाय is wanting in G1, G2, J. 11 ०म० G1, G2. 12 ०माधि C; ०धिति G1, G2, J. 13 प्रदि० C, J, K; प्रविश० G1, G2. 14 यद्वादे० G1, G2. 15 ०न्त इति B; ०रति G1, G2, J, K. 16 वरण० C; चरचरण० G1, G2, J. 17 प्र B; वृत्या G1, G2, J. 18 ०कृतं B. 19 B adds इव. 20 वायु० B. 21 विस० B; समाद्यै G1; समादौ J, K. 22 कुर्वेत K. 23 ०र्थे G1, G2. J.

उपवदितान्[1] छन्दोमान[2]वसानेऽचिकीर्षीत्[3] ।
अथापि शिथिलोक्थाः ।
प्रतिष्ठोक्थश्च त्रयस्त्रिंशः, तमवसानेऽचिकीर्षीत् ।
अथापि त्रयस्त्रिंशे क्रियमाणे त्रिके सार्पराज्ञे[4] त्रिंशतःस्तोत्रीयं[5] दशम-
5 महः सम्पद्यते सा विराट् ।
अथाप्येवं द्वादशपञ्चविंशानहः सम्पद्यते ।
नोहैनमृक्स्थात्तरादकारिषं[6] सम्पदा चिदेनमुपाप्स्यामीति ।
एतद्द्वयं शाण्डिलम् ॥ ९ ॥

पञ्चदशस्तोत्राज्ज्योतिष्टोमात् सषोडशिकां सस[7]न्धिकां रात्रिं ब्रूहीति ।
10 चतुर्विंशतिमाज्येभ्य आदत्ते ।
द्वे वामदेव्यात्, चतस्रः साकमश्वात्[8], दश गायत्रास्तृचाः, तान् रात्रेः स्थाने निदध्यात् ।
चतस्रः ककुभः सौभरात्, तासां द्वितीयातृतीययोश्चतुरक्षरं[9][10] चतुरक्षर-मुद्धृत्य द्वे प्रथमायामुपदध्यात्[11] ।
15 एवं स विराट्[12]प्रथमो गायत्र्युत्तरो वैतहव्यस्तोत्रीयः[13] ।
अतिशिष्टानीतरस्यां ककुभ्युपदध्यात्, तां षोडशिनः स्थाने निदध्यात् ।
चतस्रो नार्मेधात्, तिस्रश्चोष्णिहः, एकां चानुष्टुभम्, तां षोडशिनः स्थाने निदध्यात् ।
अतिशिष्टास्तिस्रः[14], कौत्सस्य द्वे[15] [बृहत्यौ[16]] नौधसात्, तथा कालेयात्,
20 तासामेकां[17] षोडशिनः स्थाने निदध्यात् ।[18]
ताः[19] सर्वाश्चतुस्त्रिंशदक्षराः सम्पद्यन्ते ।
अतिशिष्टास्तिस्रः सन्धेः स्थाने निदध्यात् ।
द्वे[20] ककुभौ[21] रथन्तरात्[22], चतस्रो यज्ञायज्ञीयात्[23], तासां द्वे द्वे सन्धिस्तो-त्रीयेषूपदध्यात् ।

---

1 अप० B. 2 ०ता C, G1, G2, J, K. 3 ०नां नाव० C, G1, G2, J, K. 4 ०राज्ये B, सर्पे राज्ञे G1, G2, J. 5 त्रिशतस्तो० B, K. 6 नाहीनं साक्षादकार्षं C, G1, G2, J, K. 7 सन्धिकां B; ससंससं धिकंससंधिकं G1, G2; ससं-धिकां ससधिकां J. 8 सामकम० G1, G2, J. 9 द्वितीयायास्तृतीयायाश्च० C; ०तृती-यायाश्च० G1, G2, J. 10 ०क्षं तुरक्षरमु० G1, G2, J. 11 ०या उ० K. 12 वितारा प्र० G1, G2, J, K but K has its त struck off. 13 ह is wanting in B; वैतहव्यः स्तो० K. 14 इति० G1, G2, J. 15 हे G1, G2. 16 Wanting in B. 17 ०का षो० C; ०कंषो० G1, G2, J. 18 G1 repeats here lines 17–20. 19 C, G1, G2, J, K add अन्तस्थान् and read प्रति०. 20 G1, G2, J add वसषोडशिक (०का G2, J)ंससंधिक ंरात्रिं निर्मिमीते. 21 ०भ G1, G2, J. 22 ०राः C. 23 ०याः C, G1, G2, J, K.

एवमेताᳲ सषोडशिकाᳲ ससन्धिकाᳲ रात्रिं[1] निर्मिमीते ॥ १० ॥

ततः पृष्ठ्यं[2] ब्रूहीति ।

सवनेभ्यः पूर्वस्त्र्यहः षोडशिनश्चतुर्थᳲ रात्रेः पञ्चमᳲ सन्धेः षष्ठं पृष्ठ्यां[3]च्छन्दोमान्[4] ब्रूहीति ।

5 त्रिवृत्पञ्चदशयोः समासश्चतुर्विᳲशस्तत् सप्तमम्, सप्तदशत्रिणवयोश्च[5]तुश्चत्वारिᳲशस्तदष्टमम्, एकविᳲशत्रयस्त्रिᳲशाभ्यां नवमं[6]दशमे, सोऽष्टाचत्वारिᳲशं नवमे निधाय पञ्चदशषट्कानादत्ते ।

सर्वᳲ षोडशिनम्, ते सप्तत्रिᳲशत्तृचाः, तेषां चतुर्विᳲशतिमादाय[7] दशमस्याह्नोऽष्टावष्टौ पवमानं[8]स्थानेषु निदध्यात् ।

10 चतुराज्येषु तया पृष्ठे[9]ष्वेकम्, अग्निष्टोमसाम्नः स्थाने तथा सापराह्णे[10] ।

त्रयस्तृचा अतिशिष्यन्ते ।

तान् प्रथमस्याह्न उक्थस्तोत्रीयान् ब्रुवीत ।

एवं तदुक्थ्यादुक्थ्यमभिसंक्रामति ।

त्रिवृतं पञ्चदशम् ।

15 एतां[11] माहा[12]वृक्षीं सम्पद्[13]इत्याचक्षत आचार्याः ।

दशरात्रो महावृक्षस्तस्य ह्यग्रं[14] गत्वा स्वर्गमेन[15]मुपपद्यत इति ।

नैषा[16] सर्वस्मिन् दशरात्र उपपद्यत इत्यौपमन्यवः[17] ।

त्रयस्तृचा[18] अतिशिष्यन्ते ।

तानग्नि[19]ष्टोमसᳲस्थं[20] उक्थ्यस्तोत्रीयान्[21] ब्रुवीत ।

20 अपरान्[22]उपच्छन्दोमेष्वेव ।

एषा सम्पत् सिध्यतीति[23] ।

तदप्येवमिवं[24] ब्राह्मणं भवति—"हत ऐन्द्रोत इति होवाचाऽभिप्रतारी[25] कार्त्तसेनिः[26], ये महावृक्षस्याग्रं गच्छन्ति क ते ततो भवन्ति ।" इति

---

1 सन्नि G1; सन्नि G2; सन्निं J. 2 ०ष्ठं C, G1, G2, J, K. 3 ०ष्ठ्याश्छ० C, J; षष्ठ्याः छ० G1, G2. 4 ०मानं C, G1. G2, J, K. 5 ०योश्चत्वारिᳲशस्तद्दशमेम् G1, G2, J; ०तद्दशमे K. 6 ०मं द० B, K; ०मे द० G1, G2. 7 ०माहादा० G1, G2, J, K. 8 ०ने स्था० G1, G2. 9 वृष्टिष्वे० G1, G2, J, K. 10 ०तः C, J; ०त G1, G2. 11 एतीता G1, G2, J, K. 12 म० C, G1, G2, J, K. 13 पदी० G1, G2, J, K. 14 ह्यग्रं G1, G2, J. 15 ०र्गगम० C; स्वगम० G1, G2, J, K. 16 तेषा G1, G2, J; तेषां K. 17 ०पगनावाः G1, G2, J; ०पगमनावाः K. 18 ०च G1, G2. 19 तान् योऽग्नि० C, J, K; तान्यमिष्टो० G1; तान्यग्निष्टो G2. 20 ०स्थास्तो० G1, G2, J, K. 21 ०यानि B; ०त्रीन् G1, G2, J. 22 अपररूपं तच्छ० C; अपरूपं तच्छ० G1, G2, J, K. 23 ०ध्यवती० G1, G2, J. 24 ०मेव C, G1, G2, J. 25 ०रिणं B. 26 ०सेनिम् B.

षडहं महावृक्षमवोचत्। PB. 14. 1. 12.
तस्य ह्यग्रं गत्वा त्रिवृत्पञ्चदशयोः पक्षयोः क्रियां दर्शयति।
तदप्येवमिव ब्राह्मणं भवति—"त्रिवृत्पञ्चदशावेव स्तोमौ पक्षौ कृत्वा स्वर्गं[1] लोकं प्रयन्ति[2]।" इति। PB. 14. 1. 13.
5 तयोः समासश्चतुर्विंशः।
तस्याष्टाचत्वारिंशो द्वादशाशीति[3]शिष्यन्ते[4]।
तथा—दशमात् स चतुर्विंशो य एताः[5] सम्पदो[6] विदुः।
ते पक्षिणः[7] ये न[8] विदुस्तेऽपक्षाः।
तदप्येवमिव[9] ब्राह्मणं भवति—"ये वै विद्वांसस्ते पक्षिणो येऽविद्वांसस्तेऽपक्षाः" इति [10]तेऽपक्षा इति॥ ११॥ ibid.
10

[11]द्वितीयः पटलः

अथातो गवामयनम्।
तदेक एके[12]नाह्नाभिविदधति[13]।
"सर्वं[14] ज्योतिष्टोमेनैके[15]।" LS. 4. 5. 2.
15 "अतिरात्र[16]चतुर्विंश[17]नवाहव्रतातिरात्रः" इति कृत्वा ज्योतिष्टोमेनैव संस्तृणन्ति। LS. 4. 5. 3.
[18]अत्रैवैके गोआयुषी दशरा[19]त्रमित्युपा[20]हरन्ति।
एतं संवत्सरप्रबर्हं इत्याचक्षते। cp. LS. 4. 5. 4.
शङ्काहृतमिति च। cp. LS. 4. 5. 5.
20 एत[21]च्छातशूर्पो वार्षगण्य आसाञ्चक्रे।
नानाऽहोभिर्वयं कल्पयामः। cp. LS. 4. 5. 6.
यथैतद् ब्राह्मणम्—"अथ खलु य ऊर्ध्वं ज्योतिष्टोमदशाहाभ्याम्" यज्ञक्रतवः सप्तभिः पर्यायैस्ते[22]षु ज्योतिष्टोमानाञ्च दाशरात्रिका[23]णाञ्च द्रव्याणामागमो भवति।" Ārṣ. K. V. 34a.

---

1 °र्गो° G1, G2, J, K. 2 °यच्छन्ति G1, G2, J, K. 3 °शीति° G2. 4 C, G1, G2, J, K add ऽष्टमात्. 5 एते C, G1, G2, J, K. 6 °दौ C, G1, G2, J, K. 7 दक्षि° G1, G2, J, K. 8 B adds मात्. 9 °प्येव G1, G2, J, K. 10 C does not repeat ते…इति; K does not repeat ते. 11 In B only. 12 एतेना° J. 13 °धते C, G1, G2, J, K. 14 Wanting in C, G1, G2, J, K. 15 °मेनाथैके C, J, K; °मोनाके G1, G2. 16 °त्रि° G1, J. 17 °शे नवाहं व्र° B, J; °शतेनवाहं व्र° G1, G2; °शे नवाह° K. 18 °त्रैके C. 19 रात्र is wanting in J. 20 °पहर° B; °पर° G1, G2; °पार° J. 21 एतस्था सशूर्पो वार्कखण्ड आ° C; एतस्थात शूर्पो वार्कखण्ड आ° G1, G2, J, K. 22 °स्तेषां B. 23 °करणं च J.

"स्तोमान्वितानि स्थानान्वितानि पृष्ठान्वितानि तन्त्रान्वितानि भागान्वितानि संस्थान्वितानि आशीःसप्रायाणीति[1] रूपांच्छान्दसान्यायन्त्यपि[2][3] च व्यावृत्त्यर्थानि ।" Ars. K. V. 137a.

तत्रेह चतुर्विंशे यानि सप्तमात् स्तोमान्वितानि तानि ।
5 यानि [द्वितीयात्] स्थानान्वितानि तानि ।
यानि ज्योतिष्टोमात् पृष्ठान्वितानि तानि ।
[यानि] दशरात्रात् "सर्वाणि रूपाणि क्रियन्ते" इति तानि ।
PB. 4. 2. 14.

यानि छान्दसान्यभिभवन्ति प्रवन्ति स्वस्त्ययनप्रवादान्युपक्रमेऽभिरूपाणीति तानि ।
10
तत् खलु बृहत्पृष्ठमपि रथन्तरं माध्यन्दिनं कुर्म उपक्रमणीयमहरिति ।
रथन्तरं द्वितीयं[10] बृहद्ये[11] के चोभयसामान[12] इति ह स्माह शाण्डिल्यायनः ।
बृहत्पृष्ठास्ते रथन्तरमाध्यन्दिना आशयेनैव[13] ।
अपिच[14] स्वे सवने स्वे छन्दस्युभे वामदेव्योत्तरे भवत इति ।
15 चतुर्ऋचं होतुराज्यं समामनामः ।
तासां चतुर्थीमुद्धरति ।
उद्धर्ती[15] भवति ।
अपरूपा प्रायणार्थे ।
अथाप्येस्या[16]ं रणप्रवादो[17] भवति ।
20 अपरूपा स्वस्त्ययनार्थे ।
अथ यत्रैतत् सर्वस्वारे भवत्येतां[18] तत्र करोति ।
अथ खलु प्लवमन्वहं ब्राह्मणं सन्तमन्वहं[19] कुर्मः ।
एवं च रहस्यब्राह्मणं[20] दर्शयति ।
अपि शश्वद्ब्राह्मणमधीयते ।
25 ते वा एते प्लवातिप्लुता[21] ये प्लवमन्वहमुपयन्तीति ॥ १२ ॥

उद्धरन्त्याचार्याः—त्रैककुभं समानोदर्कयोनि ।
अपरूपं प्रायणार्थे ।

1 ०याणि B. 2. रूपाणिच्छा० B. 3 ०या० B. 4 ०मा G1, G2, J, K. 5 Wanting in B. 6 Wanting in B; ०या G1, G2, J, K. 7 Wanting in B. 8 ०तरमध्य G1, G2, J. 9 म० C, G1, G2, J, K. 10 ०यमिति C, G1, G2, J, K. 11 ०हदेके G1, G2. 12 चो is wanting in G1, G2, J. 13 कुशलेनैवम् C, G1, G2, J, K. 14 Wanting in C, G1, G2, J, K. 15 उद्धरत्युती G1, G2, J. 16 ०य्येतस्यां C, G1, G2, J, K. 17 ०स्यारंभेण प्र० B. 18 ०त्येकां B. 19 ०न्तमन्व० B. 20 ०णे C, G1, G2, J, K. 21 ०तिप्लुवा C.

तत्रैतत् सौभरं पृष्ठान्वितम् ।
विकल्पो[1] वा स्याद् ब्राह्मणचोदितत्वात् ।
"अथ[2] खल्वाहु[3]—'सर्वाणि रूपाणि क्रियन्ते' इति । PB. 4. 2. 14.
तत्रा[4]चार्या एतेष्वेव[5] द्रव्ये[6]षु सर्वान् स्तोमान् सर्वाणि[7][8] पृष्ठानि सर्वा[9]
5 विभक्ती[10]श्च दशरात्र[11]रूपाणीति भक्ति[12]मात्रेणैव कल्पयन्ते ।
त्रिवृत्पञ्चदशौ चतुर्विंशः[13] सम्पद्यते[14] ।" Sāy. ibid.
पञ्चदशसप्तदशान् पञ्चैकविंशान् षडेव त्रिणवान् षट् त्रयस्त्रिंशान्
सर्वाणि पृष्ठानि बृहद्रथन्तराभ्यामुपाप्तानि ।
एतत्परोक्षा[15]णि हीर्ता[16]राणि, वामदेव्येन वैतस्माद्विसृष्टानि, उद्वंशीयेन वा ।
10 एतद्धि सर्वेषां रूपमिति ।
अनिरुक्तौ[17] विभक्त्य[18]यः ।
निरुक्तं[19] सर्वाभिप्रा[20]यम्, वामदेव्येन स्वरविभक्तिः[21] ।
पृथक् दाशरात्रि[22]केभ्यो द्रव्यागमं सम्पश्येत् ।
उपवती[23] प्रथमात्, अग्रियवती द्वितीयात्, दविद्युतवती[24] तृतीयात्,
15 सत्रासाहीयं सस्तोत्रीयं चतुर्थात् ।
अथ खलु साकमश्वमुकथप्रणयेऽकरिष्यत् ।
अतिरात्रे तत्कृतं भवति ।
तन्न समविचारयिषीत् ।
तत्रैतत् सत्रासाहीयं त्र्यहोपक्रमादुपक्रमेत्[25] ।
20 बार्हतीाद्[26] बार्हते ।
सोढवतीषु सोढवन्नामः[27] ।
अथेदं कर्म सद्देमहीति पार्थं पञ्चमात्[28] ।
उद्वंशीयं षष्ठात् ।
25 "यद्वा उद्वंशीयं तदुद्वंशपुत्रः ।" इति हि[29] भवतीति । PB. 13. 12. 10.
उद्वंशीयेनैव सर्वरू[30]पावाप्तिमेके ।

1 ॰स्माद् C. 2 अथो S. 3 ॰हुः S. 4 तत्र is wanting in S; C, G1, G2, J, K add खलु after तत्र. 5 ॰र्येः G1, G2, J, K. 6 ॰व्येव G1, G2, J. 7 Wanting in C. 8 सर्वापि G1, G2, J. 9 सर्वाणि G1, G2, J, K. 10 ॰क्तीदर्श॰ C; ॰क्तीदशदश॰ G1, G2, J; ॰क्तीनि K. 11 ॰त्रि॰ G1, G2. 12 विभ॰ S. 13 ॰शं स॰ C, G1, G2, J, K. 14 सम्पा॰ S. 15 ॰क्षणी G1, G2, J. 16 हि॰ G1, G2, J. 17 ॰क्ताया C. 18 Wanting in C. 19 C adds विभक्तं. 20 ॰णिप्रायं G1, G2, J, K. 21 ॰रभ॰ B. 22 द्वाद॰ B. 23 ॰वीती J. 24 ॰श्रुती B; ॰श्रुतती K. 25 ॰मे B, G1, G2, J, K. 26 बार्हतमिताद् B. 27 ॰न्नमः G1, G2. 28 ॰नम् B. 29 हे G1, G2, J. 30 सर्वारू॰ G1, G2, J.

बहु सप्तमात् ।

१ २ ३ १ २र ३ १
“इन्द्रो अग्ना नमो बृहत्” SV. 2. 150; RV. 8. 12. 15; PB. 11. 7. 3; 14. 8. 2.

इत्यष्टमात् ।

समन्तदैर्घश्रवसे नवमात् ।

5 अभीवर्तः सस्तोत्रीयो दशमात् ॥ १२ ॥

अथ पञ्चमः प्रपाठकः[1]

अथैषोऽभिप्लवः[2]।
तस्मिन् सारण्ये गेयं[3] छन्दः कृतं बभूवेति शाण्डिल्यः।
अर्द्धमेव प्राग् विषुवतोऽर्द्धमूर्ध्वꣳ सादित्यव्रतानि शुक्रियाणि विषुवतीति[4],
"सतवःश्यावीयानि सामानि व्रत इति" समूहति। Ārṣ. K.V. 50a.
5 बार्हद्रथन्तरपृष्ठ्यादनित्याभिरनित्योऽयं षडह[5] इति।
अषाडहिकीरनित्या इत्याचक्षते।
[ते[6]] खलु शश्वद्भाल्लविनः स्तोत्रियात् प्रतिपदः कुर्वन्ति, यथास्थानमेवानुरूपान्।
अनुरूपान्[7] वयं प्रतिपदः[8] कुर्मः, स्तोत्रीयानुरूपान्।
10 एवं यथोत्तरꣳ[9] स्तोत्रीयानुरूपाणां प्रत्याहारो भविष्यतीति[10]।
षडहवशेन नाना[11]प्रतिपदः समानं पर्यासम्[12], एकाहवशेन तेन प्रच्युतं द्वितीयपर्यासं प्रथमेऽहन्यनुगृह्णाति।
अथैतान्येव[13] वैयूहिकान्या[14]ज्यान्युद्धृत्य गायत्राणि तद्विभक्तीनि प्रतिनिदधाति।
15 त्रीणि त्रिणिधनानि[15] करोति।
त्रीणि[16] ह्येव षडहेऽवधारितत्रिणिधनानि भवन्ति।
तानि यत्र यथाकृतमभ्यस्यति[17]।
आयास्यं प्रायश्चित्तिसाम षष्ठेऽहनि चिकीर्षन् पार्थं द्वितीयस्य माध्यन्दिनं[18] करोति।

---

1 In C only. 2 ॰वा: G1, G2, J, K. 3 गेहे G1, G2; गेहं J, K. 4 ॰वती B; ॰वति C, K. 5 ॰षडह इति is wanting in B. 6 Wanting in B. 7 Wanting in G1, G2, K. 8 ॰पदुपकुर्मः B. 9 यथान्तरꣳ B. 10 भवतीति C, J. 11 नाना wanting in G1, G2. 12 ॰र्याहम् G1, G2, J. 13 ॰तानेव G1, G2, J. 14 ॰यिका॰ C, G1, G2, J, K. 15 त्रीणि अयनानि B; निधनानि॰K. 16 C repeats त्रीणि. 17 ॰स्यन्म् G1, G2, J. 18 ॰न्दिनान्त्यं C, K; ॰न्दिनांहं G1, G2; ॰न्दिनांन्यं J.

"एतत् पुरस्तात् स्तोभं तत्रसाम बृहति पृष्ठे[1]ऽभिरूपम्", तेन प्रच्युत[2]-मिहैव[3]ब्रह्मासिष्ठं[4] षष्ठेऽहन्यनुगृह्णाति स्वरविभक्तेरनुग्रहाय ॥ १ ॥ Ārṣ. K. V. 37 b.

अथैते त्वाष्ट्रीसाम चान्धीगवं च तृतीयचतुर्थयोरह्नोर्व्यतिहरति त्र्यहयो-
5 र्व्यतिषङ्गाय ।

[तत्र[5]] ता एव देवताविभक्तयः ।

अथ सामान्तविभक्तयः ।

एतेषामेव[6] द्रव्याणां तल्लिङ्गाः कल्पयेत ।

पञ्चमे तु निधनविभक्तिर्न विद्यते ।

10 षष्ठे[7] चेडाविभक्तिः ।

तत्राभ्यावारयन्ति—

बार्हद्गिरं वानुकल्पयेत्, सौश्रवसं वा ।

उक्थानां ब्रह्मसाम कुर्यात् ।

गोष्ठं षष्ठे तु कल्पयेदिति ।

15 तस्य त्रिकद्रुकाः स्तोमाः, षाडहिकानि तन्त्राणि ।

अस्ति हि[8] षडहप्रवादः ।

अपि चैवं [9]रहस्यब्राह्मणे दर्शयति—ज्योतिष्प्रायणो ज्योतिरुदयनः षड-ह्नोऽभिप्लव[10] इति चैतरेयिणाम् ।

ताँस्तु[11] यदेवं प्रयुङ्क्ते, एवं ज्योतिष्प्रायणो ज्योतिरुदयनः षडहो भवति,
20 यथास्थानमितरा[12]विति ।

तत्र यान्यैकाहिकानि द्रव्याणि स्तोमा[13]नि तानि ।

[यानि षाडहिकानि तन्त्रान्वितानि ता[14]नि ।][15]

यानि छा[16]न्दोमिकानि त्रयान्तानि ।

त्रयँ[17]स्ते त्रय इमे लोकसम्मा[18]स्ते लोकसम्मा[19] इमे बृहद्रथन्तरपृष्ठास्ते
25 बृहद्रथन्तरपृष्ठा इमे[20] इति ।

रूपा[21]च्छा[22]न्दसान्यायन्त्यपि च व्यावृत्त्यर्थानि[23] ।

---

1 षष्ठे° B; षष्ठभिरूप G1, G2; षष्ठिभि° J. 2 प्रत्युत° G1, G2, J, K. 3 °मिव° G1, G2, J. 4 ष्ये च° J. 5 Wanting in B. 6 एष तेषा° G1, G2, J, K. 7 पृष्ठे B. 8 च C, G1, G2, J, K. 9 इरस्स° G1, G2, J. 10 G1, G2, J omit ऽभिप्लव ··· षडहो (line 19). 11 ताँस्तुमदे° C; K adds न. 12 °मितरदिति C; °मिराविति G1, G2, J. 13 °मान्वितानि C, G1, G2, J. 14 Wanting in G1, G2. 15 Wanting in B. 16 छन्दो° C, G1, G2, J, K. 17 य° B. 18 Wanting in G1. 19 °सम्मास्त C, G1, G2, J. 20 इमा C. 21 K repeats रूपा. 22 °छान्दस्यान्या° C; °छन्द° G1, G2, J, K. 23 G1, G2, J, K add च.

स्वादिष्ठां[1] प्रथमस्याह्न आर्भवीयां[2] करोति ।
या ह्येतस्या[3]र्भवीया भवति न तस्या उत्तरेऽधीमहे ।
तस्याः शश्वन्माषशरावय उत्तरेऽधीयते ।
तां[4] ते कुर्वन्ति, आभीशवं चतुर्थे ।
5 नावमिकं कुर्यादिति धानञ्जय्यः ।
व्यावृत्तये पृष्ठ्याभिप्लवयोश्चातुर्थिकमेवेति गौतमः ।
एषै[5]तस्याह्नः स्वरविभक्तिर्भवतीति भवतीति[6] ॥ २ ॥

तृतीयः[7] पटलः

" 'अभीवर्त्तो ब्रह्मसाम' इति । PB. 4. 3. 1; 18. 6. 14.
10 तस्य स्तोत्रीयविधिः—'यदितः[8] समानꣳ साम भवत्यन्योन्यः प्रगाथः' इत्यत्यन्तनानात्वम् । PB. 4. 3. 8.
'य आस्तुतं कुर्वते यथा दुग्धामुपसीदेदेवं तत्' इति प्रयुक्तप्रतिषेधः । PB. 4. 3. 11.
तस्यान्ववायः—
15 'पञ्चसु माःसु बार्हताः प्रगाथा[9] आप्यन्ते' इति ।" PB. 4. 4. 1; LŚ. 10. 6. 1; Kalp. 1. 7.
अथातः प्रगाथायनानि[10]—
"चतुःशतमैन्द्राः बार्हताः प्रगाथाः, दशतयीषु[11]" तान् समामनामः[12] ।
LŚ. 10. 6. 3. Kalp. 1. 7;
20 " 'तेषां चत्वारोऽन्यत्रस्थाना[13] बृहद्रथन्तरकालेयस्तोत्रीया अहरहः शस्यन्ते[14] ।'
cp. LŚ. 10. 6. 4.
इन्द्रक्रतुरौत्तरपक्षिकः ।
शतमतिशिष्यते[15] ।
'तेषामेकं चतुर्विꣳशे कुर्यात् ।' LŚ. 10. 6. 5
25 नूनꣳ[16] शतमतिशिष्यते[17] ।
सप्ताशीतिः सतोबृहत्यः ।
ते 'एकोनत्रिꣳशत्[18] सातोबार्हतास्तृचाः[19] ।' LŚ. 10. 6. 6.

---

1 स्वनिष्ठां J. 2 अर्भवीयं G1, G2, J. 3 ॰स्याह्न आर्भ॰ C, G2, J, K; ॰तस्याह्न अर्भ॰ G1. 4 नान्ते कु॰ G1, G2, J, K. 5 एवैत॰ C. 6 Wanting in G1, G2, J. 7 In B only. 8 ॰दितिः J. 9 Omitted by C. 10 ॰यतानि C. 11 दा॰ B. 12 समामनेत् C; समामेन G1, J; समामने G2, K. 13 ॰स्थानाद् B. 14 शतस्य G1, G2, J; स्य K. 15 ॰न्ते J, K. 16 न्यूनꣳ B, K. 17 समति॰ B; शतमिति॰ G1, G2, J. 18 एकेन न त्रि॰ C, G1, G2, J. 19 श्लोकोबा॰ B.

तेषामिहैकविंशतिमाहरति ।
तद्विंशतिशतं सम्पद्यते ।
'विंशतिशतं पञ्चानां मासानामाभिप्लविकान्यहानि भवन्ति ।' cp. LŚ. 10. 6. 8.

5 तेष्वेतान् प्रगाथान् प्रयुञ्जीत ।
'तृतीये[3] तृतीयेऽहनि सतोबृहतीः कुर्वन् य एष पञ्चमस्य मासस्योत्तमोऽभिप्लवस्तस्मिन् द्वे[4] सतोबृहती कुर्यात् ।'" cp. LŚ. 10. 6. 7, 8. Kalp. 1. 7.
तृतीयपञ्चमयोरह्नोर्न हि प्रगाथा अनुभवन्तीति ।
10 ततॅ[5] ऊर्ध्वे छन्दसी संयुज्यात् ।
"औष्णिहे तृच एकां गायत्रीमुपदध्यात् ।" cp. LŚ. 10. 6. 9.
सतोबृहत्यतिशेषं समाप्येत्येव[6] गौतमः ।
"अष्टौ सातोबार्हतास्तृचा अतिशिष्यन्ते[7], तान् प्रथमे चाभिप्लवे कृत्वा द्वितीयस्य च[8] द्व्यह्ने तत ऊर्ध्वे छन्दसी[9] संयुज्यादिति ।" cp.
15 LŚ. 10. 6. 10
" 'चतुरुत्तरैरेव छन्दोभिरेतव्यम्' इति । PB. 4. 4. 5; LŚ. 10. 6. 12.
'गायत्र्यां चतुर्विंशेऽभीवर्त्तं कुर्यात् ।
उष्णिहि प्रथम आभिप्लविके, अनुष्टुभि द्वितीये ।' cp. LŚ. 10. 6. 12.
तत ऊर्ध्वे बृहत्या पञ्च मास इत्वा य एष पञ्चमस्य मासस्योत्तमोऽ-
20 भिप्लवस्तस्य 'पञ्चमेऽहनि पङ्क्तीः कुर्यात्, अपि वा षष्ठे, तत ऊर्ध्वे त्रिष्टुभ्युत्तमे स्वरसाम्नि जगत्यामिति ।' cp. LŚ. 10. 6. 13, 14, 16.
अत्रापि संतोबृहत्यतिशेषं[10] समाप्येत्येवं[11] गौतमः ।
'नव सातोबार्हतास्तृचा अतिशिष्यन्ते, द्वौ च प्रगाथौ' तान् प्रथमे चाभिप्लवे[12] कृत्वा द्वितीयस्य पञ्चाहे[13] पङ्क्तीः" षष्ठे वा[14], तत ऊर्ध्वे
25 त्रिष्टुभ्युत्तमे स्वरसाम्नि जगत्यामिति ॥ ३ ॥ cp. LŚ. 10. 6. 17; Kalp. 1. 7.

---

1 ०शतंस० G1. 2 ०प्ला० B. 3 Wanting in B, C. 4 द्वयोः B; द्वयी G1, G2, J; द्वयीः K. 5 Wanting in G1, G2. 6 ०माप्येति C; समायाति G1, G2, J; समायोति K. 7 ०ते G1, G2, J. 8 Wanting in C. 9 ०सि B 10 सातो० C, G1, G2, J. 11 ०वं G1, G2, J. 12 ०वा G1, G2, J, K. 13 पञ्चमे K. 14 Wanting in C, G1, G2, J, K.

“छन्दःसंयोग[1]रूपोऽध्यविधि[2]स्तत्स्थाने चातुरुत्तर्यम्।
मासशब्दवैयर्थ्यमिति चेत् ‘पञ्चसु[3] माःसु[4]’ इति यथा पृष्ठ्यायनो[5]ऽपवादस्त[6]-
ल्लिङ्गेन · दद्राण[7]वँतीवन्न च मासान्तर[8] एतत् कर्मास्तीति। PB. 4. 4. 1.

5 एकदेशे यथा कालकृतौ[9] लोके कृतमिति।
‘बृहत्या चैव त्रिष्टुभा चैतव्यम् इति।’ ” PB. 4. 4. 8; Kalp. 1. 8.
“त्रिष्टुभि चतुर्विंशेऽभीवर्त्तं[10] कुर्यात्।
बृहत्यां प्रथम आभिप्लविके[11] त्रिष्टुभि द्वितीये।
एवमनुपूर्वं[12] छन्दसोः प्रयोगो भवतीति।
10 तत्[13] ऊर्ध्वं व्यत्यस्येद्।” Say. PB. 4. 4. 10.
बृहतीत्रय एव तन्मन्य इति शौचिवृक्षिः।
बृहत्या पञ्च मास इत्वा थ एते “अष्टौ सातोबार्हतास्तृचाः” अतिशिष्यन्ते,
ये चैते त्रयोऽन्यत्रस्थानो[14] बृहद्रथन्तरकालेय[15]स्तोत्रीयास्तैः षष्ठे मासि त्रिष्टुभो[16] व्यत्यस्येत्। Kalp. 1. 7.
15 यदहः कालेयस्यं[17] स्तोत्रीयेऽभीवर्त्तं कुर्यात्।
‘तरणिरित्सिषासति’ इति। SV. 1. 238; 2. 217; RV. 7. 32. 20; PB. 12. 4. 4.
कालेयमा[18]सञ्चारात्।
यदहो[19] रथन्तरस्य बृहत्[20]स्तोत्रीये रथन्तरं स्यात्।
20 अपि वा स्वरसाम्नोरन्यतरस्मिन् रथन्तरस्तोत्रीयं[21] कुर्यात्।
अत्र ह्यन्यासु रथन्तरं भवतीति।
अथ त्रयस्त्रिंशत् प्रगाथाः[22]।
तेषामेकं चतुर्विंशे कुर्यात्।
सातोबार्हतं त्रयस्त्रिंशायने[23]ऽभिप्रयुञ्जीत।

---

1 ०ग आपो० B; ०गं रू० G1, G2, K. 2 ०वियेत० B. 3 पञ्च B. 4 मासा इति B; मांस्स्त्विति G1, G2, J; मांस्त्विति K. 5 ०पृष्ठयेय० B, G1, G2, J. 6 ०स्तु लिङ्गेन C, J, K; स्तु लिङ्गे G1, G2. 7 दद्राणत्त B; रुद्राण० G1. 8 समान्तरये तत् क० C; मासान्तरये तत् क० G1, G2, J, K. 9 अकाल० B. 10 G1, G2, J omit अभीवर्त्त ··· कुर्यात्. 11 C, K add ऽपि च (वा K) बृहत्यामेव चतुर्विंशे बृहत्यां प्रथम आभिप्लविके. 12 ०र्वेछ० B, G1, G2, J. 13 G1, G2, J, K add ते. 14 ०नाद् B. 15 ०कालेये स्तो० G1, G2, J. 16 त्रैष्टुभो C. 17 ०यः G1, G2, J. 18 ०यं स० B; ०यमसं० K. 19 ०हा G1, G2, J, K. 20 वृक्षस्तो० G1, G2, J. 21 ०या G1, G2, J but G2 corrects it. 22 ०यमेकं च० C, G1, G2, J, K. 23 ०शानयने B.

अपि वा न सतोबृहतीराद्रियेत, य एव चतुर्विंꣳशे तमनुसꣳहरेदिति ॥ ४ ॥

एतेनैवोत्तराणि [द्व्योणि] व्याख्यातानि ।[1][2]

आ द्विप्रगाथाद्[3] यार्थाकामी[4] पुरस्तात् प्रगाथानां[5] स्यात्, तथोपरिष्टादिन्द्र-
5 क्रतौ सामानि प्रकल्पयेत्[6] ।

तावन्ति तच्छन्दस्यानि[7] निधनवन्ति[8] ।

यदि तच्छन्दस्यानि न विद्येरन्नपि वैछन्दसानि[9] कुर्याद् यान्यभिरूपाणि स्युर्गीतितश्च निधनंतश्च[10] ।

कतम एषां कल्प इति ।

10 प्रथमौ प्रतिषिद्धावित्याहुः[11] ।

अथेतरे सर्वे[12] कल्पाः ।

अपि वा द्विप्रगाथमेव कल्पः स्याद् ।

दोषदर्शी नूनं पूर्वानित्यक्रमीदिति[13] ।

ते कस्य हेतोः ।

15 षट्प्रगाथमयनꣳ समारप्स्यन्तीति ।

नेदꣳ षट्प्रगार्थमिति[14] शाण्डिल्यायनः ।

यः षट्प्रगाथं चिकीर्षेन्न सतोबृहतीराद्रियेत ।

य[15] एवं[16] चतुर्विंꣳशे तमनुसꣳहरेदिति ।

स खल्वयमभीवर्त्तः[17] षट्प्रगाथानधितिष्ठति[18] ।

20 पूर्वस्मिन् पत्तसि[19] द्वयोश्च सतोबृहतीः[19] ।

एवमेवेन्द्रक्रतूत्तरे[20] पञ्च प्रगाथिकानि, द्वे सातोबार्हते[21], विकर्णमष्टमम् ।

एवमनयोः समाधिरिति ।

अथैतत् सुज्ञानमौष्णिहमाविषुवतः सर्वत्र पृष्ठ्यपञ्चाहवर्जम्[22], अतिरात्राश्च[23] यथाकामकल्प्यत्वादेतेषामह्नामिति[24] ।

25 एतदभिप्लवस्य राथन्तरेष्वहस्सु[25] विचार्यते ।

---

1 G1, G2, J add ओं. 2 Wanting in B. 3 G1 omits द् ... प्रगाथानां. 4 यथाकारी C, G2, J, K. 5 ०थान्स्यात् C, J, K. 6 प्रतिकल्प० C, G1, G2, J, K. 7 छन्द० G1, G2; न छन्द० J. 8 निधनवन्ति ... ०स्यानि wanting in G1, G2. 9 C, G1, G2, J, K omit वै. 10 ०नंत० G1, G2, J, K. 11 ०षिध्या० G1, G2. 12 सर्व G1, G2, J. 13 पूर्वान्यत्य० K. 14 ०था० G1, G2, J. K. 15 B adds अपि वा. 16 एत G1, G2, J. 17 ०भि० G1, G2. 18 ०सिद्धेश्च C, G1, G2, J, K. 19 ततोबृहतीम् B. 20 ०क्रतुरुत्तरे C, G1, G2, J, K. 21 सतो० C. 22 ०वर्ज्यम् B; ०वर्ज G1, G2. 23 ०चायथा० C, G1, G2, J. 24 ०ह्नां तदभि० C, G1, G2, J, K. 25 ०रेष्वह० G1, G2, J.

पृष्ठे[1] चैवमिव[2] षडहे नानास्वस्त्ययनानि[3] भवन्तीति[4] ।
"पृष्ठ्यमेवं छिन्दन् व्यूहेत् समूहेदिति ।
व्यूढः स्यादिति शाण्डिल्यायनः ।" Ārṣ. K. V. 108 b.
एवमस्यर्षिदर्शनं भवति ।
5 अथाप्येवं[5] पुराणमाचार्यवचं[7] इति ।
समूढः स्यादिति धानञ्जय्यः ।
एष न्यायः ।
एवꣳ हि ज्योतिष्टोमः, एवं दशरात्रस्य प्रथमस्त्र्यहः, एवं दशमम्,
एवमहीनैकाहा इति ।
10 अथापि समूढ एव पूर्वमुत्पन्नोऽपरो व्यूढः ।
एवꣳ हि रहस्यब्राह्मणे दर्शयति, एवमिव ब्राह्मणं भवति, छन्दाꣳसि वा ।
अन्योन्यस्य लोकमभ्यध्यायन्नित्युत्पन्नस्य लोको[8] नाम भवति ॥ ५ ॥
अथापि विलुप्तो व्यूहः[9] ।
षडहेन हि त्रिष्टुभः प्रतिपत्तां[10] भजन्ते[11] न जगत्यो माध्यन्दिनान्तान्न[12]
15 गायत्र्य आर्भवान्तान् ।
यत्रैवं[13] खल्वेतच्छन्दाꣳसि विप्रच्युत्य दशमेऽहनि सम्प्रकल्पन्ते तत एव
व्यूहः सिध्यतीति ।
"तदप्येवमिव ब्राह्मणं भवति—'नर्ते छन्दोमेभ्य पृष्ठो व्यूहमानशः'
इति ।" Sāy. PB. 23. 1. 5.
20 अथापि समूढेन षडहेन सम्प्रयुक्तो भवतीति ।
तस्यैके प्लवद् बहिष्पवमानं कुर्वन्ति ।
न ह्येता व्यूहकारिता इति ।
नवाहयोगा इमा भवन्तीति धानञ्जय्यः ।
कथमसमापयिष्यन्नवाहं नवाहयोगैः[14] कुर्यादिति ।
25 तत्र नित्यावुपवत्ताविमावभिप्लवन्यायेन[15], पार्थं द्वितीयस्य माध्यन्दिनान्त्यम-
भिप्लवन्यायेन[16], नित्याभिः समूहति—नित्योऽयं षडह इति ।
तत्र तान्येव सामूहिकानि यान्यभिप्लवे[17] ।
जनित्रमेवैतदन्यत्[18] ।

1 षष्ठे G1, G2, J, K. 2 चैव० C. 3 ०स्वर्णिधनानि C, G1, G2, J, K. 4 भविष्यन्तीति C, G1, G2, J, K. 5 ०मपि B. 6 व्यूहः K. 7 ०वचत B. 8 लोकानां भ० B. 9 व्यूढः C. 10 ०न्नां C, G1, G2, J, K. 11 लभते C; लभन्ते G1, G2, J, K. 12 मध्यमं दिनान्ता न B. 13 ०वं C, G1, G2, J. 14 ०गात् B. 15 नित्यावुपपन्नौ कविमानभि० C; नित्यावुपवल्लोकविमानभि० G1, G2, J, K. 16 ०ये B. 17 ०न्या० B. 18 जनित्राण्येवमे० C; जनित्रामेवैदन्य G1, G2, J.

तदेतत्[1] स्वयो[2]निका[3]माः कारयन्तीति ।
कथं पृष्ठ्ये[4]ऽभीव[5]र्त्त इति[6] ।
अकर्तव्य इति शौचिवृक्षिः ।
"पञ्चसु माःसु बार्हताः प्रगाथा आप्यन्ते" इति[7] । PB. 4. 4. 13; LS. 10. 6. 1.
5
अन्यतः[8] पृष्ठ्यादेवैषाप्तिः सिध्यतीति ।
कर्तव्य इति गौतमः ।
यत् सामावसृजेयुरवस्वर्गाल्लोकात् पद्येरन्निति हि भवतीति ।
पृष्ठ्ये वाऽस्यैतत् सतोऽवादीत्[9] ।
10 नह्येनं केचनाभिप्लवाच्च्यावयन्तीति ।
तत्र[10] बृहतीषु कालेयं[11] द्वितीयमनुकल्पयामः ।
सन्तानरूपमस्मिन् भवतीति ।
कथमभिजितीति ।
अकर्तव्य इति शौचिवृक्षिः ।
15 कर्तव्य इत्येव गौतमः ।
तत् पृष्ठ्येनैव व्याख्यातम् ।
अथाप्येष एवं क्लृप्त एवैको[12]ह आगच्छत्यभीवर्त्तमध्यन्दिन इत्यभीवर्त्त-मध्यन्दिन इति ॥ ६ ॥

चतुर्थः[13] पटलः

20 अथैते स्वरसामानः ।
तानग्निष्टोमा[14]ना[15]हे ।
नवाहकारिणः कुर्युरु[16]क्थान् एकविंशत्यह[17]ःकारिणः ।
योऽन्यथा कुर्यादकुशलः पुरुष इति विद्यात् ।
अथैषां[18] बृह[19]त्स्तोत्रीया आनुष्टुभा एकबृहतीकाः ।
25 अनुष्टुभौ पूर्वे राथन्त[20]रीयौ बृहत्युत्तमे[21] ।
एतदेव विपरीतम् ।

---

1 तदू० G1, G2, J. 2 सयो० B. 3 ०कामः कारयतीति C, G1, G2, J, K. 4 पृष्ठे० C, G1, G2, J, K. 5 ०र्त्ते B. 6 G1, G2, J omit इति। अकर्त. 7 इत् G1, G2, J. 8 एते C; प्रते G1; पृते G2, J, K. 9 ०दीह्येनं केन च ना० B. 10 तं खलु C, G1, G2, J, K. 11 कालेय C, J, K; काले G1, G2. 12 एवैतकदाह G1, G2; एवैतदाह K. 13 In B only. 14 ०ग्निहोमा० B; ०मान् J. 15 ०नह B, G1, G2. 16 कुरुक्थान् G1, G2, J; ०क्थ्यान् K. 17 ०हका० C, G1, G2, J, K. 18 ०थैतां J, K. 19 पृष्ठन्तोत्री० C; पृष्ठस्तो० G1, G2, J, K. 20 ०रयोर्बृ० C, G1, G2, J, K. 21 ०मेति C, G1, G2, J.

द्वितीये चतुर्[1]र्चं तृतीयस्य भवति ।
तासां तृतीयामुद्धृत्य चतुर्थीं[2] तृतीयां[3] कुर्मः ।
एषा बृहती भवति[4] ।
अथ यत्रास्तु षोडशी[5] साम भवति सर्वास्तत्रानुष्टुभो भवन्ति ।
5 तत्र[6] खलु बृहद्रथन्तरे[7] करोति, स्वराणामेव पृष्ठत्वे तिष्ठमानैः[8] ।
अथ स्वराणि[9] ।
आनुष्टुभान्यनुष्टुप्स्विति ।
तत्र यान्येकाहिकानि द्रव्याणि पृष्ठान्वितानि तानि[10] ।
यानि षाडहिकानि तन्त्रान्वितानि तानि[11] ।
10 यानि छा[12]न्दोमिकान्यभिप्लव एव तानि व्याख्यातानि ।
क्षु[13]ल्लकवैष्टम्भं प्रथमेऽहनि करोति ।
दि[14]गनुग्रहायाऽदिक्कमत्र स्वरं भवति ।
तेन प्रच्युत[15]ं सꣳहितं तृतीयेऽहन्यनुगृह्णाति ।
प[16]क्षयोः सन्तानाय विकल्पयन्ति, अनुष्टुभो मध्ये निधना[17]न्यैडान्या[18]जिघृ-
15 क्षन्तः ।
स खलु विकल्पयन् स्वा[19]राण्यन्त्यानि कुर्यादविकल्प[20]यन्नैडानि ।
विकल्पयन्तश्चो[21]त हैके विकल्पयन्तश्चैडान्येव कुर्वन्ति ।
तृतीयसवनच्छात्रेण विकल्पयꣳस्त्वेव स्वाराण्यन्त्या[22]नि कुर्यादविकल्पय-
न्नैडा[23]नि ।
20 वसिष्ठस्य प्रियं चतुर्थाद् याथा[24]तथ्यात् प्रत्याहरति ।
तैरश्च्यं[25] वेति[26] विचारयन्ति ।
उद्वꣳशीया[27]र्थमिहानुगृह्णाति ।
आमहीयवं द्वितीयात्प्रच्युतं तृतीयेऽहन्यनुगृह्णाति ।
ए[28]तत् स्वयोनि भवतीति ॥ ७ ॥

---

1 ०र्चस्तृ० B. 2 G1, G2, J, K add तु. 3 ०या कु० J. 4 भवतीति G1, G2, J, K. 5 ०शिन G1, G2, J; ०शिनं K. 6 यत्र J, K. 7 C adds ते. 8 ०ने G1, G2, J. 9 B adds अनुष्टुप्सु; K adds आनुष्टुप्सु. 10 Wanting in G1, G2, J. 11 Wanting in G1, G2, J. 12 छन्दो० B, C, G1, G2, J. 13 कल्यकवै० B; क्षल्लकवे(०वै J)ष्टभं G1, G2, J. 14 ०ग्रहायादिक्तमत्र C; गनुग्रहाया ऽदिक० G1, G2. 15 ०तꣳ हि तं C. 16 ०क्षसोः C. 17 निधना is wanting in G1, G2, J. 18 ०न्यजिघृक्ष० G1; ०न्यजि० G2, J, K. 19 स्वराण्यन्तानि B. 20 G1, G2 omit विकल्पयनैडानि. 21 ०श्चो B. 22 ०न्त्या G1, G2, J. 23 ०यन्नैडानि C, G1, G2. 24 याथान्तर्यात् C, G1, G2, J, K. 25 ०श्चं B. 26 वैति B. 27 ०शीयपाथमि० C, G1, G2, J, K. 28 अत्र C, G1, G2, J, K.

अथैष विषुवान्—
तत्र खलु बृहद्रथन्तरे करोति शुक्रियाणामेव पृष्ठत्वे तिष्ठमानः।
अथापि स्वर्गोक्तो विषुवान्, तत्र[1] स्वर्गोक्ते बृहद्रथन्तरे अचिकीर्षीत्[2]।
ते[3] यत् पवमानयोर्निर्दधात्येतदेनयोरपयतोः स्थानं भवति।
5 ते यद् बृहत्यां चानुष्टुभि[4] चैतौ नेदिष्ठिनौ[6] चातुष्पदावावापाविति।
तत्र खलु गोस्तन्त्रं करोति।
एतदन्ततन्त्रतरम्।
अन्तविधोयं[7] भवति मध्यचरः[8]।
तत्र यान्यन्तलक्षणानि मध्यलक्षणानि[9] ज्योतिर्विधानि शान्तिविधानि[10]
10 शुक्रियसदृशान्यभिरूपाणि तानि।
अथ[11] खल्वत्रानुष्टुभः प्रतिपदः करोति।
यथैतद् ब्राह्मणम्—उपवर्ती[12] वयं परमेऽहनि परमां प्रतिपदं कुर्मः।
यान्यन्यानि बृहद्रथन्तराभ्यां पृष्ठानीति ह स्माह शाण्डिल्यायनः।
उपवत्येव तेषां कुशलेनोपोह्येव तानि बृहद्रथन्तरे इति।
15 अथाप्यात्मोक्तो विषुवान्, तं प्राणोक्तया गायत्र्या प्रत्यपित्सीद्[13], दान्तोऽ-
नादान्तामिति वा।
'वातं[14] आ वातु' इति मौषशरावयः। SV. 1. 184; 2. 1190; RV. 10. 186. 1; LŚ. 4. 6. 21.
'अग्निरिन्द्राय पवते' इति शुङ्गाः। cp. SV. 2. 1175; LŚ. 4. 6. 20.
20 तस्या उत्तरे उपवती[16] चाग्नियवती च[17]।
तत्रैके नाभीवर्त्तं कुर्वन्ति।
पौर्वपक्षिकोऽयं भवति।
अथाप्येवं[18] सुज्ञानेन समाधिरिति।
मध्यन्दिने वयं कुर्मः।
25 एवमिवं[15] ब्राह्मणं भवति—"तावुभौ विषुवति कार्यौ" इति। PB. 4. 7. 1.
यद्वेतत् सुज्ञानेज समाधिरिति, आर्भवचरं तद्भवति।

---

1 तत B. 2 ०कीर्णीत् G1, G2, J, K. 3 ये G1, G2, J, K. 4 ०ष्योः स्था० K. 5 ०भी G1, G2, J, K. 6 ०ष्टेनौ G1, G2, J. 7 अन्तं विधेयं C. 8 ०चयः K. 9 Wanting in C क; ०णान्यज्यो० C ख; ०णा G1, G2, J. 10 ०र्वि० G1, G2, J, K. 11 अत्र G1, G2, K. 12 उपनीं G1, G2; उपवयन्ती K. 13 ०वत्सीद्दान्तेन दान्तमिति वा B; ०पित्सि (०त्सीK) द्दां भांदांतमिति व (वा K) G1, G2, J, K. 14 तेना G1, G2; वातेना J. 15 B adds वा. 16 ०वीती G1, G2, J. 17 Wanting in G1, G2, J, K. 18 ०मेव G1, G2, J.

नो पौर्वपक्षिकमूर्ध्वं पृष्ठादचिकीर्षीत्[1] ॥ ८ ॥

अथ खल्वाह—त्रिष्टुब् जगतीषु भवतीति ।
कस्येदं ब्राह्मणꣳ स्यादिति ।
पृष्ठाग्निष्टोमसाम्नोरित्याहुरेके[2], कल्पाख्याते न[3] भवत इति ।
5 अथाप्याहुः—त्रिष्टुभ एवेमा[4] जगद्वृत्तयो[5] भवन्तीति ।
अथाप्याहुः—त्रैष्टुभजागतादेवेमाः सूक्तादाहृता भवन्तीति ।
अथाप्याहुः—जागतमेवात्रैकं पदं भवतीति ।
अपि वा सम्पद एव ब्राह्मणꣳ स्यात् ।
अपि वा योनिवादश्च कर्मवादश्च स्याज्जागतꣳ हि सत् त्रिष्टुप्सु क्रियत
10 इति ।
समसितव्यास्त्रिष्टुब्जगतीर्मन्य इति कौत्सः ।
त्रिष्टुब् जगतीषु भवतीति सति किमन्यत् समासादिति ।
आवृत्ते पृष्ठ्ये[6]ऽभीवर्त्तलोके सामानि प्रतिकल्पयेदिति गौतमः ।
एवं च पत्तसोः समाधिः ।
15 अपि चैवꣳ ससामेन्द्र[7]क्रतुरनुगृह्यत इति ।
तत्रैतेषामेव चत्वारि यान्यभिप्लवे वासिष्ठ[8]गौङ्गवे च ।
द्वितीय[9]प्रथमयोरह्नोः शुद्धाशुद्धीयं वेति[10] विचारयन्ति शाण्डिल्याः[11] ।
एतदन्तरनिधनं भवतीति ।
नाद्रियेतेति शौचिवृक्तिः ।
20 तदभीवर्त्तेनैव व्याख्यातम् ।
अथापि नित्यान्येवाभिरूपतराणीति ।
इन्द्रक्रतुमस्तू[12]यमानमनुशꣳसयन् सामानि प्रतिकल्पयेदिति गौतमः ।
जनित्रं विश्वजिति ।
यानि पृष्ठ्येऽभीवर्त्तलोके तानि दशरा[13]त्रिके पृष्ठ्ये ।
25 तेषां चत्वारि छन्दोमेषु, यथाभागं यथापृष्ठं पौरुमीढं व्रतेन[14] क्षात्रेण[15],
श्यैतं वा तन्त्रक्षात्रेण, एवं खलु कुर्यात्, नवाद्रियेत[16], औसामान[17]-
मिन्द्रक्रतुमनुशꣳ[18]सयितुमिति ॥ ९ ॥

1 पूर्वं॰ C, G1, G2, J, K. 2 ॰रेते C, G1, G2, J; K omits from एके to प्याहुः (6th line). 3 C, G1, G2, J omit न. 4 एव मा B. 5 जगत्तद्वृ॰ C, G1, G2, J. 6 पृष्ठ्यो॰ G1, G2. 7 स मामेन्द्र॰ C; स मामैंद्र॰ G1,G2, J, K. 8 ॰ष्ठागौ॰ C, J; ॰ष्ठागौंगये G1, G2. 9 G1, G2 add प्रथम. 10 चेति C. 11 शाण्डिल्यः C, G1, G2, J, K. 12 ॰स्तु॰ G1, G2, J. 13 दाश॰ J, K. 14 व्रते तद् B. 15 राक्षेण J. 16 नावा॰ J, K. 17 सा॰ B. 18 ॰शास॰ B.

अथोपदशरात्रꣳ सम्भरतां पूर्वे[1] पत्तसि विचारो भवति ।
अतिरात्रचतुर्विꣳशे त्रीनभिप्लवान् पृष्ठ्यमिति कृत्वा पञ्चायनमासानुपेयुः ।
अभिजित्स्वरसाम्नो [नं][2] त्रिꣳशत्तमामुपसम्भरन्ति[3] ।
अथैतं दशरात्रमेकं आवर्त्तयन्ति, आवृत्तिसाधूत्तरं पक्ष इति ।
5 न वयमावर्त्तयामोऽनुपेतं[4] पूर्वे[6] पत्तसि तं कस्मादावर्त्तयामेति ।
अथापि नियुक्तमानसो भवति ।
यदु हैनमृते मानसादावर्त्तयिष्यद् दशमं च मानसं च व्यद्वेष्यत् ।[9]
अपि चाकृतेन दशरात्रेण मानसमध्यशाययिष्यत् ।
[सं][10] कस्य हेतोः ।
10 अकृतेन[11][12] व्रतेन[13] मानसमधिशाययतीति ।
व्रतसम्बन्धात्[14] प्राजापत्यं[15] व्रतं[16] प्राजापत्यं मनः सर्वाप्तिव्रतꣳ सर्वाप्तिमनः ।
तदपि शश्वत् सांवर्गजिता गौतमा[17] उपरिष्टाद् व्रतस्य मानसमधीयते—
मा[18] कृतेन व्रतेन मानसमधिशीयामेति[19] ।
सामान्यात्तु[20] वयमधिशाययन्तो[21] मन्यामहे ।
15 अथैतान्[22]यद्विपन्[23]त्यहानी[24]त्याचत्तते ।
अतिरात्रचतुर्विꣳशे नवाहं गोआयुषी दशरात्रं व्रतातिरात्रेऽक्षयणादनपक्रमणाद्धेत्यनपक्रमणाद्धेति ॥ १० ॥

पञ्चमः[25] पटलः

अथातः संवत्सरो[26] वर्गाणाम् ।
20 पञ्च संवत्सरो[27] वर्गाः ।
तेषु[28] धीरो मनीषया कर्मण उपसदो[29] विद्यात् ।
सꣳस्थाविधिषु[30] व्रतानि च, षड्त्रिꣳशोनो नवोनश्च षडहोनः[31] ।

1 पूर्वं० G1, G2, J. 2 Wanting in B; नव G1, G2, K; तव J. 3 ०तमनुपसꣳहरन्ति B. 4 ०कं B. 5 ०तः B. 6 पूर्वं० J. 7 यद्ध C, G1, G2, J, K. 8 चरद् व्यवयिष्यत् C; चरंव्यवयिष्यत् G1, G2, K; चरंधवयिष्यत् J. 9 C adds यद्ध वै स मानसं व्रतं च मानसञ्च व्यवयिष्यत्; G1, G2, J, K add यद्ध वै समानवृतं (०व्रतं K) च व्यवयिष्यत्. 10 Wanting in B. 11 अनुकृ० B. 12 ०ते G2. 13 Omitted by G1; कृतेन G2, J. 14 ०सावन्धवत् B; ०सानं बंधवात् G1, G2, J, K. 15 प्रजा० G1, G2, J. 16 Wanting in G1, G2, J. 17 गोतमाः C, G1, G2, J, K. 18 प्राकृ० C. 19 ०धिशेषयामेति C; ०भिशीशयामेति G1, G2, J, K. 20 ०दु G1, G2, J, K. 21 ०न्त B. 22 ०वा० G1, G2, J, K. 23 ०क्षीय० B. 24 ०हनीत्याचक्ष्यते० G1, G2, J. 25 In B only. 26 ०वत्सरापव० B. 27 ०वत्सरापवर्गाः B. 28 ०ष्वषी० B. 29 उपदो G1; उपपदो G2, J, K. 30 ०स्था वैषु C, G1, G2, J, K. 31 ०डोहोमः G1, G2, J, K.

अथ सावनः—

अथाष्टादशभिर्ज्यायानहोभिः सावनात् परो नक्षत्रमिते[1]मासश्च ।

तस्य चैवं[2] त्रयोदशी, चान्द्रमसः सावनश्चोभौ[3] ।

[4]अथाष्टादश्युत्तमोऽष्टासप्तत्रिंशतं पौर्णमास्यां प्रसाधयेत् ।

5 गवामयनस्योपायां[5]श्चतुरः प्रतिपादयेत् ।

तेषां ना[6]क्षत्रः प्रथम[7]ः, तस्य सप्तविंशिनो मासा[8]ः, सप्तविंशतिर्नक्षत्रा[9]णीति ।

तस्य कल्पः—

प्रथमस्य प्रथमस्याभिप्लवस्य स्थाने त्रिकद्रुकत्र्य[10]हं कुर्यात् ।

प्राग्विषुवत उत्तमस्योत्तमस्योर्ध्वं विषुवतः ।

10 ते खल्वभिप्लवतन्त्र[11] एव क्लृप्ताः स्युरित्येके ।

एते चेहा[12]धिकृताः ।

न[13] चापि निवर्तयति ।

अथापि दृश्यते—त्र्यहस्त्र्यहतन्त्रे क्लृप्तो यथा स्वरसामानस्त्रिकद्रुकपश्चा-
हश्चाभिप्लवतन्त्रे सप्तदशरात्रे स्व[14]तन्त्रा इति ।

15 अपरमेवं च तन्त्राविलोपः ।

अपि च सत्रेषु त्रिकद्रुकत्र्यहः स्वतन्त्रो भवति ।

अथ नवोनः—

एतस्यै[15]व त्रयोदश मासा[16]ः ।

सम्भार्ययोर्मासयोर्नवाहं लुम्पेत् ।

20 चतुरहमेव प्राग्विषुवतः पञ्चाहमूर्ध्वम् ।

तस्य कल्पः—

प्रथमस्याभिप्लवस्य स्थाने ज्योतिषं च गां च कुर्यात् ।

प्राग्विषुवत ऊर्ध्वं विषुवत उ[17]त्तमस्याभि[18]प्लवस्य स्थाने ज्योतिषम् ।

नात्र विषुवानभिभवति ।

25 उत्तरे तु पक्षसि विषुवानुपसङ्ख्यायत इति ।

अथ षडूने[19]ः—

चान्द्रमसा[20]ः षट् पू[21]र्णमासाः षडूना[22]ः ।

---

1 ॰मिदमा॰ C, G1, G2, J, K. 2 ॰व C, G1, G2, J. 3 उन्मभौ॰ G1, G2, J. 4 अथाष्टादः स्युत्तमो॰ G1, G2, J; अष्टादः स्युत्तमो॰ K. 5 ॰य॰ C, G1, G2. 6 न॰ C, G1, G2, J. 7 ॰मस्य स॰ G1, G2, J. 8 ॰साः स्तस॰ C. 9 ॰त्राणामिति B. 10 ॰यं श्य॰ K. 11 ॰वक्ष B; ॰वनंत G1, G2, J. 12 वेहानिकृता G1, G2. 13 नु चावि B. 14 स्वरत॰ C, G1, G2, J, K. 15 तस्यैवं C. 16 मासस्य B; मास्यः G1, G2, J, K. 17 J omits उत्तम॰ ··· ॰ख्यायत (line 26). 18 ॰प्लुव B. 19 ॰नाः C. 20 ॰स G1, G2, J, K. 21 पूर्णमासाः षडूनाः wanting in C. 22 Wanting in K.

पूर्णोपक्रमा[1] ऊनावसानाः[2] पूर्वे पक्षसि मासाः स्युः ।
ऊनोपक्रमाः[3] पूर्णावसाना उत्तरे ।
तस्य कल्पः—
प्रथमस्य प्रथमस्याभिप्लवस्य[4] स्थानेऽभिप्लवपञ्चाहं कुर्यात् ।
5 प्राग्विषुवत एतेषु[5] मासेषूत्तमस्योत्तमस्योर्ध्वं विषुवतः ॥ ११ ॥

व्याख्यातः सावनः—
स एष आदित्यसंवत्सरो नाक्षत्रः ।
आदित्यः खलु शश्वदेतावद्भिरहोभिर्नक्षत्राणि[6] समवैति ।
त्रयोदशाहं त्रयोदशाहमेकैकं नक्षत्रमुपतिष्ठति ।
10 अहस्तृतीयं[7] च, नवधा कृतयोरहोरात्रयोर्द्वे कले[8] चेति[9] संवत्सराः[10] ।
ताश्चत्वारिंशच्चतुःपञ्चाशतं[11] कलाः ।
ते षण्णववर्गाः सषट्षष्टित्रिशतः[12] ।
षष्टित्रिशते श्लोकौ भवतः—
सप्तविंशतीं[13] राष्ट्रस्य राज्ञो[14] वसतयो मिताः ।
15 त्रयोदशाहमेकैकं[15] नक्षत्रमुपतिष्ठति[16] ॥
त्रयोदशाहानि तृतीयमह्न-
श्चतस्रस्त्रेधा दशतयोऽपि[17] कुर्वन् ।
त्रिणवं पन्थानं विततं पुराणं
चत्वारिंशाता नवरात्रैः समश्नुते ॥ इति ।
20 अथाष्टादशभिर्ज्यायानादित्यसंवत्सर एव तैर्यगयनिको[18] भवति ।
आदित्यः खलु शश्वदेकदा षण्मासानुदङ्ङेति नव चाहानि[19] ।
तथा दक्षिणा ।
तदप्येते श्लोका भवन्ति—
यस्मिन् वै परिवत्सरे सौर्यो मासोऽथ चान्द्रमः ।

---

1 ०र्वो० G1, G2, J, K. 2 ऊना०···०क्रमाः is wanting in K. 3 नो० G1, G2, J. 4 स्यस्थानेऽभिप्लव is wanting in G1, G2. 5 ऊनेषु G1, G2, J, K. 6 ०ता भवद्भिरहेभि० G1, G2, J. 7 अपह० G1, G2, J. 8 काले B; कला G1, G2, J, K. 9 वेति G1, G2, K. 10 सांव० C, G1, G2, J, K. 11 ०वाचतुष्प० G1, G2, J, K. 12 षषष्टि० G1, G2, K. 13 ०शतिरा० B; ०रातीरा० G1, G2, J. 14 ०श्चोपसत० B; ०श्चवस० G1, G2, J. 15 ०हं त्रयोदशाहमेकैकं C, G1, G2, J, K. 16 ०मुपतिष्ठति is wanting in G1, G2. 17 ०यो विकुर्वं० C, G1, G2, J, K. 18 ०गणय० G1, G2, J, K. 19 ०हनि J.

नाक्षत्रो न विलुम्प्यते ।[1][2]
सप्तविंशतिमेवैषः सप्ताहानेति दक्षिणा ।
तथोदङ् सप्तविंशतिमिति ।
तस्य कल्पः—
5 सम्भार्ययोर्मासयोरष्टादशाहान्युपाहरेत् ।
नवाहमेव प्राग् विषुवतो नवाहमूर्ध्वं त्रिकद्रुकांश्चाभिप्लवं[3] च प्राग् विषुवतोऽभिप्लवं च त्रिकद्रुकांश्चावृत्तानूर्ध्वं विषुवतः ॥ १२ ॥
कथमनाहिताग्नेः सत्रासनमिति ।
न विद्यत इति शाण्डिल्यायनः ।
10 सर्वे ईष्टप्रथमयज्ञाः[4] पृथक् सत्रोपकरणानीष्ट्वा[5][6] समाप्याग्नीन्सत्रमासित्वो-[7]दवसायान्यानृत्विजो[8] वृत्वा पृथक् पृष्ठ्यशमनीयैर्यजेरन्निति[9] नो विधानम् ।
यथा त्विदमद्य सत्रिणो भवन्त्यहीनयाजका इमे कृष्णाजिनकण्ठी[10] भवन्ति ।
अथापि यः सत्रे करणाद् यजमानो मन्येत, अपि नूनं सोऽहीनैका-[11]
15 हेष्वपि यजमानो मन्येत, तत्र ह्यपि करोतीति ।
यद्[12]तु वै यजमानशब्दाद् यजमानो मन्येत, अपि नूनं ये यजामह इतीष्टि-पशुबन्धे[13]ष्वपि यजमानो मन्येत, तत्र ह्यपि करोतीति ।
अथाप्याह—'य एतेनानिष्ट्वा'[14] इति । PB. 16. 1. 2.
तदेतदनाहिताग्नौ[15] साधिष्ठमुपपद्यत इति ।
20 विद्यत इत्यपरम् ।
एवं च समारम्भः ।
अपि चैवं सूत्राणि भवन्ति—
स्थालीपाकेनानाहिताग्नयो[16] यजेरन्निति ।
अथापि दृश्यते पराग्निष्विज्या—यथा पुरोहितस्याग्निभिरश्वमनुचरन्तीति ।

---

1 लुप्यते B. 2 C adds कः स्वित्तं वेद काः स्विदष्टा सप्ततिः त्रिशते तस्मिन्त्संवत्सरे मिते सौर्यो मासोऽथ चान्द्रमसो नाक्षत्रो न विलुप्यते G1, G2 add कः स्वित्त वेद कः स विदृष्टा सप्तति त्रिशते तस्मिन्त्संवत्सरे मितो सौर्यो मासो नाक्षत्रो न लुप्यते; J, K add कः स्वित्तं वेद कः स विदष्टा सप्तति त्रिशते तस्मिन्त्संवत्सरे मितो (मिते K) सौर्यो मासोऽथ चान्द्रमसो नाक्षत्रो न लुप्यते. 3 त्रिकाकर्तृश्चा० B; G1, G2 omit त्रिकद्रुका० ··· ०प्लवं च. 4 दष्ट० G1, G2, J. (K had originally द which is changed into इ). 5 सत्रो० ··· वृत्वा wanting in G1, G2, J. 6 ०णा अनिष्ट्वा B. 7 सोमोप्यग्निमाधाय इ० B. 8 ०सानीयान्तानृ० C. 9 षष्ठ० C; पृष्ठ्य is wanting in J; पृष्ठ० K. 10 ०कर्णा B. 11 ०हिनिका० G1, G2, J, K. 12 यद्यु C, G1, G2, J, K. 13 ०सन्धे० B. 14 ०नानिष्ध्वा C. 15 ०दाहि० B. 16 ०पाकैरनाहि० C, G1, G2, J, K.

तदपि शश्वद्ब्राह्मणं भवति—यथा पररथेनाध्वानमियादेवमेष स्वर्गं लोकमप्येति यः पराग्निषु दीक्षित इति।

अथापि ब्राह्मणं भवति—तेषां ये पुरोडाशिनः स्युरपि ह्यपुरोडाशिनो भवन्तीति[1] वार्थो भवति।

5 एतेनानाहिताग्नीना*ं* सत्रासनमुक्तम्।

अथापि ब्राह्मणमेव भवति—तेषां ये[2] पुरस्ताद्दि[3]दीक्षाणाः स्युर्यद्यु वैषां गृहपतिरिति।

अपि ह्यदिदी[4]क्षाणा एव भवन्तीति[5] वार्थो भवति।

एतेनानिष्टप्रथमयज्ञाना*ं* सत्रासनमुक्तम्॥ १३॥

---

1 ०न्तीतीवा० C, G1, G2, J. 2 Wanting in G1. 3 ०ताद्दीक्षणा B; ताद्दीक्षमाणः G1, G2; ०ताद्दीक्षाणाः J; ०तादीक्षाणाः K. 4 यदीक्षणा G1; यदीक्षाणा G2, K. 5 ०तीतीवा० C, G1, G2, J, K.

अथ षष्ठः प्रपाठकः

अथापि समाहारसिद्धिसत्त्रं भवति ।
तदेतत्समरूपमग्नयस्तावद्द्रव्याणि च ।
मन्त्रैर्वेयमिति ।
अथापि यदेतच्छाण्डिल्यायनीयं गृहपतिस्तदातिगृह्णीते ।
5 अथ कः पृष्ठशमनीयः स्यादिति ।
याथाकामी पथ्यानां दक्षिणावतामिति वार्षगण्यः ।
अनारभ्य वदति, तस्मादुदवसाय दक्षिणावता यजेतेति ।
अथापि पृष्ठशमनीयं नाम क्रतुमधीमहे ।
अथापि सारस्वतस्येष्टिरेव पृष्ठशमनार्था भवति—तथा दार्षद्वततौरयो-
10 रिष्टिर्वा पशुर्वेति ।
ज्योतिष्टोम इत्यपरम् ।
अनादेशे कमन्यं प्रतीयाम ।
अथाप्याह—"या मितदक्षिणैव स्यादेष एव कार्यः" इति । PB. 16. 7.
अमितदक्षिणः खलु पृष्ठशमनीयो भवति ।
15 अथाप्येष सत्त्राणामाद्यन्तेषु दृष्टो भवति ।
अयमु खल्वन्ततम इति ।
अथाप्येष उच्चावचानामाहाराणामन्तेषु दृष्टो भवति ।
यथा चातुर्मास्येषु वाजपेये राजसूये संदंशवज्रयोरिति ।
यद्वेतत् सारस्वते दार्षद्वततौरयोरितीष्टिप्रायः सं ह भवति ।

---

1 In C only. 2 °स्तव C; °मग्नेयस्तव G1, G2, J, K. 3 अथ J, K. 4 यथैतच्छा° C, G1, G2, K; यथेतछा° J. 5 °तथा विगृ° C; °तथा° G1, G2, J, K. 6 B, K add न. 7 तथापि G1, G2, J, K. 8 °नार्थो C, G1, G2, J, K. 9 प्रति° B. 10 °यान G1, G2, J, K. 11 °ण उ ख° C; °णत उ ख° G1, G2. 12 संदशपयज्ञयो° B; संद॰॰शवज्ञयो G1, G2. 13 दार्षत इति तद्वत तौरयोरिरी (°ती G2) ष्टि° G1, G2; दार्षद्व° K. 14 संभ° G1, G2. 15 C, J, K omit ह.

सुत्याप्राये[1] तु ज्योतिष्टोम एवाभिरूपतर इति ।
तदपि शश्वद्ब्राह्मणं भवति—तस्मादुदवसाय ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरपृष्ठेन सहस्रदक्षिणेन पृष्ठशमनीयेन यजेतेति यजेतेति ॥ १ ॥

षष्ठः[2] पटलः

5 अथात एकाहाः ।
तेषां यानि ज्योतिष्टोमानि द्रव्याणि[3] तानि, यान्यन्यान्युक्तान्वयानि[4] तानि, बृहत्पृष्ठेषु ।
अन्यत् तन्त्रं करोति ।
बृहदेकाहेषु स्थानवच्चिकीर्षन्, अस्य प्रत्नां माध्यन्दिनीयाम्, एषा
10 सꣳरूपिता बृहतेति ।
यस्तेमदामार्भवीयाम्, एषा बार्हतादह्न इति ।
अथ यत्र सार्वचिकीर्षा[5] भवति परिस्वानां तत्रार्भवीयां करोति ।
तदाहुः—परिस्वानैवैतस्य[6] तन्त्रस्य पुरार्भवीया बभूव, ताꣳ सानुर्वाराहिरपनिनाय[7], आषडहमात्रो भवतीति ।
15 सैषा तयोर्वाक्[8]सꣳहिता प्रोच्यते ।
अतो[9] यान्यन्यानि द्रव्याणि बार्हतलिङ्गानि वा तानि भवन्ति, बार्हतेभ्यो[10]ऽह्नोभ्योऽयꣳ सोम इति ।
माध्यन्दिनान्तीया बार्हतलिङ्गाः सूर्यवत्य आर्भवान्तीया दशमादन्त्या[11]न्विताः, अन्तो हि बार्हत्पृष्ठ[12]थमिति ।
20 एतद् गोस्तन्त्रमित्याचक्षते—
अथ यत्र ज्योतिष्टोमे तन्त्रे बृहत्पृष्ठं तद्राजयज्ञेषु ।
वृषा शोणा भवति, वृषा हि राजेति ।
व्रात्यस्तोमानां च ज्येष्ठयज्ञे राजजातीयत्वादेव ।
एतस्मिन्नेव तन्त्रे बृहत्पृष्ठे सूर्यवत्यः ।
25 न चेच्छन्दो[13]मेविलोपः, उत्तमाद्वा पृष्ठात् ।
तदार्भवे[14][15] स्तोमं[16]प्रत्यवरोहः प्राग्ज्योतिष्टोमविचारे[17]भ्यः ।
एतयोस्तन्त्रयोः समासमुभयसामतन्त्रमित्याचक्षते—
प्रतिलोममग्निष्टोमेषु, अनुलोममुक्थ्येषु ।

---

1 स्तुत्या० G1, G2, K. 2 In B only. 3 C, G1, G2, J, K add नित्यानि. 4 यानि न्यायानि यान्युक्तानि B. 5 सार्थिचिकीर्षा Cक; साध्वी चिकीर्षा Cख, G1, G2, J, K. 6 परिस्तानौ वेतस्य G1, G2, J. 7 ०सन्ववोन्नाभिरूपनिधाय B: ०सानुर्वाहिरप० G1, G2, J. 8 ततोर्वा० B. 9 ततो B. 10 ०भ्यो वाहो० C, K; ०भ्यौ वाहो० G1, G2, J. 11 दशमादन्तान्विता C, K; दशमदन्तान्विता G1, G2, J. 12 ०ष० C, G1, G2, J, K. 13 ०मपि वि० G1, G2, J. 14 आर्भ० C, G1, G2, J, K. 15 ०र्भवतो स्तो० G1, G2, J, K. 16 स्तोमं प्र० C. 17 ०विकारे० B.

अग्निष्टोमभक्तिर्हि स्वादिष्ठा, उक्थ्याभक्तिर्यस्तेमदा।
अथ यत्रैकर्चो माध्यन्दिनीया[1] भवति
"इन्द्रायेन्दो मरुत्वते"[2] इति SV. 1. 472; 2. 426; RV. 9. 64. 22; PB. 13. 9. 1.
5 तत्र करोति, एषा सामान्या तृचप्रथमा मरुत्वतीति।
अथ यत्रान्ये माध्यन्दिनीयार्भवीये भवतः, कल्पसप्रायाणि च द्रव्याणि, तदाशीस्तन्त्रमित्याचक्षते।
अथ यत्तदभिवादि द्र[3]व्यं भवति, यत्कामैः[4] क्रतुः, तत् कल्पं[5]सप्रायमित्याचक्षते।
10 तदेतत् सार्वक्रतुकम्[6] ॥ २ ॥
"अथैतानि बृहद्रथन्तरयोर्विभक्तानि स्थानान्यपीतरेतरस्य तन्त्रं गच्छतोः प्रतिपदाज्यानि ब्रह्मसामौष्णिहमिति।" Ārṣ. K. V. 18a.
अभीवर्त्त[7] तु राजयज्ञेषु भ्रातृव्यस्याभिवृत्त्यै, भ्रातृव्यवान् हि राजेति।
यत्र वोभयसामा सन् रथन्तरपृष्ठोमा नौधसेन बृहतः प्रत्याहारोऽ-
15 भूदितीव, यत्र वा प्रजापति[8]प्रवाद एकाक्ष[9]रणिधन एकैः[10] प्रजापतिः[11], यत्र[12] वाहर्गणस्य नाना ब्रह्मसामानि चिकीर्षति, तत् प्रथमेऽहनि करोति, अक्षर[13]निधनानां प्रथममायतन[14]मिति।
श्रायन्तीयं प्रायश्चित्तार्थेनैव भवति।
"अथ यत्रा[15]न्यदग्निष्टोमसाम भवति, तद्[16]यज्ञायज्ञीयमनुष्टुभि भवति", एष
20 नेदिष्ठे चतुष्पद आवाप इति। Ārṣ. K. V. 50 b.
अथ यत्र श्यावाश्वं प्रच्यवते तद्रथन्तरपृष्ठेषु श्रुध्यं निहवानुग्रहाय, व्रात्यस्तोमेषु च व्रात्यानामुपहवाय।
अथ यत्र स्तोमप्र[17]त्यवरोहस्तद् बृहत्पृष्ठेषु पौष्कलं रोहदर्शनं श्रुध्यं स्तोमप्रत्यवरोहे न चिकीर्षति।
25 विषमेषु स्तोमेष्वभिसोमा राथन्तरेषु परीता[18] बार्हतेष्वेते राथन्तरबार्हते[19] इति।

---

1 ०वन्ति C, G1, G2. 2 मरुत्वते इति तत्र ... तृचप्रथमा wanting in G1, G2, J. 3 द्रव्या B. 4 ०मकृतः B. 5 कल्पः स० B. 6 ०क्रतुत्वम् B; ०क्रातुकम् G1, G2, J, K. 7 ०वर्त्तस्तु रा० C, G1, G2, J, K. 8 ०प्रति० G1, G2, J. 9 ०क्षरा G1, G2, J. 10 एका G1, G2, J, K. 11 ०तिरिति C, G1, G2, J, K. 12 य G1, G2; त्र J. 13 पञ्चाक्षर० Cख; तत्पञ्चाक्षर० G1, G2, J. 14 मायतन० ... ०साम wanting in G1, G2, J, K. 15 यत्र नाग्नि० C. 16 यद्य० G1, G2, J; तदायज्ञा० K. 17 ०प्ररोह० G1, G2; ०प्रवरोह० J. 18 परिता B. 19 ०न्तरी बार्हत्याविति C, G1, G2, J, K.

तत्र गोआयुषोऽर्द्धे चतुर्ऋचस्थे कुर्वन्ति भाल्लविनः ।
चतुरस्तृचैकर्चान् व्यत्यासेन कालबविनः ।
अध्यास्यायामेकर्चौ[1], अद एकस्यां प्रथमायाम्, अदस्तिसृषु[2] परासु[3],
अदस्तिसृषु पूर्वासु, अदोऽध्यास्यायामिति शाट्यायनिनः ।
5 "तृचे[4]प्रथमायां वयमेकर्चं कृत्वा तस्मिन्नेव तृचे द्वे तृचस्थेऽध्यास्याया-
मन्तत एकर्चम्, ताꣳ शशकर्णक्लृप्तेत्याचक्षते ।" Ārṣ. K. V. 26a.
इतरथोऽनाध्यास्यायां मध्य एकर्चाविभितस्तृचौ, यथैतदग्निष्टुत्यृषभ
इति ॥ ३ ॥

विभक्तावुक्थप्रणयौ, प्रमꣳहिष्ठीयवन्ति राथन्तरेषु, साकमश्ववन्ति
10 बार्हतेषु, उद्वꣳशीयान्तान्युभयेषां पङ्क्त्यनुग्रहाय ।
अथ यत्र चतुर्थो भागः प्रत्यु[5]पशेते नार्मेधं वा नार्मेध[6]सदृशं वोक्थान्तेषु
चिकीर्षितं भवति ।

अथैतौ विश्वजिदभिजितौ पृष्ठ्यपृष्ठ्यस्तोमयो[7]रन्तस्य वेति शाण्डिल्यः ।
पृष्ठ्यस्तोमस्याभिजित्, पृष्ठ्यस्य विश्वजित्, पृष्ठ्यदश[8]रात्रयोरित्येके ।
15 एतेनैवानुपूर्व्येण बृहद्रथन्तर[9]पृष्ठमभिजितं पृष्ठ्यस्तोमन्यायेन, रथन्तर-
मग्निष्टोमसाम, रथन्तरभक्तिरयं भवति पूर्वत्वात्[10] ।
तद् बृहता नाध्य[11]शिशाययिषीज्ज्योतिष्टोमं[12] तन्त्रं पूर्वत्वात् ।
तत्र यान्यभिवन्त्यभिरूपाणि तानि जितिप्रवादानि ।
"उभयोरभिजितोऽतिरात्री भवतः ।
20 ब्रह्मण[13] आज्यमुद्धरति, आर्षभस्तोत्रीयं मा[14] सञ्चीचरन्[15]" इति । Ārṣ.
K.V. 52b.

सञ्चारयेदिति धानञ्जय्यः ।
किꣳ हि [16]योऽह्नो रात्रिमुपसञ्चारयेदिति ।
न सञ्चारयेदिति गौतमः ।
25 असञ्चारकुशला यज्ञा भवन्ति ।
तत्रैतत् करोति ।

---

1 ०र्यां त्वेवैकर्चौ C, K; ०र्यां वेवैकर्चौ G1, G2; ०र्यां वेवैकचविविद ए० J. 2 अहस्तिसृषु C. 3 परस्तदस्तिसृ० G1, G2, J, K. 4 तृचः प्र० B. 5 प्रतीत्यु० B. 6 नार्मेध is wanting in K. 7 ०मयोरजस्तवाविति शा० B; ०भ (मG2) योरंजस्यवाति शा० G1, G2; ०मयोरंजः स्यवाति शा० J; ०मयोरंजः स्य वाविति शा० K. 8 ०दशतयो० G1, G2, J. 9 ०रे पृ० B. 10 ०त्वात् C. 11 नाधिशाय० B; नाशिशा० G1, G2, J. 12 ०तिष्टोमतन्त्रः B. 13 ब्राह्मण C; ०णं G1, G2, J. 14 मानस० C, G1, G2, J, K. 15 सञ्चि० B; सञ्चर० C. 16 योगेना रा० B; योरह्नो G1, G2. J.

'अभि प्र गोपतिं गिरा' SV. 1. 168; 2. 839; RV. 8. 69. 4.
इत्यभिवतः स्थानेऽभिवत्सुज्ञानम्[1] ।
उष्णिहि रथन्तरभक्तित्वान्न[2] श्रुध्यं चिकीर्षति, नो पौष्कलं[3] बृहति[4] पृष्ठे ।
तत्रैतत् करोति, उभयभक्तिमिश्रनिधनꣳ सर्वपृष्ठं विश्वजितꣳ रथन्तरं[5]
5 मध्यन्दिने बृहदग्निष्टोमसाम ।
एवमिव ब्राह्मणं भवति—यद्रथन्तरं प्रथमं[6] बृहदुत्तमं मध्य इतराणीति ॥४॥
वैराजꣳ होतृषाम ।
एतद् बृहत् परोक्षम् ।
एतच्चैषामेकनिधनम्[7] ।
10 एकनिधनानि होतृषामाणि भवन्ति ।
महानाम्नी मैत्रावरुणसाम ।
एता अयुक्ता[8] वामदेव्यस्थानेऽभिरूपाः ।
वैरूपं ब्रह्मसाम ।
एतत् सर्वबृहतीषु[9] ।
15 सर्वबृहतीप्रायाणि ब्रह्मसामानि ।
एवं च स्वस्तोमानि भवन्ति ।
रेवतीरच्छावाकसामा [स्वस्तोमा] अप्रदाहाय[10] गायत्रीष्वग्निष्टोमसाम ।
एवमिव ब्राह्मणं भवति—"यद्गायत्र्यो भवन्ति तेनाऽऽयतनान्न च्यवन्ते"
इति । PB. 16. 5. 27.
20 तासामेकविꣳशत्यक्षरा प्रथमा ।
तेनैकविꣳश्यां[11] न च्यवन्ते ।
कथं धर्मा इति ।
अकर्तव्या इत्येके ।
अस्वस्थानानि[12] हि भवन्ति, स्थानस्था धर्मा इति ।
25 कर्त्तव्या इत्याचार्याः ।
संयुक्तानि भवन्ति, संयुक्तधर्मा इम इति ।
अथापि कृत्स्नान्वितान्याशीःसाधकतराणि भविष्यन्तीति ।
अथापि शिथिलानि प्रतिलोमानि[13] परोक्षपृष्ठानि, तेषां धर्मकरणेन दृढी-
भावो भविष्यतीति ।

1 ०भ० G1, G2, J. 2 ०न्तरेभ० B. 3 पु० B; पो० J. 4 बृहत्पृ० G1, G2. 5 ०रमा० G1, G2, J, K. 6 पृष्ठं B. 7 G1, G2 omit मेकनिधन. 8 अयुक्ता B. 9 Wanting in B. 10 अप्रवादाहाय C; अप्रवादाय K. 11 ०शान्न च्य० C, K; ०शान च्य० J. 12 स्व० C; स्था० G1, G2, J, K. 13 Omitted by C, G1, G2, J, K.

अथाप्यस्वस्थानानि[1], तेषां धर्मकरणेन स्वस्थानानीति[2] चिकीर्षा स्यादिति।
अथापि विश्वजिच्छिल्प इत्याचक्षते।
धर्माणामेतद्यच्छिल्पानीति।
अथापि संशयेऽलोपो लोपान्न्यायतर इति न्यायतर इति[3] ॥ ५ ॥

5 सप्तमः[4] पटलः

अथ[5] कथमङ्गभूतस्य[6] परिवासा इति।
कर्तव्या इत्येके[7]।
विहिता अप्रतिषिद्धा भवन्तीति।
अथाप्येवं पृष्ठधर्मैः समाधिरिति।

10 अकर्तव्या इत्यपरम्।
सर्ववेदससंयुक्ता भवन्ति[8]।
अपि[9] चैते[10] खल्वङ्गभूताः[11] सर्ववेदसमिति।
ते खल्वेते धर्मा एतस्मिन्नेव द्वादशाहे स्युरिति गौतमः।
अत्र हि संवत्सराप्तिं वदतीति।

15 ऊर्ध्वं द्वादशाहात् सांवत्सरिकाणीति धानञ्जय्यः।
कामं तु छुवी द्वादशाहिकी[12] स्यादिति।
बार्हत्तन्त्रं[13] बृहद्भक्तित्वाद् यत्र कालेयं प्रच्यवते[14]ऽनुजिघृक्षितं तत्र[15] भवति।
तद्यन्मध्यन्दिने[16]ऽत्रास्य[17] स्वच्छन्द इति।
सत्रासाहीयं[18] ककुभि सोढवन्नाम[19] जितिनामक्षिति भवति।

20 "सफंश्रुध्ये[20] यद्यतिरात्र इति तु भवत्यतिरात्रः सन्[21] कृत्स्नीभवति, सफीभवति[22] तस्मात् सफीभवतः सफं वा[23] विच्यावयिष्यत्[24]।" Ārṣ. K. V. 53 a.

तदेक उक्थप्रणये कुर्वन्ति सोढवन्नाम मा प्रच्योष्टेति।
पिपीलिकामध्यां करोति दशरात्रन्यायेन।

25 तां नित्यायाः पुरस्तान्निदधाति।
एवं पथ्यावसानमिति।

---

1 तथाप्य० G1, G2, J. 2 ०स्थानीनि G1, G2, J. 3 J does not repeat न्यायतर इति. 4 In B only. 5 Wanting in C, G1, G2, J, K. 6 कथं मङ्गलभू० G1; कथमङ्गलभू० G2, J, K. 7 ०क्तास्ते C, G1, G2, J, K. 8 ०न्तीति K. 9 B has अपेत् नु for अपि चैते. 10 चैव ते G1, G2. 11 ०भूतान् B. 12 ०श्रहिकी C; ०हिका J. 13 ०तं तन्त्रं C, J, K. 14 प्रव्यवात० G1, G2, J; प्रच्यवात० K. 15 Wanting in K. 16 तन्म० G1, G2, J, K. 17 ०नं मैत्रास्य G1, G2; ०ने मैत्रास्य J, K. 18 सर्वासा० G1, G2, J. 19 सोढभवन्नाम जाति० G1, G2, J. 20 सफमध्ये G1, G2, J, K. 21 स G1, G2. 22 Wanting in C; ०फि० B. 23 ना G1, G2, J, K. 24 विच्यावयिषीत् C, G1, G2, J, K.

तद्यत्र [1]गणीचिकीर्षा[2] [3]प्रजापतिकामो वा, [4]एवमेवैष तस्मिन् स्थाने भवति ।
तत्र वामदेव्यं पृष्ठेभ्यः प्रच्युतमनुगृह्णाति, वामदेव्यभक्तिं[5]न्यहन्युत्पन्नमिति ।
वारवन्तीयं[7] सर्वपृष्ठेषु चिकीर्षितं रेवतीसंयोगात् ।
[6]तद्यद् द्विपदासु द्विपदाभक्तिं[8]न्यहन्युत्पन्नमिति ।
5 अनुतन्त्रमुक्थप्रणयौ नाना षोडशि[9]सामनी करोति ।
नानात्वं[10]र्थौ नानदमभिजितीति, एतस्य [11]पूर्वाभ्यर्थेनेति ॥ ६ ॥
अथ व्रतस्य स्तोत्रप्रदेशः—
पञ्चविंशतिस्तोभाः पञ्चकृत्वः[12] [[13]पदं पञ्चकृत्वः[12]] पूर्वा देवता पञ्चकृत्व उत्तरा ।
10 अथाप्याहुः—व्यवस्तोमेत् पददैवतम्, [14]एवं समाधिः पददैवतस्येति ।
एते वापि [15]दैवते व्यवस्तोमेदित्येके ।
एवं समाधिर्दैवत[16]योरिति ।
एते वाप्य[17]र्द्धदेवते व्यवस्तोमेदिति शाण्डिल्यः ।
अथ कालबविनो यथासमाम्नायमेव कुर्वन्ति ।
15 [18]एतच्चैषां लघिष्ठम् ।
अपि [[19]च] यान्यनुप[20]दंस्तुब्धानि [21]आदर्शयतीति तेषामुभयतः स्तोभात् सकृन्निगदा एवास्य पुरस्तात् स्तोभा भवन्ति ।
[22]यत्त्वेनान् प्रथममवोचाम तत् [23]कर्म ते खलु शश्वदेक आत्मना प्रतिपद्यन्ते, [24]आत्मसत्तमान्यङ्गानीति ।
20 शिरसा वयम्, शिरो वा [25]अग्रे सम्भवतः सम्भवतीति भवति ।
अथैके शिरसा स्तुत्वा, अथ दक्षिणेन पक्षेण, अथात्मना, अथोत्तरेण पुच्छेन, [26]एवं मध्य आत्मा भवतीति ।

---

1 गुणचि० B; गणचि० G1, G2. 2 C, G1, G2, J, K add वा. 3 प्रज्ञात-कामो Ck; प्रजाति० B. 4 एवैषैत० B. 5 ०भक्ती० B; ०त्पन्नेति C; ०क्तिनन्युत्पन्नेति G1, G2; ०क्तिन्यन्युत्पन्नेति J, K. 6 तद्योगाद्वि० G1, G2; तद्य K. 7 Wanting in G1, G2. 8 ०क्तीन्य० B. 9 ०सामानी B. 10 ०त्वार्थौ B; नानात्वार्था G1, G2, J. 11 पूर्वात्वर्थमिति B. 12 ०त्वा J. 13 पदं पञ्च० wanting in B. 14 एवं... ०दित्येके wanting in J. 15 देवते G1, G2, J, K. 16 ०दैव० G1, G2, J, K. 17 ०र्द्धदेवे B: ०प्याहुदैवे C. 18 एतत्त्वेषां C; ताच्चैषां G1, G2, J; एताच्चैषां K. 19 Wanting in B. 20 ०पदस्तुब्धाऽधानि C; ०पदस्तुध्वानि G1, G2; ०पदधा J. 21 ०ति C, G1, G2; आर्दयति J, K. 22 यत्त्वेव C, G1, G2, J, K. 23 कथं B. 24 असम० G1, G2; अन्नम० J; अत्मनस० K. 25 अग्ने C. 26 एव मध्य... पुच्छेन is wanting in K.

अथैके[1] शिरसा स्तुत्वा, अथात्मना, अथ पक्षाभ्याम्, अथ पुच्छेन, एवं[2] सम्यंगवयवस्यानुक्रमश्च[3] भवतीति[4]।

अथैके[5] शिरसा स्तुत्वा, अथ पक्षाभ्याम्, अथात्मना, अथ पुच्छेन, एवमिवाङ्गानामानुपूर्व्यमिति[6]।

5 अथ यथैतद् विहृत्य स्तवने तद्द्वयम्[7]।

एतद् ब्राह्मणवदित्यृश्यस्य[8] साम्नि।

किं प्रत्यक्षं किं परोक्षमिति।

"ह्रस्वं[9] प्रत्यक्षं[10] द्राघितं[11] परोक्षम्। अपि वेन्द्रेति प्रत्यक्षम्, इन्द्र इति परोक्षम्।" Dh. Dr. Ś. 10. 1. 20; cp. Śāy. PB. 5.4.15.

10 अपि वा यथाग्रामं[12] एतदङ्गमाचष्टे[13] तत् प्रत्यक्षम्, तस्यैषा स्तुतिः स्यात्।

तंसरमिव[14] ते पायुर्ऋजुरनां[15]स्कन्ध इति।

यथा समाम्नायमेवोपेयुः।

एवमिव ब्राह्मणं भवति—"यद्वै मनुष्याणां प्रत्यक्षं तद्देवानां परोक्षम्।" PB. 22. 10. 3.

15 अथ यन्मनुष्याणां परोक्षं तद्देवानां प्रत्यक्षमिति।

तत् कुशलं[16] यदस्मिन्नहनि, देवप्रत्यक्षं कुर्युः।

तत्र खलु गोस्तन्त्रं करोति।

एतदन्तं[17] तन्त्रतरमन्तंचरमिदं[18] भवति।

तत्र[19] यो द्रव्यविकारो निर्वार्कार्थे[20] न सम्भवति[21]।

20 अथापि प्राजापत्यं व्रतम्, अनिरुक्तः प्रजापतिरिति।

अथाप्यन्नांघस[22]ंस्तावानि, अन्नोक्तं[23] व्रतमिति।

स्तोमकल्पाय चतुर्ऋचमाहरति।

तद्यदेतद्[24] 'यवंयवं नो अन्धसा' इति, SV. 2. 325; RV. 9. 55. 1.

एतद्यवप्रवादं पुष्टिप्रवादम्।

---

1 अथाप्येके C. 2 सम्यक् शिरश्चानूकं च C, G1, G2, K; संपविशरश्चानूकं च J. 3 B repeats गवयवस्यानुक्रमश्च. 4 भवति B. 5 अथैते C, J. 6 ०पूर्वं० G1, G2. 7 तद्द्वयम् C, K; तद्द्वयमेव ब्रा० G1, G2, J. 8 ०त्यश्वस्य B; ०दित्यंश्यस्य G1, J. 9 ऋश्यं S. 10 ०क्षां G1; ०क्ष S. 11 द्राघिष्ठं B; द्राचितं G1, G2, J; शापितं S. 12 यथाज्ञातं B. 13 त० B. 14 तरसमिव B; तत्सरमिव C; तरामिव G1, G2. 15 ०नां कथय B. 16 कुलं G1, G2. 17 ०न्ततन्त्रन्तर० K. 18 ०मन्चरतरमिदं G1, G2, J, K. 19 तत्र० G1, G2, J, K. 20 ०कार्थो C. 21 भवति C; सभवति G1, G2, K; सवति J. 22 ०प्यन्नघ० B; ०प्यघ० K. 23 अन्तोक्तं C, G1, G2, J, K. 24 तद्यत् B; तत् G1, G2, J.

अन्नाद्यस ँ्स्तावमन्नोकेऽभिरूपम् ।
जराबोधीयमुभयसामसु चिकीर्षितम्, उभयविधं[1]निधनं हि भवति ।
तच्चा[2]ग्नेययोन्यन्नाद्यं[3]स ँ्स्तावमन्नोकेऽभिरूपम् ।
"ऐका[4]हिकाद् व्रतात् पञ्चनिधनं वामदेव्यमपनै[5]यति," नाना[6]ह्वामतिमेद-
5 नायेति भवति । Ārṣ. K. V. 53 b.
तदेकाहे नोपपद्यते ।
यज्ञसामान्यादहीनेभ्यः, तत्र श्यैतमनुतन्त्रम्[7] ।
'आ नो विश्वासु हव्यम्' इति । SV. 1. 269; 2. 842; RV. 8. 90. 1.
ए[8]ता ब्रह्मप्रवादा इति ।
10 "इलान्दमग्निष्टोमसाम कुर्वन्तस्तृचे कुर्युः ।" cp. LŚ. 10. 9. 6.
एष आवृ[9]त्तिन्याय इति ।
"दशसु दशस्वक्षरेष्वार्चिकान्यनुगानानि ।" cp. LŚ. 10. 9. 7.
एवं वैराजान्यनुगानानि भ[10]विष्यन्तीति ।
"षड्टृचे सर्वस्मिन्नित्याचार्याः ।
15 अर्द्ध[11]र्चेष्वनुगानानि, एवमस ँ्रोधतरो गीतानाम् ।" इति । LŚ. 10. 9. 8.
"द्वादशर्चे[12] इति शाण्डिल्यः ।
तत्रापरावाग्नेयौ तृचावाहरेत्[13] ।
'आ ते अग्ने[14]' SV. 1. 419; 2. 372; RV. 5. 6. 4; PB. 13. 6. 1.
'अग्निं तं मन्ये' । SV. 1. 425; 2. 1087; RV. 5. 6. 1.
20 एवमृग्दृष्टीन्यनुगानान्यृक्षु भविष्यन्तीति ।" cp. LŚ. 10. 9. 9.
षड्टृचे तु कुर्वन्ति ये कुर्वन्ति
'अग्ने तव श्रवो वयः' इति । SV. 2. 1166; RV. 10. 140. 1. LŚ. 10. 9. 6.
चतुर्थमेवानुगानं[15] तृ[16]चे स्यादिति वार्षगण्यः । LŚ. 10. 9. 10.
25 अत्र हि निधनवादं वदति—व्रतमिति भवति, स्वरिति भवति, शाकुन इति भवतीति । LŚ. 10. 9. 10.

---

1 ०धेरेव C; ०धेडं च G1, G2, J. K. 2 तदाग्ने० C, G1, G2, J, K. 3 ०द० G1, G2. 4 एकाद् B. 5 ०पव्ययति G1, G2, J. 6 नानामह्वा० C, G1, G2, J, K. 7 तस्यैतमनुतन्त्रम् G1, G2, J. 8 ०एतावद् C. 9 अवर्ति० B. 10 भवन्तीति G1, G2, J, K. 11 अध्यर्चे० B. 12 ०शार्चे C. 13 ०वाहा० B. 14 Wanting in C, G1, G2, J, K. 15 ०गाना G1, G2, J. 16 Omitted by G1, G2, J.

"भक्तयश्च कल्पन्ते[1], नानासामवच्चैनान्येकेऽधीयत इति" ॥ ७ ॥ LŚ. 10. 9. 10.

अथ साहस्राः।
त्रिरात्रार्त्तिं च व्रतार्त्तिं चोपकृताः।
5 एवमिव ब्राह्मणं भवति—तत्र त्रयाणाꣳ सम्पद् ब्राह्मणचोदिता।
तदुपकृता[2] एते स्तोमा भवन्ति ब्राह्मणविहिताः।
तृतीयस्योमे सामनी करोति—व्रतन्यायेन, त्रिरात्रन्यायेन च।
व्याख्यातमौभयं तन्त्र्यम्।
पूर्वयोः पङ्क्तिषु ब्रह्मसाम यत् सहस्राक्षरासु[3] ब्रह्मसोमेति[4]।
10 एवमक्षरसहस्रꣳ सम्पद्यते।
बार्हतं तन्त्रं तृतीयस्योकथ्यत्वात्।
"अग्निं दूतं वृणीमहे" इति। SV. 1. 3; 2. 140; RV. 1. 12. 1; PB. 11. 7. 3.

उभयान्याज्यानि[5]।
15 तत्र "पूर्वे बार्हत उत्तरे राथन्तरे इति शौचिवृक्षिः।" Ārṣ. K. V. 54 b.
एवꣳ समविभागो देवतानामिति[6]।
"एकदेवत्ये बार्हते, द्विदेवत्ये राथन्तरे इति धानञ्जय्यः।" Ārṣ. K. V. 54 b.

एतद् द्वयोः समवयतोः कुशलं यद्व्यत्यास[7] इति।
20 व्याख्यातꣳ आयन्तीयम्।
अपि चैकादशाक्षरशतानि सम्पद्यते।
तत्र नित्या सहस्रसम्पत्, मौक्षमुक्थ्येषु चिकीर्षितम्, उक्थ्यदर्शनं च।
अपि च त्र्यक्षरणिधनं त्रीण्युकथ्यानीति।
सौभरं त्रैककुभं वेति विचारयन्ति।
25 नित्यं[8] हि सौभरꣳ आयन्तीयं[9]नियोगात्, उद्वꣳशीयनियोगाद्वा त्रैककुभमिति।

त्रिरात्रविधं[10] उत्तमः, त्रिरं[11][12]त्रिक्यः प्रतिपदश्चाज्यानि च।
एष्व[13]त्रैरात्रिकम्—

1 कल्प्यन्ते LŚ. 2 न उप C, G1, G2, J. 3 सा K. 4 ०साम्येति G1, G2, J, K. 5 ०नीति K. 6 देवाना० G1, G2, J, K. 7 यद्व्यास C. 8 ०तोः आ० G1, G2, J; ०ताः आ० K. 9 ०त्समहः सौ० C; ०त्समह सौ० G1, G2, J, K. 10 ०यणी० B, K. 11 ०विधतम उ० C, G1, G2, J, K. 12 त्रैरात्रेभ्यः B. 13 एकमत्रिरात्रिकम् C, K; एकमत्रिराकम् G1, G2, J.

‘इन्द्रमिद्गाथिनो बृहद्’ इति । SV. 1. 198; 2. 146; RV. 1. 7. 1; PB. 11. 7. 3.

तद्यत् करोति पृष्ठम[1]ध्यविभाजयिषीत् ।
[2]ज्यौतिष्टोमं तन्त्रम्, विभ्रंशाशङ्कस्त्रिरात्रे ।
5 एतत् प्रतिष्ठाविध[3]तरं तन्त्रयोरिति ।
ककुभं माध्यन्दिनमुपाहरति ।
[4]इमामुपरिष्टाद् गायत्र्या निदधाति ।
एवमियममुत्र[5] गायत्र्यानन्तर्हितेति[6] ।
तस्याः[7] स्थाने द्विपदां करोति पु[8]रुषच्छन्दसः पुरुषच्छन्दस इति ।
10 सतोबृहतीं करोति ।
त्रिरात्रन्यायेन तां नित्यायाः[9] पुरस्तान्निदधाति ।
एवं पथ्यावसानमिति ।
तद्यत्र [10]गणीचिकीर्षा [[11]वा] प्रजापतिकामो वा, एवमेवैतानि छन्दांसि युज्यन्ते ।
15 आष्टमिकीस्त्रिष्टुभः करोति ।
एता रूपसम्पन्ना इति ।
तत्र वामदेव्यं करोति ।
एवं हि ब्राह्मणं भवति—“पवमानस्यान्त्यं वामदेव्यम्” इति । PB. 16. 11. 3.
20 स्वारं सौपर्णं मैत्रावरुणसाम, एतद् वामदेव्यसदृशम्[12] ।
अ[13]पुरस्तात्स्तोभं[14] बहिःस्वारं यथा वामदेव्यम् ॥ ८ ॥

अथ साद्यस्क्रेषु याः सद्यःप्रवादा नवप्रवादाः प्रोक्तवत्यो जनद्वत्यस्ता अभिरूपाः ।
अथ खल्वत्र पृष्ठ[15]न्यङ्गाश्चिकीर्षिता भवन्ति ।
25 [16]आमहीयवान्ततो य[17]द्धेतुप्रत्ययानि पृष्ठानि परिवा[18]चनार्थानि[19] तानि ।
यत्र साक्षादस्वस्तोमान्यभविष्यंस्तत्रै[20]तच्छाकरवर्णं शाकरीभ्यः प्रति-वैष्ट[21]म्भं वैरूपात् साक्षाद्रथन्तरं क्रियते ।

1 ०मत्य० C, G1, K; ०मन्य० G2, J. 2 ज्यो० B. 3 ०धरं G1, G2, J; ०विधविधरं K. 4 तामुप० C, G1, G2, J, K. 5 ०मुत G1, G2, J, K. 6 ०तेनेति C; ०हिते G1. 7 तस्य B. 8 Wanting in C. 9 निधने C; C adds वैरूपात्साक्षाद्रथन्तरं क्रियते (line 27) सौभरं बृहतो वारवन्तीयं रेवतीभ्यः (p. 107. 1). 10 गुणी० B, G1, G2, J. 11 Wanting in B. 12 ०शः B. 13 पु० B. 14 ०भमेव C. 15 पृष्ठय० C. 16 आमाभिमानितो C, G1, G2, J, K. 17 यमृतु० C, J, K; मृतु० G1, G2. 18 ०या० C, G1, G2, J. 19 ०र्थानीति C; ०र्थोनीति G1, G2, J, K. 20 ०त्तसैत० C. 21 ०म्भवै० C.

सौभरं बृहतो वारवन्तीयं रेवतीभ्यः स्वाशिरामर्को वैराजादायास्य-मुष्णिहि ।[1]

मध्यन्दिने सं[2] दक्षिणां प्रतिगृह्य विभ्रंशे[3] सं[2] तृतीयसवने प्रायश्चित्तं[4] चक्र इति ।

5 कथमुत्तरयोः साद्यस्क्रधर्मा इति ।

कर्तव्या इत्येके ।

साद्यस्क्रैश्चाभिपरीतौ[5] भवतः ।

अपि चैते[6] कालसङ्कर्षाद् भवन्ति ।

सङ्कृष्टकालाविमौ भवत इति[7] ।

10 [8]अकर्तव्या इत्यपरम् ।

[9]असाद्यस्क्रौ हि भवतः ।

यद्वेतदभिपर्ययादिति[10], सर्व एवासाद्यस्क्रैरभिपरीता भवन्ति ।

यद्वेतत् काले[11]सङ्कर्षादिति[12], उच्चावचाः[13] कालविप्रकर्षा एकाहानाम्[14]

तदेवं बहु प्रसज्येतेति ।

15 विश्वजिच्छिल्पे सामस्तोमे[15] सति साध्यासां बृहतीं करोति ।

कस्य हेतोरिति ।

पुरस्तादापन्नानि वैश्वजितान्यविच्यावयिषन्नविच्यावयिषन्[16] ॥ ९ ॥

अष्टमः पटलः[17]

जिघांसंयज्ञ[18] उत्तरः ।

20 तत्र[19] या हतवत्यः क्रूराणि वं[20] सामान्यभिरूपाणि तानि ।

त्रिकाण्याज्यपृष्ठानि करोति ।

एवं सुपराञ्चि भवन्ति । cp. LŚ. 8. 5. 12.

वज्रोक्तं च पञ्चदशमभिसम्पद्यते[21] ।

चतुरः पञ्चदशान् ।

25 'अर्षा सोम द्युमत्तमः' इति SV. 1. 503; 2. 344; RV. 9. 65. 19; PB. 13. 3. 1.

---

1 ०दास्ययामु० G1, G2. 2 G1, G2, J omit स. 3 ०शेव C, G1, G2, J. 4 ०चित्तिं C, G1, G2, J, K. 5 ०तो G1, G2, J, K. 6 चेमे C, G1, G2, J, K. 7 Wanting in G1, G2, J. 8 कर्त्त० B; wanting in G1, G2, J. 9 G1, G2 omit असाद्यस्क्रौ ··· सर्व एवा (line 12) साद्यः क्रौ J, K. 10 ०र्यायां० C. 11 काले स० B. 12 ०र्षा इति B. 13 ०वर्चा B, G1, G2, J. 14 एकानां G1, G2, J, K. 15 समे स्तो० B. 16 ०न्यविच्यावयिषन्न० C, G1, G2, J. 17 In B only. 18 ०सयज्ञ C; ०सज्ञा G1; ०सज्ञ G2, J. 19 ता B. 20 Wanting in K. 21 ०न्ते B.

माध्यन्दिनीयं[1] भवति।

आहेयं[2] भवतीति[3] शाण्डिल्यायनः।

ऋषभ्युर्षेत्यर्थात्तु स्नातकाः कुर्वन्ति।

भागविलोपे चोत्पन्ना भवन्तीति[4]।

5 "पराचीषु रथन्तरम्" इति। ṢB. 3. 8.

द्विपदोत्तरासु स्यात्।

"एवꣳ सुपरागु भवति।" cp. LŚ. 8. 5. 12.

"ककुभावेवेति गौतमः।" LŚ. 8. 5. 13.

अनभिवर्त्तस्यैतद्[6] ब्राह्मणमिति।

10 "पवमाने रथन्तरम्" इति उद्धृत्य बार्हतानि स्यात्। LŚ. 8. 5. 9; PB. 16. 11. 3.

अष्टेडꣳश्च पदस्तोभः शाक्करवर्णस्य त्रिणिधनानुग्रहाय शक्करीणां च।

पवमानान्त्यं वा रथन्तरम्, तज्जामि।

एवमिव ब्राह्मणं भवति—"यद्वै महावृक्षौ समृच्छेते बहु तत्र विभग्नं

15 प्रभग्नꣳ शेते।" इति। PB. 7. 6. 16.

यद्यु वाजामि यौधाजयस्थाने दैर्घश्रवसं यदन्तरा सोमायन्तीति।

उपरिष्टादनुद्धरन् वा बार्हतान्यनुकल्पयेत्।

"तत्र पौरुमद्गं तृचसमाप्तये[8] भ्रातृव्यवधꣳ[9] ह्यस्मिन् ब्राह्मणं दर्शयति।" इति। cp. LŚ. 8. 5. 11.

20 यौधाजयं[10] [11]वोत्सेधमध्यं कृत्वा पवमानान्त्यꣳ रथन्तरम्।

आन्धीगवनिषेधो[12] वृत्तिग्रहणात्।

वामदेव्यꣳ सर्वाभिवादनार्थमिति[13] धानञ्जय्यः।

प्लवश्चेद् ब्रह्मसाम स्यात्।

"त्वमिन्द्र प्रतूर्तिषु" इति। SV. 1. 311; 2. 987; RV. 8. 99. 5.

25 एतास्वेता रूपसम्पन्ना इति।

श्यैतीयासु[14] वा बृहत्पृष्ठत्वात्।

---

1 ०नीया। C; ०नाय (०या J) इति। G1, G2, J; ०नीयाहनि। K. 2 अर्हेयं B; इन्ये C. 3 भवन्तीति C, G1, G2, J. 4 ऋषभ्यृषेत्यर्थातु G1, G2, J, K. 5 ०न्तीति K. 6 ०भिनिव० J, K. 7 ०ष्टेऽश्च C; ०ष्टेऽश्व G1, G2, J. 8 ०माधये G1, G2, J, K. 9 भ्रातृव्यवꣳ ह्या० C; भ्रातृवधं ह्या० G1, G2; भ्रातृवधꣳ स्या० J. 10 ०जया G1, G2, J, K. 11 वैतां वोत्सेधमध्यमां B; पेतवोत्सेधमध्यां G1, G2, J, K. 12 ०गवस्य नि० C, G2, J, K; ०गवस्य निषेधौ G1. 13 सर्चि वाभि पदनार्थ इति C, G1, G2, J, K. 14 श्यैतयोनौ C, K; श्यैतयोयोतो G1, G2; श्येतयौ J

अथैष[1] एकत्रिकः प्रजापतीप्सामुपकृतः ।
तत्रैतावुत्सेधनिषेधौ ।
प्राजापत्यादह्नो[2] निषेधः ।
ब्रह्मसाम श्रायन्तीयस्यर्चि, एषा श्रितवती प्रायश्चित्तकृत्येभिरूपेति[3] ।
5 अतो यो द्रव्यविकारः प्रजापतीप्सया स भवतीति[4] ॥ १० ॥

अथ व्रात्यस्तोमाः ।
तत्र षोडशाशीःस्तोमः ।
स एष द्वात्रिंशशो विकृतः[5] ।
तमच्छावाकसाम्नो निदधाति ।
10 एतदानुष्टुभं[6] स्थानमिति ।
अनन्तरा द्वात्रिंशप्रयुक्तिर्भविष्यतीति ।
पवमानयोर्ज्योतिष्टोमानीतराणीति[7,8] ।
तत्र या वीर्यप्रवादा बलप्रवादा[9] द्रविणप्रवादाः शुचिप्रवादा निषण्णवत्यः पवित्ताभिव्याहारा[10] अभिरूपास्ताः ।
15 यानि च गणसामानि निर्भृतवन्ति[11] तत्र यश्छन्दोयोगविकारो गणीचिकीर्षया स भवति ।
अपि च क्षुद्रीचिकीर्षया ।
अथ खल्वाह—"याम्निरुक्तं निधनमुपेयुर्गृहपतिरेवध्नुयादपेतरे[12] आर्श्नीत[13] ।" इति । PB. 17. 1. 8; cp. LS. 8. 6. 5.
20 कस्येदं ब्राह्मणं स्यादिति ।
नौधसप्रतिषेध[14] इत्याचार्याः ।
तद्धि निरुक्तनिधनं भवति[15], नेदमिति ।
अथापरम् आ इन्द्रा इत्येवास्य निधनं निराहुः ।
तद्यत्तथा स्यात् तन्निरुक्तं[16] स्यादिति ।
25 यथा समाम्नायं चैवं[17] ।
एवमनिरुक्तमिति ।

---

1 प्रजा० J. 2 पा is wanting in G1, G2, J, K. 3 ०कृतोऽभि० C. 4 भवति C, G1, G2, J, K. 5 विहृतः B, G1, G2, J, K. 6 ०भस्या० C, G1, G2, J, K. 7 पवसा० C. 8 ०णी G1, G2, J; ०राणि K. 9 C, G1, G2, J, K add गणप्रवादाः. 10 पवि० C, G1, G2, J, K. 11 हृत० C, G1, G2, J, K. 12 ०रान् C, G1, G2, J, K. 13 श्नीतेति C; श्नीतीति G1, G2, J, K. 14 नोधस इति निषेध G1; नौधस इति निषेध G1, G2, J; नौधस इति षेध K. 15 ०तीति C, G1, G2, J, K. 16 तूंनिरुक्तं रूपदिति G1, G2, J. 17 त्वेव C, G1, G2, J, K.

द्वावग्निष्टो[1]मस्तोत्रीयौ समामनामः ।
द्वये व्रात्या भवन्ति—शीर्षादय[2]श्चैषीकपा[3]वयश्च ।
शीर्षादीनां[4] सतोबृहतीष्वग्निष्टोमसाम कुर्यादिति धानञ्जय्यः ।
ज्यायसस्तान् ब्रुवते—ऐषीक[5]पाविनां प्रगाथबृहतीषु केनो[6] विद्यादिति ।
5 स्वयं प्र[7]ब्रुवीर[8]न्निति ।
ज्यायाँसः खलु शीर्षादयो ब्रुवते ।
षड् षोडश्युत्तरस्तं[9] खलूक्थ्यं करोति ।
षोडशयोः स्थाने चिकीर्षँस्तावाद्यवसानयोर्निदधाति ।
एवँ समाधिः पवमानाच्छावाकसाम्नामिति ।
10 कनिष्ठयज्ञ उत्तरः ।
ये तु[10] खलु जन्मना कनिष्ठा ये[11] ह्वो[12] वयसेति ।
ये जन्मनेत्याहुस्ताँ[13]न् कनिष्ठा इत्याचक्षते ।
अ[14]थाप्याहुः—ये वयसा सखिचारिणो हि व्रात्या भवन्तीति ।
व्याख्यातौ षोडशावच्छावाकसाम्नोः, उद्धरति श्रुध्यँ स्तोमसँरोधात् ।
15 तत्र मरुताँ सँ[15]स्तोभं करोति[16] ।
आ[17]शीःस्थानं मा प्र[18]च्योष्टेति विहरति श्यावाश्वा[19]न्धीगवे ऋचा[20] वीप्सन् ॥११॥
ज्येष्ठयज्ञ उत्तरः ।
ये तु खलु जन्मना ज्येष्ठा ये ह्वो वयसेति तत् पूर्वेणैव व्याख्यातम् ।
तत्र दाशरात्रिकाँश्च स्तोमान् उभे च[21] सामनी करोति ज्येष्ठयज्ञं कृत्स्नी-
20 चिकीर्षन् ।
अ[22]थापि द्वात्रिँशमा[23]शीःस्तोमँ साक्षाज्ज्येष्ठयज्ञेऽचिकीर्षीत् ।
स आदीयमानः सर्वान् स्तोमानादा[24]पयेत् ।
ताँस्तु यदेवं प्रयु[25]ङ्क्ते, पवम[26]नन्तरेण रोहो भवति ।
अ[27]ष्टाचत्वारिँशात् परस्तादन्तरिताविति त्रिणवत्रयस्त्रिँशौ ।

---

1 ०ष्टोमसम० G1, G2, J; ०ष्टोमसाम० K. 2 ०याश्चै० G1, G2, J. 3 ०या० C. 4 ०दीपाँस यं ब्रवीरन् ज्यायाँसः कु० G1, G2. 5 ए० B; एषीकया वीणां C, J, K; ऐ··· G1, G2. 6 ०नोद् B; केनो वि is wanting in G1, G2. 7 ब्रु० G1, G2, J. 8 ०रन् C, G1, G2, J, K. 9 षोडश इत्युत्तरस्तत्र C; षट् षोड (०डष K) इत्युत्तरस्तत्र G1, G2, J, K. 10 नु B. 11 यो G1, G2, J, K. 12 हा G1, G2, J, K. 13 ०स्ते हि C; ०तान् हि G1, G2, J, K. 14 यथाहुः C, J; अप्याहुः G1, G2. 15 ०स्वँस्तोम C. 16 करोतीति G1, G2, J, K. 17 ०शीःस्तोम C; ०शीःसाम G1, G2, J, K. 18 प्रो० B, K. 19 ०श्वाजी० B. 20 तृचा B. 21 व C, G1, G2, J. 22 तथा० B. 23 G1, G2 omit शमाशीःस्तो ··· ताँ (line 23). 24 ०दायेव C; ०दाये G2, J; K. 25 ०यु्क्त G1, G2, J, K. 26 ०नवकारेणारो० C, K; ०नवकरणे G1, G2, J. 27 आष्टा० G1, G2, J. K.

अभिरूपो[1]ऽन्ते द्वात्रिंशो[2] वा चि[3]कीर्षन् ।
"कनीयांसौ स्तोमावुपागुः" इति नु भवति । PB. 17. 4. 3.
त्रयस्त्रिंश[4]द्द्वात्रिंशावितीवैतद् भवति ।
द्वे त्रिणवत्रयस्त्रिंशे द्वे द्वात्रिंशत्रयस्त्रिंश इति वा खलु तत्[5] कुर्युः,
5 सर्वान्वै व[6]रुथानुपेयुरिति ।
अकुशलाऽनुव्याहृतान् कौषीतकीन् मन्य इति धानञ्जय्यः ।
एवं[7] ह्येवैषु सत्सु रोहो भवति ।
तत्र यो रोहोऽर्थ[8]कारितः स भवति ।
कथमनिष्टप्रथमयज्ञानां व्रा[9]त्यस्तोमा इति ।
10 अकर्तव्या इत्येके ।
अनारभ्य वदति—"य एतेनानिष्ट्वा" इति । PB. 16. 1. 2.
अथाप्येषां ज्योतिष्टोमे[10] प्रतिपद् विधीयते ।
अथापि यथा नानाहिताग्नीनामे[11]वमनिष्टप्रथमयज्ञानामिति ।
कर्तव्या[12] इत्यपरम् ।
15 प्रायश्चित्तार्था इमे भवन्ति ।
प्रायश्चित्तमु खलु पूर्वं विधीयते ।
अथापि ज्योतिष्टोम एव प्रायश्चित्तस्य पूर्वत्वं दर्शयति यथा कलशे दीर्णे विरिक्ते[13] सोमग्रा[14]वाणि विशीर्णे[15] इति ।
यद्वे[16]तत् "य एतेनानिष्ट्वा" इति, प्रकृतिभूतानामेतद् भवति । PB.
20 16. 1. 2.
यद्वे[17]तत्[18] प्रति[19]पद् विधीयत इति, इष्ट्वा व्रात्यस्तोमेनेत्येतदुपपद्यते ।
यद्वेतत् तद्यथा नानाहिताग्नीनामिति, सिद्धिकारितमेतद् भवति ॥ १२ ॥
अथाग्निष्टुत्सु या आग्नेय्यः पावकाभिव्याहारा ज्योतिष्टोमीभिः सदृशव्यञ्जना यथास्थानमभिरूपास्ताः ।
25 रुद्रवतीस्त्रिष्टुभः करोति ।
रुद्रो मरुतां पितेत्याहुः ।

---

1 ०रूपान्तो C. 2 द्वावि ॱशो C. 3 ०कीर्षित K. 4 ०शाद्द्वात्रिं० G1, G2, K; ०शाद्द्वास्त्रिं० J. 5 Wanting in J, K. 6 वारूढानुपे० C, G1, G2; वरूढापे J; वरुढानु० K. 7 इवं॰ G1, G2, J, K. 8 रोहार्थ० B. 9 माह्मस्तोमा G1. 10 ०ष्टोमो मे B. 11 ०मप्यनि० C, G1, G2, J, K. 12 ०व्यता G1, G2, J, K. 13 ०ऽतिरि० B, K. 14 ०ग्रावापि C; ०ग्राव्यूपि G1; ०ग्राह्मपि G2; ०ग्राव्यूपि J, K. 15 शीर्ण C; दीर्णे K. 16 यध्वेतत् B; यद्वेतय G1, G2, J; तद्वेतत् K. 17 तद्वे० K. 18 पद्… मिति is wanting in G1, G2, J, K. 19 पठिताभि० C; पविताभि० G1, G2, J, K.

तेन मरुत्वद्[1]नुग्रह इति ।
गायत्रीष्वग्निष्टोमसाम ।
[2]एतदाग्नेयच्छन्द इति ।
स यदे[3]ताः
5 'उप त्वा जामयो गिरः' इति, SV. 1. 13; 2. 120; RV. 8. 103. 13; PB. 16. 5. 1.
एता वायव्या इति ।
तत्र[4] वारवन्तीयं गायत्रीसाम[5], ऐडमृचा स्तोत्रीयम् ।
तेन प्रच्युतं यज्ञायज्ञीयम[6]न्यं करोति ।
10 अत्र हि स तृचतां लभते ।
तदेतत् स्तोमसंरोध एवमेव भवति ।
ऐन्द्रीषु[7] प[8]रेषां करोति ।
ऐन्द्री[9] सु[10]त्येति ।
सोऽयं पू[11]र्वः सर्वा[12]ग्नेयः ।
15 ए[13]कं स्तोत्रं चिदैन्द्रं भविष्यतीति ।
स यदग्निष्टोमसाम, अन्ताख्यानि कर्माणीति ।
सप्तदशे विषमे स्तोमे सत्यनध्यासां बृहतीं करोति ।
कस्यै[14] हेतोरिति ।
न ह्याग्नेयी साध्यासा विद्यते ।
20 तस्यां च[15]त्वारि[16] सामानि ।
तृचावभित एक[17]र्चौ, मध्य एवं तृचप्रायणम्, तृचोदयनं भविष्यतीति ।
त इमे पञ्चानुवाकाश्चत्वारः कल्पाः ।
स एष प्रथमः सर्वेषामेव सार्ष्टः स्यात् ।
अपि वा प्रथमस्य द्वौ स्याताम् ।
25 कथं भक्ष्या इति ।
आग्नेया इत्येके ।
एवं यथा[18]र्थं भवति ।
अथाप्यत्र सुविप्रतिषिद्धरूपाण्य[19]नाग्नेयानि भवन्ति ।

---

1 B adds मे. 2 एवं तदाग्नेयं छ० G1, G2, J, K. 3 ०देवा G1, G2, J, K. 4 Omitted by G1, G2, J. 5 ०सामैव संतृचस्तोत्रीया B. 6 ०मन्त्यं C, K; ०मत्यं G1, G2. 7 ऐन्द्री G1, G2, J. 8 Omitted by C. 9 Wanting in C. 10 सु० G1, G2, J. 11 पूर्वे॰C. 12 स आग्नेय्यः C; सर्वं आग्नेयं G1, G2, J. 13 एक is wanting in C. 14 कस्या G1, G2, J. 15 रि सामानि ··· पञ्चानु is wanting in G1. 16 सामनि B. 17 ०र्चो C. 18 ०र्थ्यं B. 19 ०ण्याना० G1, G2, J, K.

[आग्नेयानि[1] यथा हविःस्तुतिः पवमाना इति ।
यथाप्रकृतीत्यपरम् ।
भक्ष्यविशेषान् विदधन्नाग्निष्टुत्सु विदधाति ।
अथापि[2] कृतावेवायथार्थं भवन्ति ।]
5 यथा मैत्रावरुणाज्ये[3]ऽग्निष्टोमसाम्नीति ।
उत्तरेष्वग्नय इति स्थाने सुब्रह्मण्यायां देवा इति ब्रूयात् । cp. PB. 17. 5. 7.
ऐन्द्रत्वादग्निष्टोमसाम्न इत्येके ॥ १३ ॥ Ārṣ. K. V. 60 a.

---

1 आग्नेयानि ... भवन्ति (line 4) is wanting in B. 2 अपि B. 3 ०वरुण्य-स्याग्निष्टो० C, K; ०वरुण्यस्याग्नेष्टो० G1, G2, J.

अथ सप्तमः प्रपाठकः[1]

अथ[2] त्रिवृतः ।
तेषां [प्रथमस्य[3]] यो द्रव्यविकारो निर्वाकार्थेन स[4] ह भवति ।
पुरोधाकामयज्ञ उत्तरः ।
स्थपतिसवो[5] वा[6]यम्, समानाः श्रैष्ठ्ये[7] संवृणीरन् । cp. PB. 17. 11. 6.
5 ब्रह्मसवो वा[8], ब्राह्मणस्य यज्ञेन जिजनिषमाणस्य त्रिवृतः[9] स्तोम[10] सम्पद्यते ।
लघुरीप्सायामभिरूपोऽग्रस्तोमश्च[11], अग्रमेव गच्छति यः पुरोधां यः स्थापत्यम्, यस्य तु स्याद् ब्रह्मसव इति । cp. PB. 17. 11. 5.
एषा ब्रह्मणो भक्तिरिति ।
अनुसवनं दक्षिणा ददाति ।
10 कस्य हेतोरिति ।
बृहस्पतिरभिषिच्यमानो देवगणेभ्यो दक्षिणा आजहार ।
वसुभ्यः[12] प्रातःसवने रुद्रेभ्यो माध्यन्दिने सवने[13] आदित्येभ्यस्तृतीयसवनेऽश्वद्वादशा माध्यन्दिने[14] ददाति । cp. LŚ. 8. 7. 6; PB. 17. 11. 2; Āp. Ś. 22. 7. 1–4. 7. 12; Kāty. 22. 17. 9; BŚ. 27. 1. 2.
15 दक्षिणा वेलायाम्[15]न्यां[16]धित्सन् मन्यते[17] ।
इयेनेनेषोर्द्रव्यसमुद्देश[18] उक्तः । cp. LŚ. 8. 7. 12, Katy. 22. 5. 30.
उद्धरति शाकरवर्णम् ।

---

1 In C only. 2 अथा G1, G2, J. 3 Wanting in B. 4 सम्भ० G1, G2. 5 ०मनो G1; सतो G2, J, K. 6 वयम् C. 7 श्रेष्ठो Cक; श्रेप्स्यं Cख, G1, G2, J; श्रेष्ठ्यं K. 8 Wanting in G1, G2. 9 ०ष्य० K. 10 ०त॰ B. 11 ०पो यः स्तो० C. 12 वस्तु० C, G1, G2, J. 13 Omitted by C. 14 म० C, G1, G2, J. 15 ०या अयीयीत्स B. 16 ०न्वा is suggested. 17 मते K. 18 इयेतेनैषोद्र० B; इयेनेतिषोषोर्द्र० G1, G2, J, K.

साद्यस्क्रसाम तद् भवति ।
तत्रैतज्जरावोधीयं[1]मेतद् गायत्रीसामापन्नम् ।
अपि च रुद्र[2]वद्योनिवधार्थेऽभिरूपम् ।
उद्धरति वषट्कारनिधनम्, तस्य स्थाने सप्तहङ्करोति ।
5 एतद् बृहता समानयोनि[3]वधार्थेऽभिरूपम् ।
उद्धरति[4] बृहत्, तस्य स्थाने वषट्कारनिधनम् ।
एषा देवेषुर्भवति ।
तामाशीः[5]स्थान ईप्सन् ॥ १ ॥

स[6]र्वस्वारे सप्तर्चनवर्चान् करोति, एते प्राणोक्ता इति ।
10 तेषां विलोपेन प्राणविलोपो भविष्यतीति ।
स यत् प्रथमाँस्तृचान्, एते रूपसम्पन्ना इति ।
चतुर्ऋचमैन्द्राग्नँ समामनामः ।
प्रवत्यासां द्वितीया, तामुद्धरति, सर्वाः प्रवत्यो भविष्यन्तीति ।
गायत्रीणां पृष्ठापदानाद् बृहतीषु मैत्रावरुणसाम करोति त्रिस्थानां बृहतीं
15 पृष्ठेषु चिकीर्षन् ।

तं[7]त्रैकं मैधातिथँ स्व[8]योन्यापन्नम् ।
पुरस्तादेतत् स्थानम्, अ[9]भिवतीषु होत्रिकपृष्ठानि स्वयोनीनि चिकीर्षन् ।
पराग्[10] बृहतीष्वग्निष्टोमसाम, प[11]रागनुप्रहरतेति ।
[12]तौ यदावर्त्तयति, एवं प्र[13]वत्या प्रक्रम इति ।
20 तत्र यज्ञायज्ञीयमन्तसमाधये ।
तस्यात्तरसँसङ्गेन प्रस्तावयति प्रगाथीकाराय पूर्वस्यां[14]श्चान्त्यं मेयाया-
श्चाद्यम् ।

एषोऽक्षरसँसङ्गः ।
तद्यत्र यत्रैतेषां तृचापत्तिर्बृहद्रथन्तरयोर्यज्ञायज्ञीयस्य चैवमे[15]तेषां
25 प्रस्तावयति ।

---

1 ०यगायत्रीणाम० B. 2 रुद्रदेवत्योरिव० B. 3 ०निवधार्थे० C; ०निर्धाध्ववधार्थे० G1, G2, J; ०निर्धावधार्थे K. 4 C, G1, G2, J add here स्वारे सप्तर्चनवर्चा करोत्येते प्राणोक्ता इति ते. 5 ०शीर्ध्वनिर्द्रेप्सन् C; ०शीर्धाध्वनि ई० G1, J; ०शीर्ध्वाध्वनि ई० G2; शीर्वाध्वनि ई० K. 6 G1, G2, J add स्वा. 7 तत्रैतन्मै० C, K; तत्रैतमै० G1, G2, J. 8 स्वयोन्युपन्नं C; स्वायान्यपन्नं G1, G2, J. 9 अनभिवतीष्वप्रवतीषु C; अनंभ(०भि J) वतीष्वप्रवतीषु G1, G2, J, K. 10 विराड् Ck. 11 प्रागादनु० C, K; प्राणादनु० G1, G2. 12 तावदा० B. 13 प्रवृत्या C; प्रत्या G1, G2. 14 ०स्याश्चान्यज्ञे या याश्चाघम् C. 15 ०मेवैषां C, K; ०मेविषां G1, G2, J.

"दैर्घश्रवसꣳ स्वासु यदि जीवेदिति तु भवति, न चेद[1]शकन्मर्तुमुत दीर्घꣳ[2] श्रृणुयादिति ।
अपि वा प्रायणार्थमेव स्यात् ।" Ārṣ. K. V. 62 a.
स्वा[3]रं च [हिं[4]] भवति प्रवद्योनि चेति[5] ।
5 ककुबुत्तरासु ककुबुत्तरास्थानꣳ हि, सर्वबृहतीष्वेके ।
एवं स्वर्गकामयज्ञे ।
[6]अपि वा स्वर्गो[7]क्तां बृह[8]तीं स्वर्गका[9]मयज्ञेऽचिकीर्षीत्[10] ।
पुरस्तान्नानाबृहत्य इति वा ।
तन्त्रे विप्रतिपद्यन्ते ।
10 [11]ज्योतिष्टोममित्येके ।
गायत्रीभ्यां जानीम इति ।
आशीस्तन्त्रमित्यपरम् ।
प्रवतीभिरयं क्लृप्तः ।
ता एताः प्रवत्य इति ॥ २ ॥

15 [12]नवमः पटलः

अथातश्चातुर्मास्यानि ।
स एष षडहो विहृतः ।
तत्र षाडहिकान् स्तोमान् करोति षडहन्यायेन[13] ।
ता[14]ꣳस्तु यदेवं प्रयुङ्क्ते[15], एवꣳ रोहो भवति ।
20 अथापि नानादीक्षा[16]वभृथानीमानि पर्वणि[17] भवन्ति ।
तत्र सर्वाण्य[18]हान्युपक्रमः ।
स्तोमेन प्राचिक्र[19]मिषीत् ।
अथाप्येवमेनाननवच्छिन्नाननन्ततोऽध्यवस्यतीति ।
[20]अवयन्ति तन्त्राणि पृष्ठानि सꣳस्था इति ।
25 अह्नां व्यु[21]त्क्रमादेकाहिकान्येकाहे, द्वैरात्रिकाणि द्विरात्रे ।
उद्धरति [22]रात्रिमपरिकाण्डतया द्व्यहस्य ।

1 चेदशतमर्तुमुत B; चेदृशकर्त्तुमुत C; नवेदशकन्मर्तुमुपंत J. 2 दीर्घः B. 3 स्व० B. 4 Wanting in B. 5 नेति C. 6 रोहोऽपि C, G1, G2, J, K. 7 ०र्गो G1, G2, J, K. 8 बृहत्तां G1, G2, J. 9 ०मे यज्ञे० C. 10 ०र्षन् B; ०र्षं G1. 11 प्रथमतन्त्रमि० C, G1, G2, J, K. 12 In B only. 13 G1, G2, J add ह. 14 ०स्तत्र C. 15 प्रयुज्यते B. 16 ०क्षावभृतानि B; ०क्षत्रे० G1, G2, J. 17 सर्वाणि C, G1, G2, J. 18 ०ह० C. 19 ०क्रमयिषीत् B. 20 उपयन्ति C; अपयन्ति G1, G2, J, K. 21 विक्रमादैका० C, K. विक्रमादैकानेकाहे G1, G2, J. 22 रात्र० B; G1, G2, J omit रात्रि० ··· उद्धरति (p. 117. 2.).

त्रैरात्रिकाणि त्रिरात्रे।

उद्धरति वामदेव्यं चास्य प्रत्नं[1] चापरिकाण्डतया त्र्यहस्य।

नाना ब्रह्मसामानि, नानात्वार्थं[2] श्यैतनौधसवर्णानीति[3]।

बार्हद्रथन्तरपृष्ठ्याद्यौक्तस्तुचमेवादाशरात्रिकम्।

5 तदेतदर्[4]पूर्णदर्वानुग्रहाय।

'शग्ध्यू३षु[5] शचीपते' इति। SV. 1. 253; 2. 929; RV. 8. 61. 5.

प्रथमस्याह्नो ब्रह्मसामस्तोत्रीयो[6] वैश्वदेवस्यायं स्थानमापन्नः, एषा[7] विश्ववती भवतीति।

पञ्चप्रतिपत्कान्यहानि[8] ऋत्वभीज्यायाम्, पञ्चर्तुः[9] संवत्सर इति। cp. PB.

10 18. 9. 5; ŚB. 1. 2. 5. 12; 1. 5. 2. 16.

षण्णामह्नां प्रतिपदः, षडृतुः संवत्सर इति।

"त्रिष्टुभं वैश्वकर्मणिकं[10] करोति।

न हि गायत्री विद्यते[11]।" Ārṣ. K. V. 65b.

समापद्यन्ते त्रिरात्रे भागाः, तदनु[12] द्रव्याणि।

15 हाविष्मतं[13] द्वितीयेऽहनि त्रिरात्रस्य कुर्यादिति धानञ्जय्यः।

ऋद्धिसामं[14] मा प्रच्योष्टेति।

यौक्ताश्वमेवेति गौतमः।

कृतं हाविष्मतं[13] द्विरात्रे।

तृतीयस्थानं च हाविष्मतं त्रिरात्रे[15]।

20 तत्रैतत्[16] संहितं[17] शुनाशीर्यं सन्तानायं[18]

'स सुन्वेयो वसूनाम्' SV. 1. 582; 2. 446; RV. 9. 108. 13; PB. 13. 11. 2.

'प्राणा[19] शिशुर्महीनाम्' इति। SV. 1. 570; 2. 363; RV. 9. 101. 1; PB. 13. 5. 3.

25 पञ्चमषष्ठाभ्यामुष्णिक्ककुभौ षडहं[20] समीप्सुः प्रत्याहरति।

एतेन न्यायेन त्रिरात्र[21]प्रभृतिष्वहर्गणेष्वेते[22] भवतः।

---

1 प्रत्नां C, G1, G2, J, K. 2 नानार्थं C; ०र्थं G1, G2, J. 3 ०नि C, K. 4 ०दर्था० C, G1, G2, J, K. 5 शन्ध्यूषु B. 6 ०त्रीया K. 7 एषां C, G1, G2, J, K. 8 ०प्रतिकान्यहाहाः वृत्वभी० G1, G2; ०प्रन्कान्यहाहाः वृत्वभी० J; ०प्रतिकान्यहान्मृत्वभी० K. 9 ०र्त्तवः B. 10 ०र्मणीं C, G1, G2, J, K. 11 ०न्ते B. 12 ०दानु० B; C, G1, G2, J, K repeat तदनु द्रव्यानि ··· अयारुचे (p. 118 no. 13). 13 ०न्तं G1, G2, J. 14 ०सामाप्र० C; ०सामप्राप्तच्यो० G1. 15 J omits त्रे. 16 J omits त. 17 ०तः K. 18 ०नाद्य G1, G2, J. 19 प्राणाः C. 20 ०हमभीप्सुः प्र० K. 21 द्विरात्र० C, G1, G2, J, K. 22 ०ह्वरगणेध्येते J.

न चेत्[1] [कृतागमो[2] भवति ।
द्विपदातिच्छन्दसो[3] दशरात्रन्यायेन, ते जगत्याः पुरस्तान्निदधाति ।
अन्तच्छन्दसी अन्त इति, तेऽयं[4] न सर्वान्ते नासवनच्छन्दोऽन्तेऽचिकीर्षीत् ।
5 तत्रैता वाजदावर्योऽन्तान्विताः—"अया रुचा" इति[5] । SV. 1. 463; 2. 940; RV. 9. 111. 1; PB. 16. 16. 8.
नित्यवत्सा[6] स्वयोनयः ।
एतेन न्यायेन त्रिरात्रप्रभृतिष्वहर्गणेष्वेते[7] भवतः ।
न चेत्] स्तोमसंरोधो भवति ॥ ३ ॥
10 अथैते सप्तदशाः ।
तत्र बार्हतेष्वाष्टमिकं[8] पञ्चर्चं करोति, एतद्भक्तिनोह्य इति ।
तार्तीयकं रथन्तरपृष्ठेषु, एतद्रथन्तरभक्तिन इति ।
अनिरुक्तः[9] प्रथमः ।
तत्र यो द्रव्यविकारो निर्वाकार्थेन स भवति ।
15 अथ खल्वाह—"मारुती भवति, पौषी भवति, वैश्वदेवी भवति" इति । cp. PB. 18. 1. 14, 15, 17.
केनो[10] विद्यादेतद्देवत्या इमा भवन्तीति ।
एत्तद्देवत्येषु सूक्तेषु[11] समाम्नाता इति ।
यानि गोस्सामानि तानि सामानि[12] ।
20 अनुपृष्ठं संहितमेवैतदाग्निष्टोम्यात् क्रियते ।
स्वर्गकामयज्ञ उत्तरः ।
तत्र यो द्रव्यविकारः स्वर्गकामयज्ञत्वात् स भवति ।
अथ खल्वाह—"सोमपीथस्याऽविदोहाय[13]" इति[14] । PB. 18. 2. 12.
एतदपायवदिति ।
25 स्वर्गकामयज्ञ[15] एवोत्तरः ।
तत्र[16] गोस्सामानि बाहुदाक्षिण्यात्[17] ।

1 B omits कृतागमो ··· न चेत् (line 9). 2 कृसागमो G1, G2, J, K. 3 पदा० G1, G2. 4 ते यत्न G1; ते यन्न G2, J. 5 See p. 117 no. 12. 6 ०वश्य G1; ०वत्स G2, J. 7 ०ते ज्याष्ठ G1, G2, J; ०ते त्याष्ट० K. 8 द्वृहद्म० C, G1, G2, J, K. 9 अम्रिरुक्तः G1, G2, J. 10 को नो B; केना K. 11 Wanting in C; क्तेषु G1, G2, J. 12 ०न्यम् G1, G2, J, K. 13 C, G1, G2, J, K repeat तदनुद्रव्याणि ··· अया रुचे after ०पीथ; C puts ऽ after रुचे (see p. 117 no. 12). 14 ०दोहायेत्यनन्यत्रभावा ये त्वेतदवोचदिति स्वर्ग० C, G1, G2, J, K. 15 ०काम एव यज्ञ G1, G2. 16 तत्रोभे सामनी C, G1, G2, J, K. 17 बहुदक्षि० C; बाहुदक्षि० G1, J.

अपि वा स्वर्गकामयज्ञत्वादेव ।
एवमिव ब्राह्मणं भवति—“अनड्वाहौ वा एतौ देवयानौ यजमानस्य यद् बृहद्रथन्तरे” इति । PB. 12. 4. 14.

वैश्ययज्ञ उत्तरः ।
5 तस्य कण्वरथन्तरम् ।
“अभि त्वा पूर्वपीतये” इति, SV. 1. 256; 2. 923; RV. 1. 19. 9; 8. 3. 7.

एतासु कुर्यादिति लामकायनः ।
यथा वा[2]प्यर्यायाः शूद्रस्[3]तल्पमुद्दिशेत्[4], अतो देशीयमेतद् ।
10 य एतद्रथन्तरस्यर्क्षु कुर्यात् एतासु त्वेव स्यात् ।
तासाँ हि स्थानमापद्यते ।
अपि[5] चैताः परोक्[6]पृष्ठे षडह इति ।
“सर्वबृहतीषु नान्यद्[7] बृहद्रथन्तराभ्यामर्हति ।
यत्[8] क[9]कुबुत्तरासु स्यात्” तं खलु विश्ववतीभिः कल्पयति । Ārṣ. K. V. 68a.
15

एतद्भक्तिर्वैश्य इति ।
तन्त्रे विप्रतिपद्यन्ते ।
ज्यौ[10]तिष्टोम[11]मित्येके ।
गायत्रीभ्यां जा[12]नीम इति ।
20 आशीस्तन्त्रमित्यपरम् ।
विश्ववतीभिरयं क्लृप्तः ।
ता एता विश्ववत्य इति ।
तत्र यो द्रव्यविकारो वैश्वदेवीचिकीर्षया स भवति ।
यान्यायुषः सामानि तानि सामानि, अनुतन्त्रं या[13]न्यन्यानि पृष्ठा[14]नि,
25 ब्रह्मसामभ्यां विशोविशीयम्, उत्तरस्या[15]मग्निष्टोमसाम ककुबुत्तरासु ककुबुत्तरास्थानँ हि ।

स्वर्गकामयज्ञ उत्तरः ।
तत्र खलु गोस्तन्त्रं करोति ।

---

1 Wanting in K. 2 अप्यन्यायाः B. 3 ०त० G1. 4 ०मुद्देशे० B; ०मुद्दिशे० G1, G2, J, K. 5 Wanting in C, G1, G2, J, K. 6 ०क्षे पृष्ठे C; ०क्षपृष्ठ्ये K. 7 ०नान्यत्र K. 8 Wanting in C, K. 9 पक्षमुत्त० C; कुबुत्त० G1, G2, J. 10 ज्योति० C, G1, G2, J, K. 11 ०ष्टोमतन्त्रमि० G1, G2, J, K. 12 जगतीम G1, G2. 13 यान्यानि G1, G2. 14 पृष्ठ B, K. 15 ०स्याग्नि० B.

एतदन्[1]तं तन्त्रतरम् ।
अन्तविधोऽयं भवति ।
"अनिरुक्तं प्रातस्सवनम् ।" PB. 18. 6. 7.
तत्र यो द्रव्यविकारो निर्वाकार्थेन स ह[2] भवति ।
5 अथैतद्देवस्थानं स्थितनिधनम्, उतास्मिन् श्रीस्तिष्ठेदिति ।
तस्य रथन्तरं पृष्ठं वाजपेयसाम[3]भिर्बृहत् करिष्यन् भवति ।
अ[4]त्तोक्तोऽर्कः, वाजोक्तमन्नम् ।
'त्वं नश्चित्र ऊत्या' इति SV. 1. 41; 2. 973; RV. 6. 48. 9.
वारवन्तीयमग्निष्टोमसाम ।
10 एता राध[5]स्वत्यः स्वर्गकामयज्ञेऽभिरूपाः [6]ककुबुत्तरासु ककुबुत्तरास्थानं हि[7], सर्वबृहतीष्वेके ।
तद् व्याख्यातं सर्वस्वा[8]रे ।
[9]अनुतन्त्रमुक्थ[10]प्रणयः ॥ ४ ॥
"अथैषोऽभिषेचनीयः ।" PB. 18. 8. 2.
15 "तस्य द्वात्रिंशाः पवमानाः ।" PB. 18. 8. 3.
अनुपूर्वमावृत्तिस्थानेषु पञ्चदशप्रभृतीन् बा[11]र्हतस्तोमानिति ।
ते प्रा[12]प्तस्थाना इति ।
तत्रोभे सामनी बा[13]हुदाक्षिण्यात् ।
अथाप्युभे वीप्[14]साया अभिरूपे ।
20 उक्थसंस्थं करोति ।
द्वितीयेयमिज्या ।
तत्र द्वितीयां संस्थामिति व्याख्यातम् ।
बहिष्पवमानमन्यत् कविमतः ।
ते[15] खलु शश्वद् भाल्लविन आग्नेयीं पावमानीमुद्धरन्ति ।
25 यथा त्रिवृतं न वयमुद्धरामः, पृष्ठेभ्य इयं प्रति, एवं पृष्ठानामविलोप[16] इति ।
अथापि स्तोमः[17] प्रधानतरच्छन्दस इति ।
आनुष्टुभं पर्या[18]यं क[19]रोति, आनुष्टुभोऽभि[20]राजेति ।

1 ॰न्ततन्त्र॰ C, G1, G2 J, K. 2 Wanting in C, G1, G2, J, K. 3 ॰महि॰ G1, G2, J, K. 4 अह्नोक्तो॰ C. 5 राद्धवत्य B. 6 ककुबुत्तरः सु B. 7 ॰दभि B. ॰स्थां हि॰ G1. 8 ॰स्वारो C; ॰सुरे G1, G2, J, K. 9 ॰नत॰ B. 10 ॰क्थः प्रणवः B; ॰क्थप्रणयाय Ck. 11 भागस्तोमाने C, G1, G2, J, K. 12 प्राप्ता स्था॰ C, G1, G2, J, K. 13 आहुर्दाक्षि॰ C; बाहुदक्षिणयतथातथा॰ G1; बाहुदक्षिणयतथा॰ G2. 14 ईप्सायामभि॰ C, G1, G2, J, K. 15 तत्र C. 16 ॰लोकप G1, G2, J. 17 सोमप्र॰ K. 18 पर्यासं C, G1, G2, J, K. 19 करोतीति B. 20 ॰भो ह्विराजेति C; ॰भो ह्विराजे G1, G2, J, K.

"तासां मध्यमामुत्तमां कुर्मः"[1], सूर्यवत्यन्तेऽभिरूपेति । Ārs. K. V. 71a.

सम्भार्यान्वितान्याज्यानि ।

अथ खल्वत्र राजसामानि करोति, राजसूयो राजसामानीति ।

5 एकादश करोति त्रिष्टुप्सम्पन्नानि, त्रैष्टुभोऽभिराजेति[2] ।

सर्वच्छन्दस्यानि करोति ।

स्वस्य[3] कृत्स्न[4]विकाराय न पाङ्क्तं करोति, न हि पाङ्क्तं राजसाम विद्यते ।

एकमुदाहरन्ति सत्यश्रवसो वाय्यस्य—

'महे नो अद्य बोधय[5]' इति । SV. 1. 421; 2. 1090; RV. 5. 79. 1.

10 अ[6]राजसूययाजी स बभूव ।

नेह[7]राजसूययाजिनां सामानि क्रियन्ते ।

बार्हतानि भूयिष्ठानि करोति ।

सवनच्छन्दो बृहती ।

अथाप्येतन्म[8]ध्यन्दिनच्छन्दो भवति ।

15 बार्हतानि वा[9] भूयिष्ठानि लभन्त[10] इति ।

द्वे गायत्रीसामनी[11] करोति ।

द्वे हि[12] पवमानमुखयोर्गायत्र्यौ भवतः ।

ते कुशलं यदनुपूर्वं[13] पञ्च माध्यन्दिने[14] षडार्भवे, एवं रोहो[15] भवति ।

देवस्थानं वरुणसाम सोमसामेति देवराज्ञाम्[16] ।

20 सैन्धुक्षितं दैर्घश्रवसं पार्थं काक्षीवतं ब्राह्मणसाम सैंद्राजसामसूप[17]सङ्ख्यायते ।

क्षत्रमार्गेण चचार राजसूययाजी बभूवेति ।

दैवोदासं बाभ्रव्यश्वं वैतहव्यं त्रासदस्यवमिति मनुष्यराज्ञाम् ।

द्वैपद उक्थप्रणयः ।

25 विश्व[18]शार्ङ्गमिदं कर्म ।

द्विविधेन प्रतिष्ठेति[19] ।

---

1 कुर्युः C. 2 ०भो हि रा० C, G1, G2, J, K. 3 सर्वस्य C, G1, G2, J, K. 4 कृत्स्नीका० C, G1, G2, J, K. 5 बोधयन्ति । J. 6 राज० C, G1, G2, J, K. 7 नेह रा० C. 8 ०न्मा० C. 9 वाव C, G1, G2, J, K. 10 ०त C, G1, G2, J, K. 11 ०सामानी G1. 12 बहिष्पवमानं मु० C, G1, G2, J, K. 13 ०पूर्व्यं B. 14 ०नेव G1, G2, J; ०ने च K. 15 करोति ह्य for रोहो in B. 16 ०राज्ञ B. 17 सदद्राजसा०सू० B; साद्रसामसूयसं० G1, G2; साद्राजसामसूयसं० J. 18 ०कुमुक्थं चयेन प्र० B. 19 ०ष्ठति G1, G2.

तत्रैतत् सत्रासाहीयꣳ सोढसंहीयं[1] नाम राजयज्ञेऽभिरूपम् ।
अनुपृष्ठमितरे ।
सदोविशीयं दशपेयस्य[2] मध्यन्दिने विशीयं राजयज्ञेऽभिरूपम् ।
वारवन्तीयम्[3] अग्निष्टोमसाम स्वास्वेवꣳ सु[4]वारवन्तीयमिति ॥ ५ ॥
5 "प्रतीचीनस्तोम[5] उत्तरः ।" Ārṣ. K. V. 72 a.
तं खलु बृहत्पृष्ठं करोति ।
एतद्भक्तिः क्षत्रिय इति ।
अतिरात्रसꣳस्थं करोति ।
चतुर्थीयमिज्या, तत्र चतुर्थीꣳ सꣳस्थामिति ।
10 अथापीदं [6]द्वितीयं यज्ञस्थानं, यदहीनो द्वितीयो वर्णः क्षत्रिय इति ।
ज्यो[7]तिष्टोमं तन्त्रमेतत् ।
इह भक्तितन्त्रयोरयमु लोकः क्षत्रियस्येति ।
स्तोमकारित आवापः ।
व्युष्टिद्विरात्र उत्तरः ।
15 तत्रामुमेव द्विरात्रमाहरति ।
तत्र दशस्तोत्रीया उपाहरति ।
संवत्सरसम्पदे चतुर्विꣳशावुत्तरौ पवमानौ करोति ।
बहिष्पवमानसमाधये स[8]प्तदशत्रिणवौ प्राच्यावर्यति ।
तौ[9]वनन्तरयोः स्तोत्रीय[10]यो[11]रनुगृह्णाति ।
20 एकविꣳशान्युक्थानि करोति ।
विभ्रꣳशाशङ्को द्विरात्रः ।
तत्रामुमेव प्रतिष्ठास्तोममभिप्रायुङ्क्ते ।
अथैतद् विꣳशोविशीयꣳ राजयज्ञेऽभिरूपम् ।
क्षत्[12]स्य धृ[13]तिः किम[14]र्थमिति ।
25 आलुब्धजनपदोऽयꣳ राजा, तस्य क्षत्रसंयमार्थः क्षत्रसंयमार्थः ॥ ६ ॥

द[15]शमः पटलः

अ[16]थैतान् द्वन्द्वा इत्याचक्षते ।
तेन सर्वे द्वन्द्वा द्वन्द्वे[17] मि[18]श्रवन्तो भवन्ति ।

---

1 सोढवन्नाम रा० C; सोढवन्नमे रा० G1, G2, J. 2 दशवेष० B, K. 3 वारयन्तीयम् C. 4 सु is wanting in C. 5 B omits स्तोम. 6 J omits द्वितीयं ··· यदहीनो. 7 ज्यौ० K. 8 स सप्त० B. 9 ०यतो B. 10 वन० B, G1, G2, J. 11 स्तोत्रयोर० C, J, G1, G2, K. 12 क्षत्रियस्य C. 13 वृत्तिः B. 14 ०र्थं इति G1, G2, J, K. 15 In B only. 16 अथातो C. 17 द्वन्द्वान् G1, G2. 18 मिश्रास्तु C; मिश्रास्तु G1, G2, J, K.

यौ यावेषाꣳ समानमर्थमुपकृतौ तौ [तौ[1]] द्वन्द्वौ भवतः ।
राज्यकामयज्ञः प्रथमः ।
तस्य यदेवंविधस्तोमयोग[2] एवमष्टावेकविꣳशान् सम्पद्यत इति ।
सप्तदशं पवमानेषु निदधाति ।
5 एष विद्स्तोमो भवति ।
विद्कामो राजा ।
अथाप्येते ग्रामा इव सुत्याया यत् पवमानाः सम्पूर्णाश्छन्दोभिः[3] सामभिरिति ।
तत्र विद्स्तोमꣳ सप्तदशमचिकीर्षीत् ।
अनुपूर्वमावृत्तिस्थाने[4]ष्वितिशिष्टान् भागस्तोमान् ।
10 एवं चतुष्टोमो भवति ।
विश्रꣳशाशङ्कमिदं कर्म ।
स चतुरेण प्रतिष्ठेति ।
व्याख्यातमौभयसाम्यमभिषेचनीये ।
ज्यौतिष्टोमं तन्त्रम्, तद् व्याख्यातं केशवपनीये ।
15 अन्नाद्यकामयज्ञ उत्तरः ।
तत्र चतुर्ऋचमाहरति[5] ।
एतदन्नाद्यसꣳस्तावमिति ।
आमहीयवादुत्तरमाभीकम्[6] ।
एतद्वृष्टिसꣳस्तावं वृष्टिजमन्नमान्धीगवादर्कपुष्पम्[7] ।
20 एतदन्नाद्यसꣳस्तावमिति ।
प्रजातिकामयज्ञ[8] उत्तरः ।
तत्रैकर्चमुपाहरति ।
एषा वृषण्वती प्रजातिकामयज्ञेऽभिरूपा, अन्तरिक्षप्रवादान्तरिक्षायतना[9] गन्धर्वाप्सरस इति ।
25 तत्र यो द्रव्यविकारः प्रजातिकामयज्ञत्वात्[10][11] स भवति ।
शुंशुत्सयज्ञ[12] उत्तरः ।
"तस्य द्वादशं माध्यन्दिनꣳ सवनं त्रिवृती अभितः ।" cp. Say. PB. 19. 4. 2
एवमिव ब्राह्मणं भवति—"यैकादशी", "या द्वादशी" इति । cp. PB. 19. 4. 3. 4.
30

1 Wanting in B, G1, G2, J, K. 2 ०विधःस्तो० C, K; ०विधःस्तौ० G1, G2, J. 3 पूर्णा छ० G1, G2, J, K. 4 ०गावर्त्ति० C, G1, G2, J, K. 5 चतुराच० B. 6 अथामही० B. 7 ०जमेवमन्न० C; ०मजन्न० G1, G2; ०जमन्ना० J. 8 प्रजापति० Cख, G1, G2, J, K. 9 ०नाय B. 10 काम is wanting in J. 11 ०यज्ञा G1; ०यज्ञात् G2. 12 शुश्रुत्स० C, K.

एकादशीः प्रातःसवन उपसञ्चदीत द्वादशीस्तृतीयसवने ।
एवं गरस्य व्यपादानं सिध्यतीति ।
तदपि शश्वदध्वर्यव उदा[1]हरन्ति ।
स्तोमो वै त्रि[2]वृतः, स्तोमो द्वादशः ।
5 यत् त्रिवृतो द्वादशमुपयन्ति पुनर्द्वादशा[3]त्त्रिवृतं तस्मा[4]देतेन स्तो[5]म इत्युक्थसंस्थं करोति ।
एवमेतासां स्तोत्रीयाणां व्यु[6]पादानं सिध्यतीति ।
स्तोमकल्पायैकं साम मध्यन्दिने[7] उपाहरति ।
स यन्मैधातिथम् ।
10 एतस्यारिष्टवती योनिः प्रायश्चित्तकृत्येऽभिरूपेति[8] ।
अत्रस्तो(?) यो द्रव्यविकारः शु[9]श्रुत्सद्यज्ञत्वा[10]त् स भवति ॥ ७ ॥
पशुकामयज्ञ उत्तरः ।
तत्र चतुष्पर्यायान् स्तोमान् करोति ।
"चतुष्पा[11]दाः पशवः" इति । PB. 19. 5. 3.
15 तदपि शश्वद् ब्राह्मणं भवति—यच्चतुश्चतुर्हिङ्करोति ।
अथ[12] खल्वा[13]नुष्टुभः प्रतिपदः करोति ।
पशुकामयज्ञे चतुष्पदा अभिरूपा इति ।
तास्तिस्रः स[14]तीश्चतस्रो गायत्रीः करोति ।
गायत्रीस्थानं हि भवति वारवन्तीयं यज्ञायज्ञीयं[15]चतुर्थेषूक्थस्तोत्रीयेषु ।
20 एवमिव ब्राह्मणं भवति—"नोक्थो नाग्निष्टोमः" इति । PB. 19. 5. 11.
यदु वारवन्तीयं पशुसंस्तावं च ।
अपि च स्तोत्रीयाणां सन्निवारणाय ।
"पशुकामयज्ञ एवोत्तरः ।" Say. PB. 19. 6. 1.
तत्र चतुर्ऋचमाहरति ।
25 एतत् पथ्यं छन्द इति ।
षोडशिसंस्थं करोति ।
एवमिव ब्राह्मणं भवति—"नोक्थ्यो नातिरात्रः" इति । PB. 19. 6. 3.
पशुकामयज्ञत्वाद् गायत्र उक्थप्रणयः ।

---

1 उपाह० C. 2 त्रि is wanting in G1, G2, J. 3 ०शात्त्रि० B. 4 तस्मादेष C, G1, G2, K; तस्मादेषा J. 5 पुनस्तोम C, G2, J, K; पुनस्तो G1. 6 व्यापार्धान० B; न्युपाधान० G1, G2, J; ०नाम्नुपाधान० K. 7 ०न उप० B. 8 ०पेऽत्येतो यो द्र० C; ०पेत्येतो यो द्र० G1, G2, J, K. 9 शुश्रु० C. 10 ०ज्ञवान् C. 11 ०पदाः G1, G2, J. 12 अत्रा B; अ G1, G2. 13 ०ल्वाम्नानु० G1, G2, J, K. 14 सवती० B. 15 ०यं च० K.

पशुकामयज्ञावेवोत्तरौ ।
अपि वा द्विरात्राप्तिमुपकृतौ स्याताम् ।
उभयेज्यानियोगात् सप्तिसप्तदशैस्तोमौ करोति ।
एतौ पशुसंस्तावाविति ।
5 एकविंशमुत्तरस्य बहिष्पवमानं करोति ।
त्रिकं होतुराज्यम् ।
सप्रायावेकाहौ व्यावर्तयिषन्नेतस्मिन् तदेकविंशे पराक्रम्य त्रिकेण वज्रेण बलं बिभेदेति लामकायनः ।
ता उ सप्तिसप्तदशावेव सम्पदेति ।
10 नानातन्त्रे नानापृष्ठे द्विरात्रन्यायेन सञ्चारयति च न च सञ्चारयति ।
एकाहन्यायेनाहःसञ्चारणम् ।
द्विरात्रन्यायेनासञ्चारणम् ।
जनुषेकचौ द्विरात्रन्यायेन निषेधान्धीगवे द्विरात्रन्यायेनाज्ञत इति ।
कावमन्त्यम् ।
15 एषा सामान्या तृचप्रथमा पशुप्रवादेति ।
सत्रासाहीयश्रुध्ये द्विरात्रन्यायेन, श्यावाश्वक्रौञ्चे द्विरात्रन्यायेन ।
'अग्रेगो राजाप्यस्तविष्यते' इति । SV. 2. 966; RV. 9. 86. 45.
कावमन्त्यम् ।
'अग्रेगो' इति ।
20 अहेयं[11] भवतीति शाण्डिल्यायनः ।
गोप्रवादात्तु स्नातकाः कुर्वन्तीति ॥ ८ ॥

अपचितिकामयज्ञ उत्तरः ।
तत्र चतुर्विंशषष्ठान्[13] करोति ।
एवमिव ब्राह्मणं भवति—"वि ह्येतियन्तीति ।" PB. 19. 8. 6.
25 चतुर्विंशत्रिणवाविति[14] वैतद् भवति ।
चतुर्विंशं पवमानयोर्निदधाति ।
तेन प्रच्युतौ त्रिवृत्सप्तदशावाज्यपृष्ठेष्वनुगृह्णाति ।

---

1 ०ज्यानि ज्योगात् तत्र स० C; ०निज्योगात्तत्र स० G1, G2, J, K. 2 ०शौ स्तो० C, G1, G2, J, K. 3 व्यावर्त्त० B. 4 ०मेदिति B. 5 व च न सञ्चा० G1, G2; J, K omit च. 6 ०येति G1, G2, J, K. 7 औदलान्धी० C, G1, G2, J, K. 8 ०म० B, Cक. 9 ०य०ंश्रु० C, G1, G2, J. 10 दावम० Cख; वदावम० G1, G2, J, K. 11 ०हेयं B. 12 G1, G2 add राजाथ स्तविष्यत इति after गो. 13 षष्ठान्... चतुर्विंशं (line 26) is wanting in G1. 14 ०ह्यन्ती० C, G2, J. 15 ०वितीवे C, J, K.

ज्योतिष्टोमं [त[1]न्त्रम्, एतदपचिततरं तन्त्रयोरिति ।
स्तोमकारित आवापः ।
अपचितिकामयज्ञ एवोत्तरः ।
तस्योक्ताः स्तोमाः ।
5 तस्य यदेवंविधः स्तोमयोगः, एवं "विराज१ सम्पद्यत" इति । PB. 19. 9. 2.
द्विपदाः करोति ।
दशरात्रन्यायेन स यदेताः, एता दशरात्रावसा[2]ने दृष्टा इति ।
तत्र वारवन्तीयमन्तसाम, अन्तच्छन्दसि ।
10 सूर्यवत्यो दशरात्रन्यायेन ।
अग्न्यभियजन उत्तरः ।
तत्रोभे सामनी करोति ।
अग्न्यभीज्यां कृत्स्नीचिकीर्षन् ।
तथाप्युभयसामाग्निर्भवति ।
15 उभाभ्या१ हि परिगीयत इति ।
ज्योतिष्टोमं] तन्त्रम्, एतदाग्नेयमिति ।
स्वार१ सौप[3]र्णं पङ्क्तिसाम प[4]ङ्क्त्यभीज्यायाम्, अग्नेर्व्रतम् अग्न्यभी[5]ज्यायाम्, स्वाशिरामर्कोऽग्न्यभियजने व्रते दृष्टो भ[6]वति ।
अग्न्यभि[7]यजन एवोत्तरः ।
20 तत्र ज्योतिष्टोममेवाहरति, एतदाग्नेयमिति ।
त्रिवृत्पञ्चदशावाज्यपृष्ठे[8]षु सम्पद्वशेन कुर्मः ।
व्याख्यातमौभयसा[9]म्यम् ।
ज्यो[10]तिर्ह्येवायं विकृतः ।
तत्रौदलमनुष्टुभि तृचसमाप्तये ।
25 त[11]देतदष्टमात् पृष्ठान्वितम् ॥ ९ ॥
राजयज्ञ उत्तरः ।
तत्र द्वे स्तोत्रीये पाहरति ककुद्रूपं दिदर्शयिषन् ।
अपि वा सदोविशायसा[12]मान्ते गृह्यमाणे सप्तदश कारयेताम् ।

---

1 B omits तन्त्र ··· ज्योतिष्टोमं (lines 1-16). 2 ०वमाने C. 3 ०पकर्णं B; ०पर्णं J. 4 पक्ष्यमीष्टायाम् Cक; पक्षामी(भि J)० G1, G2, J, K. 5 ०मीष्टायाम् Cक; ०मीन्यायाम् G1, G2. 6 Wanting in B. 7 ०भिजन B; अग्नियजनग्न्याभीज्यायव्रते G1, G2, J; अग्नियजन K. 8 ०ष्ठे J. 9 ०सामं C, G1, G2, J, K. 10 ज्यौ० B. 11 तदष्टमात् G1, G2; तपृष्ठमात् J. 12 ०समन्ते B, K; ०समांत G1, G2, J.

विषमे स्तोमे सत्यनभ्यासां बृहतीं करोति ।
[1]ज्योतिष्टोमात्[2] तस्याः सा[3]मकल्पो व्याख्यातः ।
अग्निष्टुति व्याख्यातमौभर्य[4]साम्यम् ।
ज्योतिर्ष्ठै[5]वायं वि[6]कृतः ।
5 तत्र गौरीवितमनुष्टुभि, एतदृषभोक्तमिति ।
वैश्ययज्ञ उत्तरः ।
वैश्यस्य राजमात्रस्य स्वाराज्यमि[7]च्छतो यज्ञः स्यादित्याहुः ।
राज्ञ एव खल्वयꣳ संवि[8]रितस्य साहसिक्याद् ।
विड्भूतस्य कितवाशयस्य सवः स्यादिति शाण्डिल्यः ।
10 अभिषेचनीयं प्रत्युपधावति ।
सवसामान्याद् द्वात्रि[9]ꣳशापायादनुष्टुभः प्रतिपदोपयन्ति ।
[10]कुशलं यदुपव[11]र्तीमेषा राथन्तरी, राथन्तरो वैश्य इति ।
व्यत्यासेन नित्यां बृहतीं करोति ।
समो हि स्तोमः ।
15 व्याख्यातावुत्तरौ ।
राजयज्ञ उत्तरः ।
तं खलु बृहत्पृष्ठमिन्द्रन्यङ्गाभिः कल्पयति ।
एतद्भक्तिः क्षत्रिय इति ।
तत्र या इन्द्रवत्यो विस्पष्टास्ताः ।
20 अथापि वृत्रहप्रवादेन [12]वृषण्वत् प्रवादेन[13] [14]सूर्यवत्तयेत्यैन्द्रꣳ रूपमनुगृह्णन् मन्यत इति ।
तन्त्रे विप्रतिपद्यन्ते ।
ज्योतिष्टोम[15]मित्येके ।
गायत्रीभ्यां जानीम इति ।
25 आशीस्तन्त्रमित्यपरम् ।
इन्द्रवतीभिरयं क्लृप्तः, ता एता इन्द्रवत्य इति ।
तत्र यो द्रव्यविकार ऐन्द्री[16]चिकीर्षया स[17] भवति ।
राजपुरोहितयोर्यज्ञ उत्तरः ।

---

1 ज्यौ॰ K. 2 ॰म्यात् C, G1, G2, J, K. 3 साकमल्पो Cख, G1, G2, J. 4 ॰र्यं सा॰ K. 5 ॰तिविर्ष्ठे॰ G1, G2, J, K. 6 प्रवि॰ G1, G2, J, K. 7 ॰मीप्सतो C, G1, G2, J, K. 8 सविपरीतस्य B; 9 ॰शादपायाद॰ C; ॰शपायाद॰ G1, G2, J; ॰शापयोद॰ K. 10 कुलं B. 11 ॰वीती॰ G1, G2, J, K. 12 वृषावत् B; wanting in G1, G2. 13 Wanting in G1, G2. 14 सूर्यवर्त्तीयन्त्यैन्द्रꣳ B. 15 ॰मं तन्त्रमि॰ C; ॰मतन्त्रे । G1, G2; ॰मतन्त्रमि॰ J, K. 16 ॰न्द्रे चि॰ B. 17 संभ॰ G1, G2, J, K.

तत्रोभे सामनी, उभयानि व्यञ्जनानि, द्वै[1]यज्ञा ज्योतिष्टोमं तन्त्रं नित्यं ब्राह्मणस्यो[2]क्तो[3] यज्ञं क्षत्रियस्य ॥ १० ॥

विजिघांसयज्ञ उत्तरः ।
तत्रोभे सामनी करोति ।
5 विजिघांसर्व[4]यज्ञं कृत्स्नं[5] चिकीर्षन् ।
तत्रैतद् विशोविशीयं विजिघांसयज्ञेऽभिरूपम् ।
सोमसामाथर्वणं वेत्यभिचरतः ।
सोमसामैतत् क्रूरनिधनम् ।
तस्य निधने विचारयन्ति—
10 "इन्द्र इव दस्यूंः रमृणा २३१११ सूर्य इव दस्यूंः रमृणा २३१११ वज्रिन् सुवज्री २३१११ न् ।" LŚ. 7. 10. 12; cp. Upg. 3. 8.
"अपि[6] वैतेषां द्वे पूर्वे वोत्तरे वा सर्वाणि वा समस्यन्नन्त्यमेव स्वरये[7]द्, यथा वायोर्भ[8]ज्ञाया निहन्यमाना[9]याः ह्लादः स्यात्, यथा वायसी[10] समृच्छेयाताम्, यथा [वा][11] निष्कः कुन्त[12]त्रेणाभिहतो ध्वनेत्, यथा
15 वा सनू[13]पुरस्य पादस्य [14]निघातस्य ।" cp. Upg. 3. 8.
हुण्णिति चाथर्वणम् ।
पशुकामस्यैतच्चतुर्निधनं पशुकामयज्ञेऽभिरूपम् ।
एवमे[15]र्थ एवोत्तरः ।
अपि [16]वानाज्ञातप्रायश्चित्तये, यत्रानाज्ञा[17]तं भयमागच्छेत्, यथा मा[18]टवमा-
20 जगाम ।
यथा वि[19]हनु शिरो, यथा वा[20]यःपतनम् ।
तदप्येवमिव ब्राह्मणं भवति—"इन्द्रमदेव्यो माया असच[21]न्त" इति शाण्डिल्यायनः । PB. 19. 19. 1.
एवं नूनं तद्विदाञ्चका[22]रेति ह स्माह धानञ्जय्यः ।
25 यदर्थ[23]मिममाजहारानाज्ञात इव खल्वयं योगो भवति ।
तत्र त एव स्तोमा ये पूर्वस्य ।
तां[24]स्तु यदेवं प्रयु[25]ङ्क्ते समायावेकाहौ [26]व्याविवर्त्तयिषन् ।

---

1 द्वै C, G1, G2, J; द्वैयज्ञान् is suggested here. 2 ०णमु० B. 3 ०क्ता B, K. 4 ०यज्ञं G1, G2, J, K. 5 कृत्स्नीं B. 6 B omits वै. 7 ०रायद् G1, G2, J, K. 8 वायेभ० G1, G2, J, K. 9 ०माना G1, G2. 10 ०यसौ C. 11 Wanting in B; व K. 12 तंतत्रेयाभि० G1, G2. 13 ०न्नपु० C, G1, G2, J; संत्तपु० K. 14 नूखात् स्यात् B. 15 ०मेव G1, G2. 16 G1, G2, J omit वा. 17 यत्राज्ञा० K. 18 भागचमा० B. 19 यथापि हनु B. 20 वयःप० C, G1, G2, J, K. 21 असृजन्त K. 22 रोति G1, G2, J; ०कति K. 23 इदम० B. 24 मार्गस्तु B; तंःस्तु G1. 25 ०क्षेण प्रा० C. 26 व्यावर्त्त० B.

तन्त्रे विप्रतिपद्यन्ते ।
उभयसामतन्त्रमित्येके ।
प्रत्नवत्यो ह्येता माध्यन्दिनीया इति ।
आशीस्तन्त्रमित्यपरम् ।
5 अनाज्ञातप्रायश्चित्तयेऽयम् ।
तत्रानाज्ञातयोगाꣳश्चिकीर्षन्[1] गायत्र्योः[2] स्थाने[3] द्वे बृहत्यौ निदधाति ।
ते संव्यूह्य[4] तिस्रो गायत्रीः करोति ।
गायत्रीस्थानꣳ हि भवति ।
तत्र यो द्रव्यविकारोऽनाज्ञातप्रायश्चित्तये स भवति ।
10 अपि च विजिघाꣳसया ॥ ११ ॥

अभिचरणीयावेवोत्तरौ ।
तयोः श्येनेनैवं[5] द्रव्यसमुद्देश उक्तः ।
ये पूर्वयोः पूर्वस्य स्तोमास्ते[6] तयोः पूर्वस्योद्धरति ।
सप्तदशनवदशौ प्रजाँतिसꣳस्तावाविति[7] ।
15 षडतिशिष्टौ[8] द्विस्तोत्रभाजः करोति, सन्दꣳशरूपं दिदर्शयिषन् ।
ऐडं ककुभि करोति, पुरुषच्छन्दसः स्वरं विच्यावयिषन् ।
तत्रैतत् काशीतं त्रीणस्वरैडं[9], त्रयं परेषामिच्छतीति[10] ।
सामानुष्टुभि करोति , एतानि क्रूराणि सामानीति ।
स यत् त्रयाणां प्रथममायतनामिति[11], पूर्वाध्यायं पूर्वे यज्ञस्थाने ।
20 अथाप्येतत् क्रूराणिधनं वधार्थेऽभिरूपम् ।
अथापि बृहन्निधनेनानुगृह्णाति, एषं[12] वै सामवज्र इति ।
बृहद्रथन्तरयोर्वदति ।
स्तोभकल्पायोत्तरे[13] विहितवन्तौ[14] तृचावाहरति ।
तत्र देवंसाम[15] स्यादिति धानञ्जय्यः ।
25 समानार्थौ[16] हि भवतः ।
द्वितीयमिति गौतमः ।
सप्रायावेकाहौ व्यावर्त्तयिषन्[17] ।

---

1 तन्त्रो० B; तात्राता G1; तंत्राना० K. 2 ·श्या G1, G2, J, K. 3 Wanting in G1, G2, J. 4 संव्युह्य C, G1, G2, J, K. 5 श्येनैव C, G1, G2, J, K. 6 ०मात्वे B. 7 प्रजापति० G1, G2. 8 ०ष्टाद् C; ०ष्टान G1, G2. 9 ०स्वतरैडं B. 10 ०न्तीति B. 11 प्रथमेतदानुष्टुभ(०भि K)मिति C, G1, G2, J, K. 12 एषु B. 13 ०ल्प K. 14 ०हृ० B. 15 तदेव सा० C. 16 ०र्थो K. 17 ०वर्तयिषन्त B; व्याविवर्त्तयिष्यत् G1, G2, J, K.

अथाप्येतदभिनिकृष्टगीति[1] वधार्थेऽभिरूपम्[2] ।
वज्रोक्तं[3] प्रमंहिष्ठीयमुक्तो[4] यज्ञमौपगवम् ।
ऐडत्वात् षोडशिसाम्नो[5] न[6] नामेधं करोति ।
तत्रैतदुद्वंशीयम्[7] । एतेनेडाकामश्च सिध्यति, अजामिकल्पश्चेति ॥ १२ ॥

5 महानाम्नीः[8] षोडशिसाम ।
एता वज्रोक्ता राजयज्ञेऽभिरूपाः, वज्रो[9] हि राजेति ।
कथं धर्मा इति ।
कर्त्तव्या इत्येके ।
अपि ह्यासामेष स्वाध्याये धर्मो भवतीति । cp. Upg. 3. 5.
10 अथापि धर्मिस्थानमापन्नाः[10] ।
षोडशिधर्मान् कुर्वन् कथं महानाम्नीनां धर्मान् न कुर्यादिति ।
अथापि वज्रोक्ता आप[11] इति ।
अथापि संशये[12]ऽलोपो लोपान्[13] न्यायेतर[14] इति । cp. Upg. 3. 5.
अकर्त्तव्या इत्यपरम् ।
15 पृष्ठापन्नानां वदति यद्[15]प उपनिधाय स्तुवत इति ।
यद्[16]ध्येतदपि ह्यासामेष[17] स्वाध्याये धर्मो भवतीति, अन्यान्[18]अप्येवंवादः स्वाध्यायधर्मान् प्रतीयाद्[19] । cp. Upg. 3. 5.
यद्ध्येतद् धर्मिस्थानमापन्ना इति, धर्मिस्थानमापन्नतरं खलु सद्रथन्तरं[20] न धर्माल्लिभते[21] ।
20 यद्ध्येतद्[22] वज्रोक्ता आप[23] इति, शान्त्युक्ता आपः, "अपः[24] पश्चात् पत्न्य उपसृजन्ति, वैश्वानरमेव तच्छमयन्ति, आपो हि शान्तिः" इति ह्याह । PB. 8. 7. 8.
यद्ध्येतत् संशयेऽलोपो[25] लोपान्[26] न्यायतर इति, यो रथन्तरधर्मानकृत्वा[27] महानाम्नीनां धर्मान् कर्तव्यान् मन्येत[28] सद्रथन्तरव्याघातः[29] ।
25 अथापि तस्य वज्रोक्ततरा धर्मा इति धर्मा इति ॥ १३ ॥

---

1 ०दभितआत्तिसृष्टगीति B. 2 ०गीमि G1, G2, J, K. 3 यज्ञोक्तं B. 4 ०ष्ठीयं मु० G1, G2, J, K. 5 ०म्ना G1, G2, J. 6 C omits न. 7 ०श० G1, G2. 8 ०म्नी G1, G2, J, K. 9 भवति G1, G2, J, K. 10 धर्मि is wanting in B. 11 Wanting in C, G1, G2, J, K. 12 ०योलो० C, J; ऽलोपो is wanting in J. 13 ०पा G1, G2, J, K. 14 ०य्य० C. 15 ०दा G1, G2 but G2 adds प. 16 तद्दे० G1, G2. 17 ०मे G1, G2. 18 अन्यान् is wanting in C. 19 कुर्याद् C, G1, G2, J, K. 20 सद्रथन्तरं C, G1, G2, J, K. 21 ०र्माल्लं० C; ०र्माल० G1, G2, J, K. 22 G1, G2 omit यद्दे. 23 आपन्न C. 24 यः K. 25 G1, G2, J omit लोपो. 26 ०पा G1, G2, J, K. 27 ये B. 28 मन्यत G1, J; मन्य तत् G2. 29 ०त्रयमद्दन्याब्या० G1, G2, J, K.

अथ अष्टमः प्रपाठकः[1]

अ[2]थातो अ[3]हीनाः ।
तेषामुक्तो द्रव्याणामन्वयः ।
अथापि दशरात्रा[4]वलोपाहीनाः ।
तत्र सिद्धानि दाशरात्रिकाणि द्रव्याणि ।
5 आहीनिक्या[5] रात्रेः श्रौतकक्षस्र्य[6]चोऽपँनयति ।
सत्रं चा[8]हीनं च व्या[9]विवर्तयिषन् ।
तत्रैताः करोति—
'पन्यंपन्यमित्सोतारः' इति । SV. 1. 123; 2. 1007; RV. 8. 2. 25.
एताः सुतवतीनाꣳ स्थाने सुतवत्य इति ।
10 "मध्यमस्य रात्रिपर्यायस्य होतृषामणी विचारयन्ति ।
दैवोदासं[10] वा स्यादौर्ध्वसद्मनं वेति ।
विकल्पो वा स्यात् ।" Say. PB. 9. 2. 12.
अ[11]पि वा दैवोदासमहीने[12] कुर्यात् ।
पूर्वाध्यायं पूर्वे यज्ञस्थाने, और्ध्वस[13]द्मनं सत्रेषु, उत्तराध्यायमुत्तरे यज्ञस्थाने ।
15 अथाप्यस्मिन् सत्रवादरूपो भवति ।
"और्ध्वसद्मनमपि शर्वरीषु प्रोहन्ति ।" [इति[14]] । PB. 9. 2. 10.
अथ खल्वाह—"त्रिणिधनं भवति" इति । PB. 9. 1. 14.
कथं त्रिणिधनꣳ स्यादिति ।
एतान्येवै[15] निधनानि व्यवस्यन्त उपेयुः, सुवृक्तिभी २३४५ नृमादना
20 २३४५ म् भरे २३४५ षु वा २३४५ इति ।

---

1 In C only. 2 G1, G2 add ओं. 3 अभीनां B. 4 °त्राविलोपो° B. 5 °का रा° B. 6 °स्यार्थेऽप° G1, G2, J, K. 7 °पायति B. 8 वादीनां G1, G2, J. 9 व्याव° B, C. 10 °सा G1, G2, J. 11 वापि G1, G2, J. 12 °हीवने G1, G2, J. 13 अर्द्धस° G1, G2, J. 14 Wanting in B. 15 एतान्येतान्येव C; एतानेताने G1; एतानेव G2; एतान्येतानेव J.

तदा[1]हुः—जने[2]च्छं त्रिणिधनं यद[3]नन्तराणि निधनानीति ।
अथवैतानि वि[4]हृतान्यनुपदमुपेयुः ।
तत्र नि[5]न्दा यदनुपायान्निधनानामभिव्याहारः ।[6]
अथवा एतानि पृथक्स्तोत्रीया[7]सूपेयुः ।
5 तत्र[8] निन्दा यत् संप्रायाणां निधनानां विप्रयोगः ।
यथासमाम्नायमेवोपेयुः ।
अथापि यथासमाम्नायमेवै[9]तत् ।
स त्रिणिधनं भवतीति शाण्डिल्यायनः ।
य[10]त्तिस्रो निधन[11]मात्रा भवन्तीति सर्वेषु पदेष्वभ्यासात् ।
10 सौमेधꣳ रात्रिषामेत्याचक्षते ।
कौत्स[12]महीनादपनयति, स[13]त्रं चाहीनं च व्या[14]विवर्तयिषन् ।
तत्रैतदा[15]ष्ट्रदꣳष्ट्रमृद्धिसꣳस्तावम् ।
'आ१ त्वा२ विश३न्त्वि१न्द२वः' इति । SV. 1. 197; 2. 1010; RV. 1. 15. 1.
15 एतास्वेताः सो[16]मवतीनाꣳ स्थाने सोमवत्य इति ।
समुद्रप्रवा[17]दाँ आ[18]वत्योऽन्तेऽभिरूपा इति ॥ १ ॥

बुभूषद्यज्ञ उत्तरः ।
अपि वा षडहा[19]प्तिमुपकृतः स्यात्, एतेषाꣳ स्तोमानामुपधानात् ।
तत्रोभे साम्नी बार्हतं त[20]न्त्रं बृहत्पृष्ठ[21]स्योपवती[22] प्रतिप[23]त् ।
20 [क[24]स्य हेतोरिति ।
बुभूषद्यज्ञोऽयं भवति ।
अनवधारितकाम इति लामकायनः ।
तत्र सर्वाभिप्रायां प्रतिपदमचिकीर्षीत् ।
अथापि षडहोऽयं संलक्षितः ।
25 सैषा षडहप्रतिपद्] भवति ।

---

1 Wanting in B. 2 नेक्थं B; जनेच्छन् C. 3 ०दन्त० K. 4 वृह० B; हृता० G1, G2. 5 निन्दानुपायानां नि० B. 6 C repeats this line. 7 ०रुपेयुः G1, G2, J. 8 तन्निन्दा० B. 9 ०मेतत् C, G1, G2. 10 वक्ति ति० B. 11 ०नं न मात्रा G1, G2, J. 12 ०सं ही० B. 13 स्त्रिा निधनं न मान्यं सत्रं चा० G1; स्रो निधनं न मात्रा सत्रे चा० G2. 14 व्यावर्त० B, C. 15 ०ष्ट्रा० B. 16 स्तोम० G1, G2. 17 ०दान् B. 18 भवत्यो० B; आवत्यान्ते० C; आवन्त्यो० K. 19 षडहा इति तदुपकृतस्यात् B. 20 तत्र B. 21 पृष्ठास्या० G1, G2, J, K. 22 ०वतीति C, G1, G2, J; ०वति K. 23 ०पक्षस्य G1, G2, J, 24 B omits कस्य … पद (line 25).

अथाप्युभे स्थानवती अचिकीर्षीत् ।
तन्त्रेण बृहत्प्रतिपदा रथन्तरमिति ।
अथाप्येतामेवान्यवेदाः समामनन्ति ।
आन्धीगवादुत्तरमाथर्वणम् ।
5 षडहोऽयं संलक्षितः ।
तदेतत् प्रायश्चित्ति[1]साम ।
पशुकामयज्ञ उत्तरः ।
अपि[2] वा द्विरात्राप्तिमुपकृ[3]तिः स्यात्, एतेषां स्तोत्राणामुपधानात् ।
दशरात्राप्तिं वा, छन्दोमानामुपधानाद् ।
10 व्याख्यातमौभयसाम्यम् ।
अनुपृष्ठं तन्त्रम्, द्वयान्याज्यानि, द्वयानि पृष्ठानि ।
द्वैविध्यात् स खल्वाप्तोर्यामाणां पृष्ठानां वैश्वजितानि पृष्ठानि गर्भान्[5] करोति ।
एतानि नानात्वकृ[6]प्तानीति ।
15 अथाप्येवमाप्तिरितरा दशरात्रस्येति ।
स[8] कस्य हेतोर्गर्भान्[9] करोतीति ।
एवं हि शश्वद्बह्वृचा अधीयते—गर्भवन्ति पृष्ठानि भवन्ति, आप्तोर्यामस्य तानि, गर्भकारं शंसेत्, पशवो वै पृष्ठानि, यद् गर्भवन्ति भवन्ति प्रजननेनैव पशून्त्समर्द्धयन्तीति ।
20 बृहद् वैराजगर्भं करोति ।
बार्हतं वै वैराजम् ।
तेनैव तदनुरूपगर्भं वामदेव्यं महानाम्नीगर्भं क[11]रोतीति ।
आपो वै वा[12]मदेव्यम् ।
आ[13]पो महानाम्न्यः ।
25 तेनैव तदनुरूपगर्भं श्यैतं वैरूपगर्भं करोति ।
"पशवो वै श्यैतम् ।" PB. 7. 10. 13.
"पशवो[14] वैरूपम् ।" PB. 14. 9. 8.
तेनैव तदनुरूपगर्भं कालेयं रेवतीगर्भं करोति ।
ऐडं वै कालेयम् ।

---

1 ०त्ति याम B; ०त्तिः स्या मा C; ०त्तिम G1, G2, J. 2 Wanting in G1, G2, J. 3 ०तः K. 4 ०विधात् G1, G2, J, K. 5 गर्भा C; गर्भा G1, G2, J. 6 नानाकृताप्तनीति B. 7 ०प्तित० G1, G2, J, K. 8 Wanting in G1, G2, K. 9 ०र्भानि G1, G2, J. 10 ०च G1, G2, J, K. 11 करोति C, G1, G2, J, K. 12 Wanting in G1, G2, J. 13 आथो G1, G2, J. 14 PB adds वै.

ऐडा रैवत्यः ।
तेनैव तदनुरूपगर्भम् ।
अथो[1] द्रवदिडं कालेयम् ।
[2]कंस्तेडा रैवत्यः ।
5 "तस्मिन् मि[3]थुनादेव प्रजायते" इति । cp. PB. 16. 14. 6; 19. 11. 7.
"अपि वा सर्वाण्यावर्[4]तीनि वै[5]श्वजितैराव[6]र्त्तिभिर्गर्[7]भवन्ति कुर्यात् ।
तत्र बृहत् सञ्चरते ।
तस्य वै[8]रूपं विधृ[9]त्या इति ।" Ārṣ. K. V. 86b.
"तत्र[10] गर्भ[11]विधानमाहुः—मध्यमं पर्याय[12]ं स्वस्तोत्रीयं गर्भं कु[13]र्यात्, प्रथमो-
10 त्तमौ मुख्यस्य, एवं गर्भोपपत्तिर्भवतीति ।" Ārṣ K. V. 86a.
"कथं धर्माः[14] ।
[कर्त्त[15]व्या] इत्येके ।
गर्भभूतानि भवन्त्य[16]नुभूतानि, अधर्मा गर्भो भवतीति ।
[17]कर्तव्या इत्याचार्याः ।" Ārṣ. K. V. 87a.
15 तत्र तान्येव [18]वचनानि यानि विश्वजिति, सुरूपं जराबोधीयस्य स्थाने,
एतत् पशुस[19]ंस्तावमिति ।
उद्धरत्याथर्वणं द्विपदा ।
अत्र करिष्यन् भवति ।
तत्रैतत् सौ[19]हविषमभ्यस्तगीत्यतिरिक्त[20]मतिरिक्ते कल्पे[21] ॥ २ ॥
20 प्र[22]जातिकामयज्ञ उत्तरः ।
तत्र यो द्रव्यविकारः प्र[23]जातिकामयज्ञत्वात् स भवति ।
व्याख्याता उत्तरे ।
[24]अथै[25]ते एकस्तोमाः, एतान् कामानभ्युपकृताः ।
यथैतद् ब्राह्मणम् ।

---

1 अथो B. 2 कन्नस्ते० B. 3 G1, G2, J, K add मिथुनं. 4 ०वर्तीति G1; ०वर्तीमि० G2; ०वर्तीमि J; ०वृत्तीनि K. 5 विश्व० G1, G2, J. 6 ०वृत्तिमि० K. 7 ०र्गर्भ भवन्ति G1, G2, J. 8 ०विधृ० B. 9 Wanting in B. 10 G1, G2, J add विधानं. 11 ०र्भाधान० B. 12 सस्तोत्रीयं C, G1, G2, J, K. 13 कुर्वीत C. 14 C, G1, G2, J, K add इति. 15 Wanting in B. 16 ०नुच्यभू० G1, G2, J; ०नूच्यभू० K. 17 C, J repeat here कथं धर्मा ··· भवतीति. 18 विव० C, G1, G2, J. 19 सौविष्म० B. 20 ०क्तप्रतिरिक्ते G1, G2, J, K. 21 Cख, G1, G2, J, K write the first three sentences of the next section after कल्पे. 22 प्रजापतिकाम० Cख; प्रजापतियज्ञ G1, G2, J, K. 23 प्रजापति० G1, G2, J, K. 24 G1, G2, J, Cख, K begin the 3rd section from here. 25 ०थैकत G1, G2.

अथाप्येकस्तोमान्यहीनिकान्यहानि ।
सोऽन्ते[1] न्यायमदिदर्शयिषीत्[2] ।
तत्[3] खलु बृहद्रथन्तरपृष्ठान् कुर्मः ।
राथन्तर[4]बार्हता ह्येते स्तोमा इति ।
5 ज्यौतिष्टोमं[5] तन्त्रम् ।
ज्यौतिषा[6] ह्येते स्तोमा इति ।
तत्रानुपृष्ठं द्रव्यागमः ।
षोडश्याः[7] षोडशिनोऽनुब्राह्मणं वेति विचारयन्ति ।
किँ स्तोमा अनुब्राह्मणँ स्युरिति ।
10 एकविँशस्तोमा इति ।
एष एषां प्रकृतिस्तोमो भवति ।
अथाप्याहुः—अहस्तोमम[8]हः प्रथमोत्तमयोरन्वियाताम्[9] ।
एकविँशं तु पञ्चदशस्य कुर्यात् ।
पञ्चदशँ सप्तदशस्य ।
15 एवं तँ[10] स्तोमँ सँस्तुतोऽतिरात्रः सम्पद्यते ।
अथो यस्तस्याह्नो भवति, अहस्तोमं त्वेवान्वियु[11]रित्यनुब्राह्मणम्[12] ।
अनु[13]व्यूहमित्येतत् स्यात् ।
यो वा ह्यह्नः स्तोमः स[14] षोडशिनो[15] न्यायेन ।
यो वा ह्रसीयान्[16]नित्यह्नः[17] स्तोमं चैनं[18]मनुयन्तं[19] पश्यामः ।
20 "अथातो द्विरात्राः ।
तत्र ज्योतिष्टोमसर्वस्तोमौ समस्यति ।" cp. PB. 20. 11. 1.
मा विलोपे भूयान् विलोपो भूद्[20]िति च दाशरात्रिकाणाम्[21]ह्ना द्वे करोति ।
अथैतानि दशरात्रस्यान्त्या[22]न्यहानि चतुर्थषष्ठे नवमदशमे इति ।
एतेषां द्रव्याण्यहीनान्तेषु[23] चिकीर्षितानि ।
25 तत्रोत्तरत्र[24] बहिष्पवमानम् ।

---

1 ०न्तन्या० C. 2 ०षं G1, G2. 3 तान् G1, G2, J, K. 4 रथ० C, G1, G2, J. 5 ज्योति० C, G1, G2, J. 6 ज्योति० C, J. 7 ०शाः B, G1, G2, J, K. 8 अस्तोममह G1, G2, J, K. 9 ०न्वितायामे० G1, G2, J, K. 10 ततँ० G1, G2, J. 11 ०न्वी० B, G1, G2, J, K. 12 ०णमिति C, G1, G2, J, K. 13 अतनु० B. 14 Wanting in G1, G2, J, K. 15 ०शिन्यो B; ०शिना G1, G2, J, K. 16 ०यादि० C. 17 ०हः G1, G2, J, K. 18 चैवम० K. 19 ०यत्त C. 20 ०भूरिति G1, G2; भूरिती J, K. 21 ०णां न C, G1, G2, J, K. 22 ०न्ता० C, G1, G2, J, K. 23 ०न्ते G1, G2. 24 ०त्तत्र G1, G2, J, K.

अन्यत् प्रतिपदो नावमिकम् ॥ ३ ॥

अथैते हाविष्मतहाविष्कृते ।
हाविष्कृतं[1] पूर्वस्याह्न आर्भवचरꣳ स्थानापन्नं भवति ।
द्वितीयस्थानं च हाविष्मतम्, उत्तरस्य माध्यन्दिने सꣳहितं च ।
5 भागविलोपे भागसन्तानाय निकामयते ।
अपि चैवꣳ सती नेदीयसी हाविष्मतहाविष्कृते भवत इति ।
जनुषैकर्चाविं[2]हर्गणन्यायेन त्रैशोकवैखानसे जागतस्य भागस्यानुग्रहाय ।
अहीनान्तेष्वर्काश्चिकीर्षिताः ।
सꣳरोधान्विह दीर्घतमसौर्[3]कैः ।
10 विपर्ययेणे[4]तरयोराप्तिः ।
स यदेतास्वेवं[5] स्वयोनिः[6] ।
अथाप्येतां[7] घृतवत्यो दक्षिर्तवत्यो[8]ऽन्ते[9]ऽभिरूपा इति ।
ज्योति[10]ष्टोमान्युक्थान्यहीनान्तेषु चिकीर्षितानि ।
एवं पथ्यावसानमिति ।
15 आयुषमुत्तरस्य द्वितीयं करोति ।
एते सप्रायास्त्रिकद्रुका इति ।
बृहत्पृष्ठं बार्हतं[11] तन्त्रं[12] द्वितीयꣳ हि स्थानमापन्नं[13]मिति ।
उद्धरत्यन्तलक्षणानि—त्रिणवत्रय[14]स्त्रिꣳशयोरन्वपायें[15]मुत्सेधनिषेधौ परि-
स्थानमिति ।
20 जराबोधीयमहीनेषु चिकीर्षितम् ।
एतच्छन्दोमसामेति ।
तद्यदुष्णिहि राथन्तरात् स्तोमां[16]च्छुध्यमविच्यावयिषीत् ।
उद्वꣳशीयं तैरश्च्यं वेति[17] विचारयन्ति ।
पूर्वस्याह्न उक्थान्त इत्यहो[18]द्वꣳशीयम् ।
25 उपक्रमणीयमहरिति तैरश्च्यम् ।
अषोडशिका रात्रिः स्तोमं[19]क्षात्रेणं[20], अषोडशिकों[21] ह्येवायुर्भवतीति ।

---

1 ०ष्मतं K. 2 ०र्चौव० G1, G2, J, K. 3 ०सोक्तः B. 4 अभिपर्यय० B; विपर्येतेर० G1; विपर्ययेतरे० G2. 5 ०स्वेवास्तु C, G1, G2, J, K. 6 स्वरसोनिः G1, G2, J; स्वरसोनिः K. 7 ०तामधृ० B. 8 ०तव्यो० B. 9 ०ऽते० G1, G2, J, K. 10 ज्यौति० G1, G2. 11 ०तत K. 12 तत्र B. 13 ०पत्रा इति. 14 त्रय is wanting in G1, G2, J, K. 15 ०पावायामु० B. 16 ०ध्या० B; सोमांबुध्यसवि० G1; सोमांच्छुध्यसवि० G2, J; ०मांछु० K. 17 विति J. 18 इत्यहो० G1, G2, J; इहो० K. 19 ०मं क्षा० B. 20 ०क्षात्रेण पो०. 21 ०कोऽक्षे० B, K.

" 'त्रिवृत्पञ्चदशोऽग्निष्टोमः।' PB. 20. 13. 1.
उत्तरस्य पूर्वमेकस्तोमतामिवाह्नो दिदर्शयिषन्नायुषो प्रच्युतं पञ्चदशं पूर्वस्मिन्नहन्यनुगृह्णाति।
तत्र यदेतत् स 'रूक्षोऽभवत्' इति। PB. 24. 13. 2.
5 कपिवनो भार्यजात्यश्चातूरात्राय जामदग्न्ये दिदीक्षे" ।
ब्रह्मचारिणं सम्पन्नकुलीनमपः प्रहृत्य।
तस्य त्रिवृतपञ्चदशमहरुपेतं बभूव।
अथेतरस्तमर्थं साधयित्वा प्रत्याजगाम।
सामायमिममहर्यागं निशीशमतेति।
10 आयुरतिरात्रमुपदधौ, ब्रह्मचारिणश्च परिहारेण यज्ञप्रत्यवहारेण च रूक्षो बभूव।
यस्त्वेतौ दोषौ परिहरेन्न रूक्षः स्यादिति।" Caland PB. 20. 13. 4; cp. PB. 20. 13. 4, 5; AP. Ś. 22. 14. 20.
पूर्वेणैव द्रव्यकल्पो व्याख्यातो व्याख्यातः॥ ४॥

15 [18]द्वितीयः पटलः

अथातस्त्रिरात्राः।
तत्र वामदेव्यं तृतीये पृष्ठे[20] करोति।
लोकविधां त्रिरात्र उपकृतः।
एतानि लोकसामानीति।
20 तानि कुशलं यद्यथाभक्ति निदधाति।
तन्त्रेषु विप्रतिपद्यन्ते।
आहीनिकतन्त्राणीति गौतमः।
तद्गायत्रीभिर्विजानीमः।
एकैवात्राहीनिकी भवति।
25 'अस्य प्रत्नाम्' इति। SV. 2. 105; RV. 9. 54. 1.

1 पूर्वं एक० C, K. 2 ०स्तोता० G1, G2, J. 3 ०वान्यो B. 4 निर्दिशयि० K. 5 ०ष: B. 6 प्रच्यु G1, G2, J, K. 7 कषवनो B. 8 भाव० B. 9 ०श्चात्तरा० G1, G2, J; ०श्वतराय K. 10 ०न्यायय B. 11 ०क्षेद् B. 12 ०मिदहर्योगाद B. 13 शी० B. 14 Wanting in G1, G2, J, K. 15 चारू० B; च न्नरूक्षदिति G1, G2; च न्नरूक्ष स्यादिति J, K. 16 G1, G2, J omit रूक्षो ··· न्न. 17 पूर्वे J. 18 In B only. 19 द्वितीये B. 20 ०ष्ठ G1, G2, J; ०ष्ठं K. 21 लोके सा० C, G1, G2, J, K. 22 प्रत्ना B, C, G1, G2, J, K.

तां यत्करोति सहस्रवती सहस्रवत्तदभिरूपेति[1] ।
एकाहिकानीति धानञ्जय्यः ।
तद्गायत्रीभिरेव जानीमः ।
एकैवात्राहीनिकी भवति ।
5 "प्र सोमासो विपश्चितः" इति । SV. 1. 478; 2. 114; RV. 9. 33. 1; PB. 11. 3. 1.
यत्[2] करोति[3] प्रवत्युपक्रमेऽभिरूपेति ।
अहरहरेवाहीनैकाहाभ्यां[4] वर्तत[5] इति शाण्डिल्यायनः ।
एवं युक्ता एता गायत्र्यो भवन्ति[6] ।
10 अथ खल्वत्र भागविपर्ययो भवति ।
लोकविधां त्रिरात्र उपकृतः ।
तं यथाभक्त्यचिकीर्षेत्[7] ।
ते एते परेऽहनि भागविपर्ययाद्[8] द्रव्यसमासेन[9] वर्तन्ते[10] ।
द्वितीयेऽहनि[11] स्थानस्थानि[12] द्वैतीयिकानि[13], भागान्वितानि तार्तीयिकानि[14] ।
15 एतदेव विपरीतम् ।
तृतीये[15] खल्वत्र द्व्यान्यक्षररूपाणि क्रियन्ते ।
प्रजापतेश्च वागक्षराण्यक्षराक्षराणि[16] च ।
आज्यादिषु प्रजापतेर्वागक्षराणि, यथोपलम्भमहःस्वक्षराक्षराणि[17] ।
एकाक्षरणिधनं यौधाजयम् ।
20 एष आचार्यसमयः ।
अथाप्याह—"यदाक्षराणि[18] प्रथममहर्भजन्त" इति । PB. 21. 5. 4.
व्याख्याता अर्काः, तथाज्यदोहानि ।" cp. PB. 21. 5. 5.
पूर्वावर्कौ व्यत्यस्यति[19] ।
अक्षरणिधनं प्रथमेऽहनि चिकीर्षेन्[20] आज्यदोहानां प्रथमं तृतीये ।
25 एवमिव ब्राह्मणं भवति—अथाप्येषामेतत् त्रिणिधनं तृतीयेऽभिरूपम् ।

---

1 सहस्रदत्तावभि० B; सहवत्तावभि० G1, G2, J, K. 2 C, G1, G2, J add तां. 3 सहस्रवती सहत्तावभि० G1, G2; सहस्रवती स(०हस्र K)भत्तावभि० J, K. 4 अहरेकाहीनैकाहाभ्यां G1, G2, J; अहरहरेकाहीनैका० K. 5 वर्तत G1, G2, J, K. 6 ०न्तीति C, G1, G2, J, K. 7 ०र्षन् B. 8 ०या B, G1, G2, J, K. 9 द्रवाममासे G1, G2, J. 10 वर्त्तते K. 11 ०हस्था C, G1, G2, J, K. 12 स्थानिस्था० G1, G2, J, K. 13 द्वि० K. 14 तार्तीयानि G1, G2, J, K. 15 ०ये मथ ख० K. 16 वागक्षराक्षराणि C; वागक्षरा G1; वागक्षराक्षरा G2, K. 17 ०मह:स्वक्षण्येका० G1, G2; ०महस्वक्षण्येका० J; ०मह:स्वक्षरा अक्षव्येक्ष० K. 18 ०क्षाराणि C. 19 ०स्य व्यक्ष० C. 20 ०कीर्षि० J, K.

अनुष्टुभि प्रथमस्य करोति ।
अत्रैव सन्तानार्थानि[1] भवन्ति[2] ।
सन्तानार्थमिदं[3] भवति ।
इथ्यक्षरणिधनत्वादनुच्छन्दसम् ।
5 इतरयोरैडमन्त्यं करोति ।
इडानुग्रहार्थं[4] बृहतीं[5] वा स्वेन सामान्तेनोपिपादयिषीत्[6][7] ॥ ५ ॥

उपवती[8] द्वितीयस्य प्रतिपन्नवमात्[9] स्तोमान्विता[10] ।
'कया ते अग्ने अङ्गिरः[11]' इति[12] होतुराज्यम् । SV. 2. 899; RV. 8. 84. 4.
केति तृतीयामिति हि भवति[13] ।
10 अथाप्याह[14]—"यत् सामा स्तोमो भवति तदाज्येषु । निराह" इति । PB. 11. 2. 1, 2.
तां[15] एताः[16] कवत्यो[17] यथा वामदेव्यस्यर्चो[18] दाशरात्रिकाण्युत्तराणि सन्तनीति[19] ।
स्वयोनीति[20] होतृकपृष्ठान्येतानि ।
छन्दोमत्र्यहे प्रायश्चित्तार्थे[21] गायत्रपार्श्वं[22] मैत्रावरुणसाम ।
15 एतद् वामदेव्यसदृशम्[23] ।
तत् खलु बृहतीषु करोति[24] त्रिस्थानां[25] बृहतीं पृष्ठेषु चिकीर्षन् ।
अथाप्यस्मिन्नक्षराक्षरं[26] भवति ।
ककारषकारादिरकारः सन्तनि ब्रह्मसाम ।
'अस्तावि मन्म पूर्व्यम्' इति । SV. 2. 1027; RV. 8. 52. 9.
20 एता ब्रह्मप्रवादा इति ।
संकृत्यच्छावाकसाम[27] नवमाद् भागान्वितम् ।
अथ खल्वत्रांजामि[28] भवति ।
लोकविधां त्रिरात्र उपकृतः[29] ।
सम्भिन्नमाभ्यां लोकाभ्यामन्तरिक्षमिति ।

---

1 अनु प्र० C, K. 2 C omits सन्ताना० भवन्ति. 3 ०र्थानिदं G1, G2, J, K. 4 ०ग्रहो C; ०ग्रहोय G1, G2, J, K. 5 जगतीं C, G1, G2, J, K. 6 ०न्ते तेना० G1, G2, J. 7 ०षत् B. 8 उपपदी B. 9 ०न्नस्य च पाद् G1, G2; ०न्नस्य वमाद् K. 10 भागान्विता C, G1, G2, J, K. 11 ०रसः C, G1, G2, J. 12 Wanting in G1, G2. 13 ०तीति C, G1, G2, J, K. 14 अथा प्रा० G1, G2, J, K. 15 Wanting in G1, G2, J. 16 ताः G1, G2, J, K. 17 आपत्यो B. 18 ०व्यर्चो C, G1, G2, J. 19 ०नोति B. 20 ०स्वायानीति G1, G2, J. 21 ०त्रार्थे C. 22 ०पार्श्व G1, G2, J. 23 ०व्यं स० B. 24 करोतीति B. 25 त्रिस्यानां C. 26 ०न्नवाक्ष० C. 27 सन्तन्यच्छा० C. 28 ०त्र जा० C, G2, J; खलुत्र० G1. 29 उपा० G1, G2, J.

पाञ्चमिकीं ककुभं करोति ।
तस्यां[1]मक्षरात्तरं भवति ।
ककारषकारादिरकारः पिपीलिकामध्यां करोति ।
घागुक्तोऽयं त्रिरात्रः ।
5 तत्रोभावाकारौ[2]वनुष्टुभामचिकीर्षीत् ।
नावमिकीरुत्तराः ।
अत्तरसमासो हि तार्तीयिकेषु[3] ।
तासां मध्यमामुद्धरति ।
दशरात्रलिङ्गेति ।
10 तत्रैतां करोति ।
१ २ ३ १ २
'तं॑ सखायः पुरूरुचम्' इति । SV. 2. 1030; RV. 9. 18. 12.
एषा सखिमती यथा वामदेवस्यर्चः ।
ता यदावर्तयति परिवत्या प्रक्रमं परिजिहीर्षन् ।
नानाग्निष्टोमसामानि ।
15 नानात्वावृत्तार्थो[4] नानाछन्दः[5] ।
स्वावृत्तेष्वेवं भूयो[6] नानात्वमिति ।
स यदिहानुष्टुभं[7] करोति ।
बृहतीः कृत्वानुष्टुभा वेलेति[8] ।
तत्रैतद् विशोविशीयं॑ स्वयोन्यापन्नं पुरस्तादेतत् स्थानम् ।
20 वाक्[9]प्रवादोऽत्र भवति ।
भागान्वितान्युक्थानि ।
१ २ ३ १ २र
'होता देवो अमर्त्यः' इति । SV. 2. 827; RV. 3. 27. 7; 8. 19. 24.
तृतीयस्य होतुराज्यम्[10], हो इति तृतीयमिति हि भवतीति ।
गोषूक्तं[11] प्रायश्चित्तिसाम ।
25 एतस्मिन्नत्तरात्तरं भवति ।
ऐफादिरकारः सतोबृहतीं करोति ।
त्रिपदा त्रिरात्रेऽभिरूपेति ।
सत्रासाहीयं मैत्रावरुणसाम ।
एतद् वामदेव्यसदृशम् ।

---

1 एतस्यामक्षरं C, J, K; एतस्यमक्षरं G1, G2. 2 ०राऽनु० C; ०रानु० G1, G2, J, K. 3 ०कीषु C, G1, G2, J, K. 4 नानात्वार्थो C, K. 5 सावृ० B. 6 ०भूतो B. 7 ०भः C, G1, G2, J, K. 8 चो भवति Cक. 9 चार्क० B. 10 G1, G2, J repeat it. 11 गौ० B, K.

पुरस्तादेतत्[1] स्तोभं बहिःस्वारम् ।
यथा वामदेव्यम् ।
वारवन्तीयमग्निष्टोमसाम ।
एतद् गायत्रीसामापन्नं पुरस्तादेतत् स्थानम् ।
5 वाक्प्रवादोऽत्रे[2] भवति ।
वागुक्तोऽयं[3] त्रिरात्रैः[4] ।
अपि वानुष्टुभोपपत्त्या[5] वाक्प्रवादेनानुग्रहो भविष्यतीति ।
अक्षरविक्रमेऽयं[6] त्रिरात्रः ।
अपि वानुष्टुभोपपत्त्याक्षरप्रवादेनानुग्रहो भविष्यतीति ।
10 विद्वानविद्वानिति तु भवति[7] ।
नानासाधुरयं त्रिरात्रः ।
तत्र नानर्त्विजोऽचिकीर्षेत्[8] ।
कथमविद्वानृत्विक् स्यादिति त्वेवैतत् सदस्यानेव प्रतिग्राहकान् कुरुत इति ॥ ६ ॥

15 राजयज्ञ उत्तरः ।
तस्य यदेव[9]विधोऽहर्योगः ।
एतान्यन्ताहानि[10], अन्तो हि राजेति ।
महानाम्नीर्[11]मध्यमस्याह्नः पृष्ठं करोति ।
सर्वच्छन्दस्यास्ते[12] ।
20 सर्वपशूनामालम्भो[13] भविष्यतीति ।
अथाप्येता वज्रोक्ता राजयज्ञेऽभिरूपाः, वज्री हि राजेति ।
कथं धर्मा इति ।
कर्तव्या इत्येके[14] ।
[15]ते चैव करणवर्णा ये वज्रे ।
25 अपि चेह स्वस्थानतराः पृष्ठं च हि भवन्ति ।
अहीने च ।
अथापि बह्विदमिहाशान्तं क्रियते ।
सर्वपशूनामालम्भोऽप्यभिमेथिकाः[16] पृष्ठविलोपः ।

---

1 अपु० C; उपुर G1, G2, K; उत्पुर J. 2 ०दो G1, G2, J. 3 ०क्तो० G1, G2. 4 ०त्रे G1, G2, J. 5 ०पयत्या B; पथत्या G1, G2, J, K. 6 ०मो० B. 7 ०न्ति C. 8 ०र्षत् B. 9 ०स्था० B. 10 ०भ्यन्तरानि G1, G2; ०न्यन्तो० K. 11 ०म्नि G1, G2, J, K. 12 ०न्दस्स्यासु C; ०न्दःस्यासु G1, G2, J; ०न्दस्यासु K. 13 C adds न. 14 ०त्येते C. 15 C, G1, G2, J, K add तत्र. 16 ०मेधिकाः B; ०मेथिकां G1, G2; ०मैथिकां J.

तत्रापः शान्त्यर्थाः[1], ते क्रियमाणा बृहद्रथन्तरयोर्धर्मान् कारयेयुरिति ।
अथापि संयुक्तधर्मा इति ।
अथ बृहद्रथन्तरयोर्धर्मान्[2] कुर्युः ।
[महानाम्नीवलात्तु[3] नूनम् ।][4]
5 महानाम्नीनां[5] धर्माः क्रियेरन्निति ।
अकर्तव्या[6] इत्यपरम् ।
तत्र[7] ते[8] चैवाकरणवर्णा ये वञ्जे[9] ।
अपि च यः स्वाध्यायधर्मान्[10] प्रतीयात्[11] कृत्स्नान् प्रत्येतुमर्हतीति[12] ।
तेऽवेलायां[13] नोर्ध्वं[14] माध्यन्दिनीन् महानाम्नीभिः स्तुवीरन् ।
10 एका[15] वा द्वौ वा सम्प्रगायेतां नेतरे[16] शृणुयुरिति ।
एतान्येवमकुर्वतो[17] निर्वचनस्वाध्यायधर्मः[18] ।
अथापि यो बृहद्रथन्तरयोर्महानाम्नीकारितान् धर्मान् मन्येत भूयश्चा[19]-
ल्पीयसेऽनुसंहरेत् प्रत्यक्षे च परोक्षायां[20]नुचर्य्यं गमयेदिति ।
अतस्तत्पापीयो[21] बृहद्[22]रथन्तरधर्माननु[23]कृत्वा महानाम्नीनां धर्मान् कर्त्तव्यान्
15 मन्येत ।
समानो[24]त्पादानां[25] समानविधानानां सतां[26] य एकान्[27] कुर्यात् ।
एकान् न किं सोऽत ऊर्ध्वं न[28] व्याहन्यात्[29] ।
व्याख्याता अनुष्टुभः प्रतिपदश्चतुष्टोमे[30] ।
ताभिः प्रच्युं[31]तामुपवतीं द्वितीयेऽहनि प्रतिपदं करोति ।
20 कविमन्तं प्रथमात् प्रच्युतं तृतीयेऽहन्यनुगृह्णाति ।
वामदेव्यं महानाम्नीभिः प्रच्युतं स्वे स्थानेऽनुगृह्णाति ।
पार्थुरश्मं ब्रह्म[32]साम ।
पङ्क्तिप्रतिप्रयोजना महानाम्न्यः ।

1 ०र्था G1, G2, J, K. 2 ०र्द्धमर्नि G1, G2; र्द्धर्मांश्वा J. 3 ०लात्तु C, G1, G2, J, K. 4 Wanting in B. 5 ०म्नीनों G1, G2, J. 6 ०व्य G1, G2. 7 Wanting in G1, G2, J. 8 Wanting in B. 9 भ्रे G1, G2; त्रे J, K. 10 ०ध्यायमतिवायाक्व० G1; ०ध्यायधर्मा तवायाक्व० G2; ०ध्यायधर्मातवयाक्व० J, K. 11 प्रतिपदं B. 12 ०र्हति B. 13 ते वे० C. 14 नोर्ध्वस्तन्मा० C; नोस्ते मध्य० G1, G2, J, K. 15 एका B. 16 इतरे G1; रेतरे G2, J. 17 ०वन्तो C, G1, G2, J, K. 18 ०नः स्वा० G1, G2, J, K. 19 भूयसश्च० B. 20 या is wanting in G1, G2, J; ०क्षया० K. 21 C, G1, G2, J add यो. 22 बृहद् is wanting in G1, G2. 23 ०नु कृत्वा B. 24 सामान्यो० G1, G2, J, K. 25 ०त्पादनं० G1, G2; त्पदानं० J. 26 सतान् G1, G2, J. 27 एतान् B. 28 म० C. 29 न्याह C, G1, G2, J, K. 30 ०मैता० C, G1, G2, J. 31 प्रस्युता० G1, J. 32 बृहत्साम B.

एतत् पाङ्क्तं चत्रसाम, अथकारणिधनम् ।
ताभ्यां प्रच्युते सन्तनिनी माध्यन्दिनेऽनुगृह्णाति ।
आशीःसा[1]मनी मा[2] प्रच्यो[3]षातामिति ॥ ७ ॥

अथैतस्य एतन्तकस्य प्रथमेऽहनि वैष्णवीष्वनुष्टुप्सु पावमानीषु[4] बहिष्प-
5　　वमानं[5] कल्पयेदित्येक आहुः ।
एतत् प्रकृतौ दृष्टं भवतीति[6] ।
नैतदयुं[7]क्षु स्तोमेषूपपद्यत इत्यपरम् ।
एतस्मिन्नेव बहिष्पवमाने गायत्रीः पावमानीरावपेत् ।
एतद्धि[8] हा[9]र्विष्कृतं भवतीति[10] ।
10 चतुष्टोमकारितास्ता भवन्तीत्यपरम् ।
गायत्रीष्वेव कल्पयेदिति ।
अथ खल्वाह—एते एव पूर्वे अहनी इति ।
तत्रैके पातन्तके प्रतियन्ति ।
एतं विधाय प्रदेशो भवतीति ।
15 प्रकृत्यपश्रया विकारा भवन्तीत्यपरम् ।
प्राकृतस्यै[11]वाश्वमेधस्य प्रतीयादिति ।
अथापि ते नानास्तोमाः ।
एकस्तोमोऽयं[12] भवति ।
तत्र स्वतन्त्रा एकाहाः स्युरित्येके ।
20 बहुधै[13]काहाना[9] स्वातन्त्र्यं दृश्यते ।
यथा—आयुष्कामे षड्रात्रे[14]नवरात्रयोरिति ।
त्रि[15]रात्रतन्त्रा इत्यपरम् ।
एवं च तन्त्राविलोपः । [1] cp. LS. 9. 11. 13.
अपि चैषोऽहीनन्याय इति ।
25 अषोडशिके[16] गोआयुषी इत्यपरम् ।
एवं [17]दृष्टे च, अपि चैवं प्रदेशो भवतीति ।
अथैष वैदत्रिरात्रः[18] ।

---

1 ०सामनि B; ०सामानी C. 2 वा G1, G2, J, K. 3 प्रच्योयोन्द्रता० B; प्रत्येघाता० C. 4 ०नीभिर्बर्हिषु B. 5 ०मानिनं G1, G2, J. 6 ०वती B. 7 ०दसुक्षुः C; ०दयुक्षुः G1, G2, J. 8 ०दिशा G1, G2, J, K. 9 हार्धिकृतं G1, G2, J. 10 ०वति K. 11 ०स्यैवमे प्र० G1, G2, J; ०स्यैवामे० K. 12 ०मो यन् भ० C, G1, G2, J; ०मो यद् भ० K. 13 बहुष्वेका० B. 14 ०त्रे न० C, G1, G2, J, K. 15 त्रि is wanting in G1, G2, J, K. 16 ०को B. 17 मह्ये B. 18 ०त्रस्य त्रि० G1, G2, J.

तस्य त्रिवृत्स्तोमाः स्युः ।
षोडशिन उत्तमस्यातिरात्रस्य षोडशं प्रथमꣳ रात्रिषाम ।
एवं तावत् स्तोत्रीयो[1] यथा त्रिरात्रः ।
नाना षोडशसामानि[2] नानात्वार्थः[3] ।
5 नानदं प्रथमः ।
उद्वꣳशीयं द्वितीयः ।
एतदानुष्टुभꣳ हरिवद्योनि, यथा गौरीवितम् ।
तस्य स्थाने तैरश्च्यम् ।
एतत् पूर्वाभ्याꣳ समायं न्याय्य[4] उत्तमे षोडशिं[5] ।
10 अथैत उत्तर एतान्[6] कामानभ्युपकृताः ।
यथैतद् ब्राह्मणम् ।
स्तोमकारित आवापः ।
अन्तर्वसावप्रत्यवरूढानि उत्तमस्याह्न उक्थानि[7] ।
लोकविधां त्रिरात्र उपकृतो रोहोपकारः ।
15 अथाप्येवमव्याहृतꣳ सवनमिति ।
न्यायक्लृप्त उत्तरो न्यायक्लृप्त उत्तरः ॥ ८ ॥

तृतीयः[8] पटलः

"अथैष चतुर्वीरो बृहद्रथन्तरपृष्ठ एव ।
न हि षाडहिकान्यनुभवन्ति ।
20 नान्यो[9] व्यलुलुप्सीत् ।" Ārṣ. K. V. 74 b.
ते यन्नानाछन्दस्त्सु ब्राह्मणेनैव तद् व्याख्यातम् ।
कानि तन्त्राणीति ।
चतुरहतन्त्राणीति[10] गौतमः ।
तद् विजानीमः ।
25 चतुर्थेऽहनि चतुर्थप्रतिपदमादिश्यैकाह[11]तन्त्राद्रात्रिमुपजिगमिषन्नस्य प्रज्ञां करोतीति ।
त्रीण्यहीनिकानि ।
एकमैकाहिक[12]मिति धानञ्जय्यः ।
एवं पर्वणा[13]हीनस्यादानम्[14] ।

---

1 स्तोमो C; ०या G1, G2, J, K. 2 ०शि० K. 3 नात्वा० G1, G2, J, K. 4 न्याम्यत B. 5 ०शस्य B. 6 एतां C. 7 उक्तलो० B. 8 In B only. 9 नो B, K; नानो G1, G2, J. 10 Wanting in G1, G2, J. 11 ०शैका० C, G1, G2, J, K. 12 ०मेकैका० G1, G2, J. 13 प्रवणा० G1, G2, J. 14 ०दनन्तम् B.

एकाहतन्त्राद्[1] रात्रेरुपायः ।
स यदेतदनन्ततन्त्रतरं[2] स्तोमकारित आवापः ।
उद्धरति जनुषैकश्यौ स्तोमकल्पार्थः ।
तत्र ज्योतिष्टोमौ[3] करोति ।
5 तयोः स्थाने नानापवमानिकेभ्यो नानात्वार्थः[4] ।
अथ यत्रायमर्थो[5] भवति साप्तमिकीं तत्र ककुभं करोतीति[6] ।
असञ्चाराय तत्र खलु पदैस्तोभान्[7] करोति ।
चतुरोऽयं[8] वीरानुपकृतः ।
त एते चत्वारः समानयोनयः समानार्षेयाः पुन्नामधेया गणेडा
10 गणनिधनाः ।
अपि वा चातुर्विध्यादेव[9] क्रियेरन् ।
तांस्तु यदेवं प्रयुङ्क्ते[10], एवमिडान्तो[11] रोहः ।
अपि चैवं दाशरात्रिकोऽवसाने[12][13] भवतीति ।
तान् खल्वन्त्यान् करोति ।
15 अत्रैषां[14] स्वच्छन्द इति ।
तत्[15] कुशलं[16] यन्नित्यासु ।
'धर्त्ता दिवः'[17] इति । SV. 1. 558; 2. 578; RV. 9. 76. 1; PB. 14. 9. 4.
उत्तम एतासु स्वयोनिः ।
20 अथाप्येता अन्तलक्षणैः सम्पन्ना इति ।
व्याख्याता अर्काः ।
तेषां तदेवानुपूर्व्यं[18] यत् त्रिरात्रे गोषूक्तं[19] प्रायश्चित्तिसाम[20] ।
पदस्तोभबाधितमर्कं[21] द्विपदास्वनुगृह्णाति ।
तेन प्रच्युतं वारवन्तीयमुष्णिह्यन्तसाम मा प्रच्योष्टेति विपरिहरति ।
25 आनुष्टुभेऽजाम्यर्थः ।
एतेनैवोत्तरे व्याख्याताः ।
उद्धरति पदस्तोभान् ।
न ह्येते चतुरो वीरानुपाकृताः ।

1 ॰न्त्राया त्रे॰ G1, G2, J. 2 यदेतदेतत्तन्त्रान्तरं C; यदेतदन्तत्रतरं G1, G2, J, K. 3 ॰म्यौ C, G1, G2. 4 नावमिक्यौ C, G1, G2, J, K. 5 यत्र षडहो॰ C, G1, G2, J, K. 6 ॰रोति C, G1, G2, J, K. 7 पाद॰ B. 8 B adds चतुरो. 9 ॰र्विदध्या॰ K. 10 प्रयन्ना B. 11 ॰डातो C, G1, G2, J, K. 12 ॰त्रिकौव॰ G1, G2, J, K. 13 ॰सानो C. 14 स्वं छन्द C; स्वंद G1, G2, J. 15 तान् C, G1, G2, J, K. 16 ॰लत्वं B. 17 धर्मा B. 18 यतदे॰ G1, G2, J. यत्तदे॰ K. 19 गौ॰ K. 20 ॰सामाः G1, G2, J, K. 21 ॰वाधम॰ C, G1, G2, J, K.

तत्र कुशलं यन्नित्यादि[1]पदस्तोभापायादर्कः स्वꣳ स्थानꣳ समापद्यते ।
तस्यानुसमाप्ति[2]ꣳ श्रुध्यवारवन्तीये समापद्येते[3] ।
अतो यो द्रव्यविकारः स्तोम[4]कारितः स भवति ॥ ९ ॥
अथ खल्वाह—"वसिष्ठस्य जनित्रे भवतः" इति । PB. 19. 3. 8; 21.
5 11. 3; LŚ. 9. 12. 8.
कस्येदं ब्राह्मणꣳ स्या[5]दिति ।
बृहद्रथन्तर[योर[6]विप्र]योगस्येत्याहुः, एते[7] हि विश्वोवसीयसी आजनित्रे भवत इति ।
अपि वा रथन्तरस्यैव द्वियोगस्यैतद्धि वासिष्ठमिति ।
10 अपि वा रथन्तर[8]स्यैव भवतश्च वासिष्ठस्य, एते[9] वासिष्ठे भवत इति ।
जनित्रे एवा[10]नुकल्पयेदिति कौत्सः[11] ।
जनित्रे भवत इति सति किमन्यदनुकल्पनात् ।
न त्वेवानुकल्पयेत् ।
न ह्येते आनवकाश्यान्नुकल्पयतीति ।
15 एतेषा[12]मेव विचाराणामेकस्यैतद् ब्राह्मणꣳ स्यात् ।
एक[13]स्तोमतामिवाह्नां[14] दिदर्शयिषन्नुत्तमे भागस्तोमान् करोति, एते प्राप्ति[15]स्थाना इति ।
पञ्चरात्रस्य चतूरात्रेणैव पृष्ठवादो व्याख्यातः ।
ते खलु स्वासुं[16] करोति ।
20 न ह्ययं चतुरो वीसनु[17]पकृतः ।
अथापि नानाभागश्चतूरात्रः ।
अ[18]थेह समानभागे चतुर्थपञ्चम इति ।
कानि तन्त्राणीति ।
पञ्चा[19]हत[20]न्त्राणीति गौतमः ।
25 तच्चतूरात्रेणैव व्याख्यातम् ।
चत्वार्याहीनिकानि ।

1 ०वि० G1, G2, J, K. 2 ०मापत्ति० G1, G2, J, K. 3 ०यते B, G1. 4 स्तोभ० C; ०स्तोमविकारः K. 5 J omits स्यादिति ··· वा रथन्तर (line 10). 6 योरविप्र is wanting in B. 7 ०रेके B. 8 ०स्य इवत० C; ०स्यये इवत० G1, G2, J; ०स्य चेहवत० K. 9 एके B. 10 वा० B. 11 ०त्सौ G1, G2, J. 12 ०षां त्वेव C, G1, G2, J, K. 13 एवस्तो० G1, G2. 14 ०वर्ह्ना G1, G2, J. 15 प्राप्त० C, G1, G2, J, K. 16 यः सवनसाधु B. 17 ०नुकृतः C. 18 येह G1, G2, J, K. 19 ०ञ्चमाह० K. 20 G1, G2, J add तं after ०ह.

एकमैकाहिकमिति धानञ्जय्यः[1] ।
तत्तेनैव व्याख्यातम् ।
अग्निष्टोमः प्रथममहरुक्थानि मध्यः[2] ।
दशरात्रन्यायेन यत्र सꣳस्थाभिप्रयुज्यते[3], एषाभिप्रयुज्यते[4] ।
5 उद्धरति षोडशिनं चतुर्थात्[5] ।
"विराजमन्वपायꣳ[6] स्वराजोपेयुः ।" Ārs. K. V. 112 b.
स्तोमस्य[7] वा लोपात्[8] ।
अथाप्येनमतिरात्रे करिष्यन् भवति ।
तन्न[9] संमविचारयिषीत्[10] ।
10 उद्धरति आतीषादीयं धर्मिणि, तत् पुरा षडहे धर्मि भवति ।
तत्र याथान्तर्यात् क्रोशं प्रत्याहरति ।
अपि वा श्रुध्येन प्रच्युतमिहानुगृह्णाति ।
तदु भवत्यूर्ध्वेडं बार्हतेऽहनीति ।
स्तोमकारित आवापः ।
15 एतेनैवोत्तरो व्याख्यातः ।
स्तोमकारित उद्धारः[11] ।
सप्तदशस्तोमं[12] षोडशिनं[13] करोति ।
यो वा ह्यह्नः स्तोमः स षोडशिनो न्यायेन ।
यो वा[ह्नि[14] भक्तिरेवमुत्पन्नो हि भवति ।
20 अथाप्यनादिष्टव्यूहेन भवति ।
अथ कथमहीनाह्नो रात्रेरितीति ।]
ह्रसीयानित्यह्नः[15] स्तोमं चैनमनुयन्तं[16] पश्यामः ।
अथाप्याह—सप्तदशꣳ स्तोमा नातियन्तीति[17] ।
व्रतात्तिमुत्तरं[18] उपक्लृतः[19] ।
25 स खल्वेकाहक्लृप्तः[20] ।
ते व्याख्याताः ॥ १० ॥

---

1 एवकामैका० G1, G2; एव कमैका० J, K. 2 मध्ये C, G1, G2, J, K, 3 ०स्थाहि प्र० B; ०स्थानि प्र० G1, G2, J, K. 4 एताहि प्र० B. 5 ०नश्च० B. 6 विराजाम० C, G1, G2, J, K. 7 सोम० K. 8 लोभात् C, G1, G2, J. 9 तत्त G1, G2, J; wanting in K. 10 समवैवि० C, G1, G2, J, K. 11 उच्चारः G1, G2; उ॒र J. 12 ०शं C; स्तोमं is wanting in C, G1, G2, J, K. 13 ०शिकं B. 14 B omits ह्नि ··· रात्रेरितीति (line 21). 15 ०त्यह्रः C, G1, G2, J, K. 16 स्वे तम० C. 17 ०न्ती C, G1, G2, J. 18 ०रमुप० C. 19 ०ह्नतः G1, G2, J, K. 20 खल्वेकाहा क्लृप्ताः C.

"ऋतुषडहे कथं रात्रिरिति ।" Ārṣ. K. V. 111 a.
अकर्त्तव्येति शौचिवृक्षिः ।
एवमुत्पन्नो हि भवति ।
अथाप्यनादिष्टा[1] व्यूहेन[2] भवति ।
5 अथापि कथमहीनाह्नो[3] रात्रेरुपायो[4] भविष्यतीति ।
अथापि कृत्स्नतायै वै नूनमिह रात्रिः क्रियेत, कृत्स्नोऽयं षडह इति ।
अथाप्येष चतुर्थो भागो रात्रेः[5] प्रत्यद्धितामत्यक्रमिष्यदिति[6] ।
"कर्तव्येति गौतमः ।" ibid.
आदिष्टा कल्पेन भवति ।
10 अथाप्येषाहीनैः[7] संस्था यां[8] रात्रिस्तामवसानभूतां[9] षष्ठमहरागच्छतीति ।
अथाप्येषोऽहीनन्यायः ।
सर्वेऽतिरात्रमन्तः[10] ।
अथाप्यतिरात्रिकं[11] व्रतम् ।
तस्यान्ते निपाताद् रात्रिमुपधीयमानां पश्यामः ।
15 यथा सप्तरात्रेषु ।
अथापि यः पृष्ठ्यावलम्बस्य[12] पञ्चमादर्धदेशाद्[13] रात्रिमपनयेत्[14], अर्थापायाद्रात्र्यपायाच्च स्तोमप्रत्यवरोहम्[15], इहापि[16] सोऽर्थागमाद्रात्रिं प्रत्येतुमर्हतीति ।
यद्वेतदेवमुत्पन्न इति, अन्ततो[17] वै[18] तत्र भवति, अन्तदर्शना रात्रिरिति ।
20 यद्वेतदनादिष्टा[19] व्यूहेनेति, नित्यत्वान्नूनमेनानादिशतीति ।
यद्वेतत् कथमहीनाह्न इति, कथं वाऽप्यतिरात्रिकोऽभविष्यदिति, पश्यामश्चाहीनिकेभ्यस्तन्त्रेभ्यो[20] रात्रेरुपायम्, यथा त्रिरात्रेषु ।
यद्वेतत् कृत्स्नोऽयं षडह इति, कृत्स्नो ह्येव[21] षडहः रात्र्या तु कृत्स्नतरो[22] भविष्यतीति ।

---

1 ०प्यन्वादि० B; ०प्यानादि० G1, G2, J. 2 व्यूहेतरार्थान् B. 3 ०नामह्नो० B. 4 ०योऽभविष्यदिति C. 5 रात्रेः (रात्रिः G1, G2, J) कृत्ये तत् कृत्स्नोऽयं षडह इति अथाप्येष चतुर्थो भागो रात्रेः प्र० C, G1, G2, J. 6 ०त्यध्यता० B. 7 ०ने स० G1, G2, J. 8 यद् C, G1, G2, J, K. 9 स्तोमवसानगतां B. 10 सर्वे ते रात्रिमतः C; सर्वे ते रात्रियंतः G1, G2; सर्वे ते रात्रियंता J; सर्वे ते रात्रि० K. 11 ०प्य(प्या J)रात्रिकं C, G1, G2, J, K. 12 ०लम्बनस्य C. 13 ०मादनादे० C, G1, G2, J, K. 14 ०मुप० C. 15 ०रोहः C. 16 अपि C. 17 अनन्ते C, G1, G2, J, K. 18 Wanting in G1, G2. 19 ०ष्टव्यू० C, G1, G2, J. 20 ०निकल्पस्तन्त्रे० G1, G2, J, K. 21 दैव G1, G2, J, K. 22 ०तारा G1, G2, J, K.

यद्धेतद्[1]क्रमिष्यदिति, अग्र[2] एवातिक्रान्तो भवति ।
अति[3]क्रामन्तं च पश्यामः ।
यथाप्तोर्यामे गौरीवितापायात् पृथक्[4] स्वारा[5]णि [स्तोत्राणि][6] करोति
नानासाधुर[7]हीन इति ।
5 स यदेतान्येतानि रूपसम्पन्नानीति ॥ ११ ॥

आयुष्काम[8]यज्ञ उत्तरः ।
तत्र त्र्यहौ समस्य नि[9]दधातीति ।
अहीनत्र्यहं चैकाहत्र्यहं च ।
कस्य हेतोरिति ।
10 "त्रयः प्राणापानव्यानाः" इति । PB. 22. 2. 3.
अग्निष्टोमसंस्थं ज्योतिषम् ।
एषास्य प्राकृती संस्था ।
अथाप्येतया संस्थया चरति ।
अथापि नानात्ययाविमौ त्र्यहौ, ता[10]वुपक्रमसंस्थया प्राचिक्रमिषीत्[11] ।
15 अषोडशिका रात्रिः स्तोमङ्मात्रेण, अषोडशिको ह्येवायुर्भवतीति ।
द्वितीयस्याह्नो [[12]वासिष्ठं माध्यन्दिनान्त्यं स्यादिति शाण्डिल्यः ।
षष्ठार्थेनेदं पुरा प्रच्यवते नेह षष्ठार्थ इति ।
पार्थमेवेति गौतमः ।
एतत् समूहसाम, समूढावच्छेदोऽयं भवतीति ।
20 तृतीयस्यानुष्टुभि] बृहत् करोति ।
त्र्यहे सर्वं[13] बृहद्रथन्तरे युयुत्समाणः ।
अजाम्यर्थं वैवं[14] स्यात् ।
पृष्ठ्यावलम्ब उत्तरः ।
तस्य पञ्चाहो बृहद्रथन्तरपृष्ठ एव ।
25 विश्वजिति हि पृष्ठानि करिष्यन् भवति ।
उद्धरति षोडशिनं चतुर्थात् ।
तत् पञ्चरात्रेणैव व्याख्यातम् ।
त्रयस्त्रिंशानि पञ्चमस्याह्न उक्थानि ।

---

1 ०दत्यक्र० G1, G2, K. 2 ०ग्रह G1, G2, J, K. 3 अभिक्रा० B, C. 4 पृष्ठयस्वा० K. 5 ०राक् G1, G2, J. 6 B, K omit it. 7 ०धुरहित G1, G2, J. 8 ०ष्कामानां B. 9 G1, G2, J, K have निति for निदधाति … इति (line 7). 10 तानुप० C, G1, G2, J, K. 11 ०मयि० B; ०क्रमेयषीत्० G1, G2, J, K. 12 वासिष्ठं … ०नुष्टुभि (line 20) wanting in B. 13 समं C, G1, G2, J, K. 14 चैव C.

रात्रिकारितो हि स्तोमप्रत्यवरोहः ।
तान् विश्वजिति करिष्यन् भवति भवति ॥ १२ ॥

चतुर्थः पटलः[1]

अथातः सप्तरात्राः ।
5 तत्र पृष्ठ्यं व्रतं सप्तमं करोति[2] ।
एतदकृतं[3] पृष्ठं[4] भवति ।
अथाप्यनङ्गमेतद्[5] व्रतस्य[6] यदुक्थानि ।
तत्र ज्यौतिष्टोमानि[7] स्वस्तोमान्याहरति, षोडशिमती[8] रात्रिरहीनन्यायेन ।
अथाप्यनङ्गमेतद्[9] व्रतस्य यद्रात्रिः ।
10 तत्र यैवं[10] कृत्स्नतमा रात्रिस्तोमाहरतीति[11] ।
सप्तदशमुत्तरस्य [व्रतम्[12] ।
स्तोमकारित उद्धारः ।
तस्य स्तोमान्वयीत्युक्थानीति ।
किं स्तोमानि स्युरिति ।
15 एकविंशस्तोमानीति गौतमः ।
एष[13] एषां प्रकृतिस्तोमो[14] भवति, तमन्वियुरित्येतत्स्यात्[15] ।
सप्तदशस्तोमानीति धानञ्जय्यः ।
एषोऽस्य[16] व्रतस्य स्तोमो भवति, तमन्वियुरित्येतत्स्यात् ।
पञ्चविंशस्तोमानीति] शौचिवृक्षिः ।[17]
20 एष व्रतस्य प्रकृतिस्तोमो भवति, तमन्वियुरित्येतत् स्यात् ।
अथाप्येवं तासां स्तोत्रीयाणामनुग्रहो भवति याः[18] पञ्चविंशाद् व्रतात् सप्तदशे क्रियमाणेऽपयन्ति ।
द्वे[19] पक्षस्तोत्रीये नानुगृह्येते ।
[ते[20]] चेदनुजिघृक्षेत् त्रिणवं प्रथममुक्थं कुर्यात् ।
25 एकविंशं स्तोमं[21] षोडशिनं करोति ।
एषोऽस्य प्रकृतिस्तोमो भवति ।
अथाप्येवं तासां स्तोत्रीयाणामनुग्रहो भवति यथैतच्छौचिवृक्षिरिति[22] ।

1 in B only. 2 B adds इति. 3 तद० G1, G2. 4 ०कृष्टं K. 5 अनङ्ग० G1, G2, J, K. 6 B adds यद् व्रतस्य. 7 ज्यौतिष्टोमानः B. 8 ०मति० B. 9 ०प्यभङ्ग० G1, G2. 10 ०येन G1, G2, J. 11 ०स्तमो ह० C; ०तमोह० G1, G2, J, K. 12 B has व्रतस्तोमान्वयानीति for व्रतम् । स्तोमा०… ०स्तोमानीति (line 19). 13 Wanting in G1, J. 14 G1, G2, J add न. 15 G1, G2, J omit स्यात्. 16 ०sद्य G1, G2, J, K. 17 Wanting in G1, G2, J, K. 18 यः B. 19 द्विपक्ष० C, G1, G2, J, K. 20 Wanting in B, G1, G2, K. 21 ०शं षो० C, G1, G2, J, K. 22 ०क्षे० B.

छन्दोमपवमानमुत्तरस्य व्रतम् ।
स्तोमकारित आवापः ।
अथ खल्वत्र विधर्माकरिष्यन् स्तोमज्ञात्रेण कस्माद् धर्म करोतीति ।
द्वन्द्वयोः साम्नोर्याथान्तर्यात् पूर्वमाद[1]त्ते ।
5 अथाप्येतस्याविकृतं निधनं भवति ।
अ[2]विकारः पूर्वो[3] विकारादि[4]त्येके ।
एकवि॰शान्युक्थानि ।
एकवि॰शस्तोम॰ षोडशिनं करोति ।
तद् व्याख्यातम् ।
10 प्रथमे सप्तरात्रेऽभ्यास उक्तः ।
उत्तरस्य पञ्चाहो बृहद्रथन्तरपृष्ठः ।
चतुर्थस्याह्न एकवि॰शः षोडशी ।
"पञ्चमस्याह्नः पार्थस्य लोक आकूपारम्" वात्रेयं वेति विचारयन्ति ।
Ārṣ. K. VII 12 b.
15 नानापुरुषकल्पौ स्यातामिति ह स्माह धानञ्जय्यः ।
अन्य एवा[5]कूपा[6]रमरोचयिष्यत, अन्य आत्रेयम् ।
आत्रेयं चैवाभिरूपतरं पञ्चमेऽहनि स्थाने[7]सम्मितम्, पञ्चमस्थाना अत्रय इति ।
चतुर्थस्याह्नः शुद्धाशुद्धीयस्य लोक आकूपारम् ।
20 पञ्चमस्याह्नः पार्थस्यात्रेयम् ।
पार्थं चैव नित्यम् ।
अहः पार्थं व्याख्यातम् ।
आ[8]त्रेयं नु खलु कुर्वत उभयोरनुग्रहो भवति ।
व्रते हि पार्थं करिष्यन् भवति ।
25 चतुर्वि॰शं बहिष्पवमान॰ सप्तदशस्तोमं व्रतं करोति ।
तत्र त एवोक्थाना॰ स्तोमविचारा य[9]त् सप्तदशे व्रते ॥ १३ ॥

---

1 ०दात्त G1, G2, J, K. 2 वि० G1, G2, J, K. 3 ०र्वोऽवि० C. 4 ०दिति C, G1, G2, J, K. 5 एवन्यकू० B; वाकू० G1, G2. 6 ०रंरो० B; ०रभिरो० C; ०रमराच० G1, G2, J. 7 ०ने स० K. 8 आत्रेणमा० G1, G2, J; आम्रेयमा० K. 9 इदं B; यान् K.

अथ नवमः प्रपाठकः

अथ[1] प्रतिष्ठाकामयज्ञ उत्तरः ।
स खल्वेकाह[2]क्लृप्तः ।
ते व्याख्याताः ।
जनक[3]सप्तरात्रे चत्वार्याहीनिकानि ।
5 अहानि आहीनिकतन्त्राण्यनन्तत्वात् ।
उद्धरति षोडशिनं चतुर्थात् ।
[तद्[5]] व्याख्यातम् ।
व्याख्याता अर्काः ।
तेषां तदे[6]वानुपूर्व्यं यत् त्रिरात्रे ।
10 'धर्ता दिवः' इति SV. 1. 558; 2. 578; RV. 9. 76. 1; PB. 14.9.4.
उत्तम एतासु स्वयोनिः ।
द्वितीयस्याह्नः सौभरम्, उक्थानां ब्रह्मसाम कुर्यादिति धानञ्जय्यः । cp. PB. 8. 8. 11.
15 त्रैककुभं हि चतुर्थे करिष्यन् भवति ।
औपगव[7]मेवेति गौतमः ।
अतिरात्रे सौभरं करिष्यन् भवति ।
एवमुभयोरनुग्रह इति ।
षोडशि[8]मती रात्रिरहीनन्यायेन ।
20 अत्रैव चतुष्टोमः षोडशिमानिति शौचिवृक्षिः ।
शाम्बूपुत्रो नात्र च, नेति राणायणीपुत्रः ।

---

1 in C only. 2 Wanting in C, G1, G2, J, K. 3 ०काहः C. 4 ०कात्सप्त० G1, G2, K; ०का सप्त० J. 5 Wanting in B. 6 तदीयानु० B. 7 ०पवगव० G1, G2, J. 8 ०मति B.

पृष्ठ्यः स्तोम उत्तरस्य ।
षडहो बृहद्रथन्तरपृष्ठ्[1]य एव ।
विश्वजिति हि पृष्ठ्[2]यानि करिष्यन् भवति ।
चतुर्थस्याह्नः ।
5 'प्रत्यस्मै पिपीषते' इति SV. 1. 352; 2. 790; RV. 6. 42. 1.
गौरीवित[3] षोडशिसाम ।
विराजमन्वपाय[4] स्वराजोपेयुः ।
पृष्ठापायाद्रेवत्यो[5]ऽपयन्ति ।
तत्रैतद् दार्ढच्युतमेतद् गायत्रीसामेहकारवत् षण्णिधनम्[6] ।
10 यथा रेवत्यः ।
विपरिहरेदौदणो[7] रन्ध्र इति गौतमः ।
एवमिडारम्भेणा[8] बृहतीति ।
न विपरिहरेदिति धानञ्जय्यः ।
अपि ह्येवमजामि ।
15 स किमर्थो[8] नित्यं कल्पं[9] च्यावयेदिति ।
अष्टरात्रं[10]न्यायेन स्यात्, षोडशिका रात्रिश्चांतु[11]ष्टोमन्यायेन ।
अथापि कृतः षडहे षोडशीति ।
आयुष्कामयज्ञ उत्तरः ।
"स यन्नवरात्रो नव प्राणाः" इति । cp. PB. 22. 12. 4.
20 त्रिकद्रुकानुपदधाति छन्दोमसादृश्यात् ।
अथाप्येत ऊनस्य पूरयितारः[12] ।
षोडशिका रात्रिः[13] स्तोमशात्रेण, आषोडशिको ह्येवायुर्भवतीति ।
पशुकामयज्ञ उत्तरः ।
तत्र पञ्चाहं करोति ।
25 "पाङ्क्ताः पशवः" इति । PB. 22. 13. 3.
यदु विश्वजितं पाङ्क्तानि[14] पृष्ठानीति ।
त्रिकद्रुकानुपदधाति छन्दोमसादृश्यात् ।
अथाप्येत ऊनस्य पूरयितारः ।
तान् पुरस्तात् पञ्चाहस्य करोति ।

---

1 ०पृष्ठ C, G1, G2, J, K. 2 पृष्ठानि C, G1, G2, J, K. 3 ०जाम० C, G1, G2, J, K. 4 व is wanting in C. 5 षष्टिधनं G1, G2, J, K. 6 अपि प० B. 7 ०म्भयोः C, K; ०म्भयो G1, G2, J. 8 ०र्थे B. 9 ०ल्पय G1, G2, J; ०ल्प K. 10 ०रात्रस्याषो० C, G1, G2, J; ०रात्रास्याषो० K. 11 ०श्चतु० B. 12 पूरिता० G1, G2, J, K. 13 ०रात्रस्तो० B. 14 पशूकानि C, G1, G2, J, K.

विश्वजितꣳ हि रात्र्युपायं[1] करिष्यन् भवति ।
आयुषोऽनुष्टुभि बृहत् करोति ।
त्र्यहे समं[2] बृहद्रथन्तरे युयुक्षमाणः ।
अजाम्यर्थं वैव[3] स्याद् वार्कजम्भं वेति विचारयति ।
5 अथापि नैताꣳ स्वतन्त्राꣳ स्तोमविधां बृहदापद्यते ।
तत्राकूपारं तृचसमाप्तये ।
तदेतन्नवमाद्[4] भागान्वितम् ॥ १ ॥

अथैष दशरात्रः[5] बृहद्रथन्तरपृष्ठ एव ।
तत्र खलु विश्वजितं दशमं करोति ।
10 स खलु विश्वजित् क्रियमाणो दशमतन्त्रं प्रत्यूहति ।
तत् प्रत्यूहमानं पूर्वे तन्त्रे प्रत्यूहति ।
अत्र यदेवैकं पुरा सप्तमे कृततन्त्रं[6] भवति तत् प्रच्यवते ।
अथैते षष्ठनवमयोस्तन्त्र[7] व्यत्यस्यति ।
षोडशाहिकैरयꣳ[8] स्तोमैरभिविधीयते ।
15 स त्रयस्त्रिꣳशꣳ स्वतन्त्रमचिकीर्षीत् ।
तस्येतरस्थानं परीतं[9] भवति ।
अत्र खल्वयꣳ सर्वो दशरात्रो नानातन्त्रो भवति ।
समूहति बार्हद्रथन्तरपृष्ठान्[10] नित्याभिः ।
अनित्यो[11] ह मात्रायामकरिष्यत्, अनित्यो ह्ययं दशरात्र इति ।
20 नित्यास्तु[12] चतुर्थपञ्चमयोर्जगत्योः ।
याश्चतुर्थे नित्याः सप्तमेऽहनि ताः करिष्यन् भवति ।
अतो नित्याः करोति ।
तद्वशेन पञ्चमे कुशलं यदनित्याः[13] ।
त्रिष्टुभो[14] नित्याः ।
25 नित्यां[15] एवाचिकीर्षीदित्यपरम् ।
नित्ये[16] तन्त्रेऽनित्यौ स्तोमौ ।
तत्र नित्यानित्यौ[17] अभिरूपौः[18] ।

1 ०पायाय C, G1, G2, J, K. 2 सामं B. 3 वैत G1, G2, J, K. 4 ०न्नभवमाद् G1, G2, J. 5 ०रात्रे G1, G2, J. 6 कृतं तन्त्रं C, G1, G2, J. 7 पृष्ठ० B, G1, G2, J, K. 8 षाडहिकै० B; षोडशाहिक० G1, G2, J. 9 ०ते G1, G2, J. 10 B adds नित्यान्. 11 ०त्ये B. 12 ०स्तु C, G1, G2, J, K. 13 यो नि० B; यनि० G1, G2, J, K. 14 Wanting in G1, G2, J, K. 15 ०त्याभि G1, G2, J. 16 C, G1, G2, J, K add ह. 17 ०त्याभि० G1, G2, J, K. 18 ०पौ B.

यदु षष्ठी[1] उभयोर[2]नित्या ।
उभयꣳ ह्येव तत्रानित्यꣳ स्तोम[3]श्चैव तन्त्रं च ।
नित्यास्तु परयोरह्नः ।
नित्याभिर्ह्येतस्य त्र्य[4]हस्य समूहः ।[5]
5 नित्य[6]स्तु नवमे ।
अन्तर्विधा हि दाशमिक्यः ।
विश्वजित्यन्तर्वि[7]धाः करिष्यन् भवति ।
तत्र कुशलं यज्ज्योतिष्टो[8]म्यं करोति ।
तन्त्रान्विते च पृष्ठान्विते च ।
10 अथ खलु दीर्घतमसोऽर्कमष्टमेऽहनि करिष्यन् भवति ।
अन्तसामान्त इति ।
तन्त्रस्थः स्वा[9]शिरामर्कः ।
सप्तमे त्रय एव, एकोऽग्नेरर्कस्तन्त्रा[10]पेतः ।
तन्नव[11]ममहर्भवति ॥ २ ॥
15 अथ द्रव्यसमुद्देशः ।
यानि यथास्थानं व्याख्यातानि [ता[12]नि] यान्ययथास्थानं तैरेवाष्टभिः पर्यायैस्तेषामन्वयꣳ समन्वीक्षेत ।
नाना ब्रह्मसामानि नानात्वार्थः ।
श्यैतनौधसवर्णानि बार्हद्रथन्तरपृष्ठ्यान् नानाग्निष्टोमसामानि नानात्वार्थः ।
20 ऐडानि भूयिष्ठानि करोति ।
सामान्तस्य स्था[13]नेऽन्तसामान्तम् ।
अथाप्येष तृतीयसवनसामान्तः ।
तमदिदर्शयिषी[14]न्नाच्छन्दसि[15] ।
एवंभूयो नानात्वमिति ।
25 तानीमानि[16] सप्त छन्दाꣳसि नवा[17]हं नानुभवन्ति ।
त[18]त्र ककुभं च विराजं चोपप्रयुङ्क्ते ।
सा प्रायात् तानि कुशलं यद्द्रोहेण प्रयुङ्क्ते ।

---

1 पृष्ठ C; षष्ठ G1, G2; — J. 2 ०यीर C, K; ०यरनि० G1, G2, J. 3 सोम० G1, G2, J. 4 ह्यहस्य C, J, K; ह्यथह G1, G2. 5 B repeats it. 6 नित्योऽस्तु C, G1, G2, J. 7 ०वि० B, G1, G2, J, K. 8 ०ष्टोम्यौ C, G1, G2, J, K. 9 स्व० C. 10 ०न्त्रयैतः G1, G2, J. 11 ०ममहर्हरति C; ०ममर्हति G1, G2, J. 12 Wanting in B. 13 स्थानं तत्सा० C; स्थाने तं सा० G1, G2, 14 ०यिष्यन्ना० B. 15 ०सेऽयं भू० B; ०सेवं भू० G1, G2, J, K. 16 C adds भवन्ति. 17 नव्याहन्नाकृतानि । B; वाहंता नु भवन्ति G1, G2, J, K. 18 मत G1; तत G2.

'अग्न आयूꣳषि पवसे' इति SV. 2. 814, 868; RV. 9. 66. 19; PB. 6. 10. 1; 9. 8. 12.
प्रथमेऽहनि करोति ।
कस्य हेतोरिति ।
5 शुशुत्सद्यज्ञोऽयं भवति ।[1]
सैषाग्नेयी पविताभिव्याहारा शुद्ध्यर्थेऽभिरूपा ।
[अथापि[2] शश्वदिहाग्निष्टुतं तैत्तिरीया अधीयते ।
सैषाग्निष्टुदनुग्रहाय स्यात् ।
स्वादिष्ठामार्भवीयाम्, एषा स्वादुमती पविताभिव्याहारा[3] शुद्ध्यर्थेऽभि-
10 रूपा ।]
अथाप्यैकाहिकी भवति ।
अथ खल्वत्र पौष्कलं भवति ।
शुद्धस्यैतद्[4] भवति यत् पुष्कलमिति ।
अथाप्यैकाहिकमेकाहसमासꣳ शश्वदिह तैत्तिरीया[5] अधीयते ।
15 नाना मध्ये[6] निधनानि न दाशरात्रिकाणि ।
मध्ये[7] निधनान्यनु भवन्ति ।
अतश्छन्दस्यान्[8]युप[9]प्रयुङ्क्ते ।
'आ सोम स्वानो अद्रिभिः' इति SV. 1. 513; 2. 1039; RV. 9. 107. 10.
20 तृतीयस्य बृहती सप्तदश साध्यासां करिष्यन् भवति ।
अत एतां करोति ।
एषां[10] सामन्या[11] तृचप्रथमा तृतीयस्थानेति[12] ।
'बभ्रवे नु स्वतवसे' इति । SV. 2. 794; RV. 9. 11. 4.
षडृचꣳ षष्ठसप्तमयोर्विहरति ।
25 सन्तानार्था नवर्चम् ।
एतस्य प्रथमेऽहनि तृचं कृतम्]
'उपास्मै गायता नरः' इति । SV. 2. 1. 113; RV. 9. 11. 1; PB. 6. 9. 1; 16. 11. 2.

---

1 शिशुः सद्योज्ञोऽयं C; शिशुत्सद्योज्ञायं G1, G2, J; शिशुत्स० K. 2 B omits अथापि ··· भिरूपा (line 10). 3 पठिता० C. 4 शुद्धय० C, G1, G2, J, K. 5 ०रीयका B. 6 मध्ये-C. 7 मध्ये-C. 8 अछन्द० G1, G2; अंतछन्द० J; अतछन्द० K. 9 पप्रयुङ्क्ते ··· कृतम् (line 26) is wanting in B. 10 एषां G1, G2, J, K. 11 ०मान्या G1, G2, J, K. 12 ये स्था० G1, G2, J, K.

व्रत्यं[1] सप्तमस्य समूढाज्यम् ।
एतत् स्थानं[2]सम्मितम् ।
छन्दस्ये उत्तरयोः ।
एते रूपसम्पन्ने इत्येते रूपसम्पन्ने इति ॥ ३ ॥

5

पञ्चमः[3] पटलः

अथैष कुसुरुबिन्दः ।
तत्र खलु बृहद्रथन्तरे[4] करोति ।
राथन्तरबार्हतौ[5] ह्येते स्तोमा इति ।
कानि तन्त्राणीति ।
10 दशरात्रस्तोमविकृत इत्येके ।
द्वैपृष्ठ्याद्[6] द्वे तन्त्रे स्यातामित्याचार्याः ।
प्रथमद्वितीययोरिति शौचिवृक्षिः ।
एते[7] आहीनिक इति ।
तद्विदं प्रथमतन्त्रं प्रवतीभिः क्लृप्तमपरूपम् ।
15 अन्यत्रोपक्रमाद् व्यत्यसिष्यंस्तु भवति ।
तस्य स्थाने ज्योतिष्टोमं[10] करोति—प्रथमस्य प्रथमं राथन्तरस्य राथन्तरमिति ।
एकाहिके[11] इति धानञ्जय्यः ।
एवमपर्व[12]विलोप इति ।
20 तद्विदं[13] गोस्तन्त्रमन्तविधाभिः[14] क्लृप्तमपरूपम् ।
अन्यत्रान्ताद्व्यत्यसिष्यं[15]स्तु भवति ।
तस्य[16] स्थाने द्वितीयतन्त्रं करोति—
द्वितीयस्य द्वितीयं बार्हतस्य बार्हतमिति ।
स खलु दशमेऽहनि द्वितीयतन्त्रमुद्धृत्य तस्य स्थाने ज्योतिष्टोमं[17] करोति,
25 एकाहतन्त्राद्रात्रिमुपजिगमिषन् ।
उक्तो[18] द्रव्यागमः ।
समेषु स्तोमेषूभयोस्तन्त्रयोः पुनानां बृहतीं करोति ।
उभयोर्ह्येषां[19] [20]नित्येति ।

---

1 व्रतं G1, G2, J, K. 2 ०नं स० G2, G2, J, K. 3 In B only. 4 C adds ते. 5 ०तानि० B. 6 ०ष्ट्या B, K; ०ष्ठ्ये G1. 7 अते C. 8 G1 omits प्रवतीभिः ... गोस्तन्त्रं (line 20). 9 ०नुरू० K. 10 ज्यौ० C, G2, J, K. 11 एको हि B. 12 एवं प० B. 13 तन्विदं C. 14 ०विदधाभिः G1, G2. 15 ०शिष्यं C. 16 तत् B. 17 ०मा G1, G2, J. 18 उक्तौ G1, G2, J. 19 ०षां B, G1, G2, J; ०तां K. 20 इति B.

उष्णिक्ककुभौ वा ।
1 ०ढमकुभो वि० B. 2 आख्या० B. 3 Wanting in G1, G2, J, K. 4 कल्पसप्रा० C, J, K; कल्पसप्र० G1, G2. 5 ०णीति C, G1, G2, J, K 6 ०र्वं B. 7 ०त्मा० G1, G2, J. 8 ०स्येयामु० B, K; ०स्येवामु० G1, G2. 9 तत्र B. 10 निध० B. 11 म० B. 12 अ० B, G1, G2, J, K. 13 ०र्वं० B, G1, G2, J, K. 14 ०यनि० G1, G2, J, K. 15 Wanting in B. 16 दशकाः B. 17 सर्वा B. 18 ०वंभतमेत्या० G1, G2; ०वन्तमेत्या J. 19 ०मत्यासिक्थन् B. 20 तथा० G1, G2, J. 21 B ends here abruptly after द्वा. 22 प्रजाति० C, J. 23 ०गो C. 24 निधाति J. 25 तत्रैते G1, G2, J, K. 26 प्रजाति० C, G1, G2, J. 27 K adds हि भवति. 28 यथै० C. 29 परमं J.

अपि वा प्रजापतीष्सामेवोपकृतꣳ स्यात् ।
तत्र खलु त्रिवृतं करोति, रथान्तरं[1] च लघुश्चाग्रस्तोमश्चाग्र्यं प्रजापतिरिति ।
ज्योतिष्टोमं तन्त्रम् ।
आग्निष्टोमीꣳ सꣳस्थाꣳ रथन्तरपृष्ठम् ।
5 तत्र खलु बृहस्पतिसवं[2] करोति ।
एषोऽग्निष्टोमस्त्रिवृतस्तोमो रथन्तरपृष्ठो ज्योतिष्टोमतन्त्रो भवतीति न्याय-
क्लृप्तमुत्तरं न्यायक्लृप्तमुत्तरम् ॥ १३ ॥

इति निदानसूत्रे दशमः प्रपाठकः

निदानसूत्रं समाप्तम्

---

1 यथा० C; रथ० is suggested. 2 ०सर्वं G1, G2, J, K.

निदानसूत्रवृत्तिः

तत्त्वसुबोधिनी

निदानसूत्रवृत्तिः

विघ्नेशं भारतीमीशमाचार्यञ्च पतञ्जलिम् ।
नत्वा निदानसूत्रस्य वृत्तिं कुर्वे यथामति ॥१॥
क्व सूत्रमतिगम्भीरं क्वैतद्वृत्त्या नु साहसम् ।
तातप्रसादः कुरुते वृत्तिं तत्त्वसुबोधिनीम् ॥२॥

अथातश्छन्दसां विचयं व्याख्यास्याम इति ।

अथशब्द आनन्तर्यार्थे । अतःशब्दो हेतोर्वृत्तत्वे । तत्र प्रतिपत्तॄणामेतत्सूत्रप्रवृत्ति-नियमेन यदनन्तरं तदनन्तरम् । सूत्रार्थश्च ऋक्साममन्त्रब्राह्मणार्थरूप इति, तेषामध्ययनानन्तरं सूत्रार्थप्रतिपत्तिहेतोरध्ययनस्य वृत्तत्वात्, तेष्वनुष्ठानायार्थविशेषं जिज्ञासमानानाम्, विचयं विचीयते निर्णीयतेऽनेनेति व्युत्पत्त्या ज्ञानसाधनीभूतं सूत्रं व्याख्यास्यामः स्पष्टं करिष्याम इत्यर्थः ।

त्रयश्छन्दःपादा भवन्तीति ।

छन्दसां पादास्त्रयस्त्रिविधा भवन्ति, विधानमन्तरेणापरिमितानां पादानां त्रित्वानुपपत्तेरिति ध्येयम्; के ते त्रय इत्यत आह—

अष्टाक्षर एकादशाक्षरो द्वादशाक्षर इति ।

स्पष्टम् । अक्षरसंज्ञा ह्यचामेव, व्यञ्जनं त्वक्षराङ्गम्, न तान्यक्षराणि, "व्यञ्जनमपराङ्गं विरामे लुप्यते" इति फुल्लसूत्रे (Ph. p. 117. 5.) व्यञ्जनानामङ्गत्वव्यपदेशात् । उक्तं च शौनकेन—

"सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम् ॥" इति । RPr. 18. 32.

अनुमतश्चायमर्थ आचार्यस्य—"अच एवाक्षरम्" इति ।

यत्र ह्रस्वमक्षरमुपोत्तमं पादस्य भवति सा जागती वृत्तिः । यत्र दीर्घं सा त्रैष्टुभीति । ह्रस्वदीर्घाभ्यामक्षरस्य विशेषणादचामेव ह्रस्वदीर्घत्वादयः, तथा च पाणिनिः—

"ऊकालोऽज्झ्रस्वदीर्घप्लुतः" (Pan. 1. 2. 27.) इति ।

ननु चतुर्थोऽपि छन्दःपादोऽस्ति दशाक्षरः, तत्कथमुक्तं त्रयश्छन्दःपादा भवन्तीति । अत आह—

तन्मिश्रं दशाक्षर इति ।

तन्मिश्रम्, छान्दसं नपुंसकम्; तन्मिश्रः तेष्वन्तर्भूतो दशाक्षरः पाद इत्यर्थः । तत्रैकादशाक्षरपादे दशाक्षरपादोऽन्तर्भवति, वृत्तिसारूप्यात् सङ्ख्यासामीप्याच्च । अतएव त्रिष्वेवान्तर्भावात् पृथक् प्रतिक्रामाभिक्रामौ नोक्तौ । ननु दशाक्षरपाद इहैवान्तर्भूतः, तथाप्यन्ये सन्ति पञ्चाक्षरप्रभृतय इति । अत आह—

अष्टाक्षर आपञ्चाक्षरतायाः प्रतिक्रामेत्यादि ।

"अर्चामि सत्यसवम्" SV. 1. 464.

इत्यन्तम् । तथा च पञ्चाक्षरपादादयोऽष्टादशाक्षरपादान्तास्त्रिष्वेवान्तर्भवन्तीति न प्रकारान्तरप्रसक्तिरिति भावः । अक्षरार्थस्तु, अष्टाक्षर आपञ्चाक्षरतायाः प्रतिक्रामति ।

"विश्वेषाꣳ हितः" इति । SV. 1.2; 2.824; RV. 6. 16. 1.

पञ्चाक्षराणि यस्य स पञ्चाक्षरः, तस्य भावः पञ्चाक्षरता, आपञ्चाक्षरतायाः पञ्चाक्षरतापर्यन्तमष्टाक्षरः पादः प्रतिक्रामति न्यूनो भवति । अत्रोदाहरणम्—

"विश्वेषाꣳ हितः" इति । ibid.

अयं

"त्वमग्ने यज्ञानाम्" इति ibid.

गायत्र्या द्वितीयः पादः । नन्वत्र शौनकेन—

"उत्तरोत्तरिणः पादाः षट्सप्ताष्टाविति त्रयः ।
गायत्री वर्धमानैषा "त्वमग्ने यज्ञानामिति ॥" RPr. 16. 24.

पादकल्पनेन द्वितीयपादस्य सप्ताक्षरत्वावगमात् कथमस्य पञ्चाक्षरत्वनिर्णयः ? उच्यते, "होता" इति पादस्य पूर्वत्रान्वयमुपगम्य द्वितीयः पादः पञ्चाक्षर इत्याह । आचार्यशौनक(स्तु) "होता" इत्यस्य 'विश्वेषाम्' इत्यत्रान्वयमभ्युपेत्य सप्ताक्षर इत्यवोचत् । अर्थवशेन पादस्य व्यवस्थेति न्यायविदः । अत्र मतभेदेन व्यवस्थितोऽस्य विकल्प इति न विरोधः । षडक्षरसप्ताक्षरयोस्तूदाहरणम्—

"मित्रमिव प्रियम्" SV. 1. 5; 2. 594; RV. 8. 84. 1.
"परमाच्चित्सधस्थात्" इति । RV. 8. 11. 7.

आचतुरक्षरताया इत्येक इति ।

एके आचार्याः । अष्टाक्षरपादश्चतुरक्षरतायाः पर्यन्तं प्रतिक्रामति । उदाहरणम्—

"न तमंहो न दुरितम्" SV. 1. 426.

इति पङ्क्तौ, अतिद्विष इति पञ्चमः पादः । न चैषोपरिष्टाद्बृहतीति वाच्यम् ।

तथा सति

"अभि त्वा शूर नोनुमः" SV. 1. 233.

इत्यादौ बृहत्यामिव समाम्नानं स्यात् । नच तथाम्नायते, पङ्क्तिसन्निधावाम्नायते, तस्मात्प्रायः पाठाभावात्पङ्क्तिरेवेति गृह्णीम इति ।

आदशाक्षरताया अभिक्रामति ।

"वयं तदस्य संभृतं वसु" इति । RV. 8. 40. 6.

अष्टाक्षरपादो दशाक्षरपर्यन्तमभिक्रामति वर्धते । तत्रोदाहरणम्—

"वयं तदस्य" इति । ibid.

अयम्

"अपि वृश्च पुराणवत्" इति ibid.

षट्पदाजगत्याश्चतुर्थः पादः । अस्यास्त्वष्टाक्षरपदेति लक्ष्यमिति । नवाक्षरस्य

"न देवो वृतः शूर इन्द्रः" इति । SV. 1. 196.

एकादशाक्षर आनवाक्षरतायाः प्रतिक्रामतीति ।

गतम् । अत्रोदाहरणमाह—

"यदि वा दधे यदि वा न" इति । RV. 10. 129. 7.

"इयं विसृष्टिर्यत आबभूव" इति ibid.

त्रिष्टुभो द्वितीयः पाद इति । दशाक्षरस्य

"पृथिव्यामतिषितं यदूधः" इति । RV. 10. 73. 9.

अ[आ]ष्टाक्षरताया इत्येक इति ।

एकादशाक्षरः पादोऽष्टाक्षरतायाः प्रतिक्रामति । उदाहरणम्—

"हव्या जुषस्व मेधिर" इति । RV. 3. 21. 4.

आपञ्चदशाक्षरताया अभिक्रामतीति ।

एकादशाक्षरपाद इत्यनुषङ्गः । अत्रोदाहरणम्—

"सत्रा दधानमप्रतिष्कुतं श्रवांसि भूरि" इति । SV. 1. 460; RV. 8. 97. 13.

"तमिन्द्रं जोहवीमि" इति ibid.

अस्या द्वितीयः पादः । नन्वियमृक् त्रिष्टुब् भवत्वेकादशाक्षरपादचतुष्टयत्वादिति चेन्न, आचार्यस्य मतेऽष्टाक्षरादिपादत्रयापेक्षयाऽधिकस्य छन्दःपादस्याभावादभिक्रान्तैरेतैरेव पादैश्छन्दोभवस्य वक्तव्यतया

"तमिन्द्रं जोहवीमि" इति ibid.

अस्या(?)तिजगत्यपरपर्यायविधृतिष्वस्य वक्तव्यत्वात् । तथा च भरतस्वामी—

"प्र वो महे मतयः" इति SV. 1. 462; RV. 5. 87. 1.

जगती ।

"तमिन्द्रम्" इति । SV. 1. 460; RV. 8. 57. 13.

तादृशीति ।

"वि सेनाभिर्भयमानो वि राधसा" इति SV. 1. 334; RV. 10. 23. 1.

द्वादशाक्षरस्योदाहरणम् ।

"राये नो विश्वा सुपथा कृणोतु वज्री" इति SV. 1. 460.

त्रयोदशाक्षरस्य ।

"न काममव्रतो हिनोति न स्पृशद्रयिम्" इति SV. 1. 441.

विषमपादायां चतुर्दशाक्षरस्य ।

द्वादशाक्षर आनवाक्षरतायाः प्रतिक्रामतीति ।

स्पष्टम् । उदाहरति—

"अनूपे गोमान्गोभिरक्षाः" इति । SV. 2. 348; RV. 9. 107. 9.

"सोम उ ष्वाणः" SV. 2. 347.

प्रगाथे द्वितीय ऋचः प्रथमः पादः । दशैकादशयोरुदाहरणम्—

"त्वं सु मेषं महया स्वर्विदम्" इति । SV. 1. 377; RV. 1. 52. 1.

"चर्षणीधृतं मघवानमुक्थ्य३म्" इति । SV. 1. 374. RV. 3. 51. 1.

अ[आ]ष्टाक्षरताया इत्येक इति ।

द्वादशाक्षरपादोऽष्टाक्षरतायाः प्रतिक्रामति । उदाहरणम्—

"अग्निनेन्द्रेण वरुणेन विष्णुनादित्यै रुद्रैर्वसुभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥" RV. 8. 35. 1.

इति । अत्र चतुर्थः पादः ।

आषोडशाक्षरताया अभिक्रामति ।

द्वादशाक्षरपाद इति शेषः । उदाहरति—

विकर्षेण

"त्वं वृत्राणि हꣳस्यप्रतीन्येक इत्पुरु" इति । SV. I. 248; 2. 761; RV. 8. 90. 5.

नन्वेतत्पादस्य त्रयोदशाक्षरत्वात्कथमुदाहरणमत आह—विकर्षेणेति । यकारवकार-संयोगविभागौ, तेन सह पठितत्वादिदं दर्शयति "त्वं वृत्राणि" (ibid.) इत्यादि । एतेन

"द्वैधं कुर्यादसम्पूर्णे" इति (Nid. p.12.15)

वक्ष्यमाणसूत्रेण पादपूरणाय विकर्षः क्रियते । तत्रापि यकारात् पूर्वमिकारश्च प्रश्लेष्टव्य इति गम्यते । दशाक्षराद्युदाहरणम्—

"अभि वो वीरमन्धसो मदेषु गाय" इति । SV. 1. 265; RV. 8. 46. 14.

"सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे" इति । SV. 1. 370; 2. 280; RV. 8. 97. 10.

"साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः" इति । SV. 2. 837; RV. 2. 22. 3.

द्वादशाक्षरपादोऽष्टाक्षरपर्यन्तं प्रतिक्रामतीत्येक इत्यन्ते उदाहरति—

"अर्चामि सत्यसवꣳरत्नधामभि प्रियं मतिं कविम्" इति । SV. 1. 464; ÇB. 3. 3. 2. 12.

अयमेव पादः सामशाखायां "कविम्" इति पाठाभावात् षोडशाक्षरः । सकारयुक्ता··· "सत्यसवम्" इति पदरहिताद् यजुःशाखापाठात्सप्तदशाक्षर इति बोध्यम् ।

अथातो वृत्तिप्रदेश इति ।

अथात इति वाक्योपक्रमे । वृत्तिप्रदेशो वृत्तेरुपदेशः । वृत्तिर्नाम छन्दोविज्ञानहेतुः पादानामुपोत्तमाक्षरस्य लाघवं गौरवं चास्ति, तेन लघ्वक्षरेण छन्दोविशेषज्ञापनाय वृत्तिरिति संज्ञा क्रियत इत्यर्थः ।

यत्र ह्रस्वमक्षरमुपोत्तमं पादस्य भवति सा जागती वृत्तिरिति ।

यत्र ऋचि पादस्योपोत्तममक्षरं ह्रस्वं भवति, सेति वृत्तिविशेषणत्वकृतं स्त्रीत्वम्, जागती जगत्या विज्ञापिका वृत्तिः । यथा—

"विश्वाः पृतना अभिभूतरं नरः" इति । SV. 1. 370.

यत्र दीर्घं सा त्रैष्टुभीति ।

यत्र पादस्योपोत्तममक्षरं दीर्घमनेकमात्रम्, सेत्युक्तार्थम्, त्रैष्टुभी विज्ञापिका वृत्तिरित्यर्थः ।

यथा—

"प्र तु द्रव" इति। SV. 1. 523; 2. 27; RV. 9. 87. 1; PB. 11. 3. 1.

ननु,

"आ जुहोता हविषा मर्जयध्वम्" इति SV. 1. 63.

एकादशाक्षरपादे जागती वृत्तिः स्यादिति। अत आह—

ह्रस्वाक्षरस्योपरिष्टाद् व्यञ्जनसन्निपातेऽपि गौरवमिति।

उपरिष्टाद् व्यञ्जनानां सन्निपाते हलां संयोगः, तत्पूर्वाक्षरस्य ह्रस्वस्यापि गौरवं गुरुत्वम्। तथा पाणिनिः—

"ह्रस्वं लघु" (Pāṇ. 1. 4. 10), "संयोगे गुरु" (Pāṇ. 1. 4. 11), "दीर्घं च" (Pāṇ. 1. 4. 12) इति।

अत्रोपोत्तमस्याक्षरस्य ह्रस्वत्वेऽपि गौरवकार्यत्वात् त्रैष्टुभी वृत्तिर्भवतीति भावः। एवं छन्दोवृत्तिमुक्त्वा पादवृत्तिमाह—

अष्टाक्षरद्वादशाक्षरौ लघुवृत्ती, दशाक्षरैकादशाक्षरौ गुरुवृत्तीति।

लघु ह्रस्वं वृत्तिज्ञापकमुपोत्तममक्षरं ययोस्तौ तथोक्तौ। एवं 'गुरुवृत्ती' इत्यत्रापि बोध्यम्। अत्र दशाक्षरपादस्य पृथक् छन्दःपादत्वाभावेऽपि एकादशाक्षरपादे तुल्यवृत्तिप्रदर्शनं तनुभावेन तदन्तर्भावप्रदर्शनार्थम्।

"अग्न आ याहि वीतये" SV. 1. 1; 2. 10; RV. 6. 16. 10.

"अभि प्रियाणि पवते चनोहितः" SV. 1. 554; 2. 50; RV. 9. 75. 1.

"प्र तु द्रव परि कोशं नि षीद" SV. 1. 523; 2. 27. RV. 9. 87. 1.

"पिबा सोममिन्द्र मन्दतु त्वा" इति SV. 1. 398; 2. 277; RV. 7. 22. 1; PB. 12. 10. 1.

अष्टाक्षरादीनां पादानामुदाहरणानि। ननु छन्दांसि व्याख्यास्याम इति प्रतिज्ञाय पादानां लक्षणकथनं [कथं] युक्तमित्यत आह—

एतैः खलु छन्दांꣳसि वर्तन्त इति।

एतैरुक्तलक्षणैः पादैर्यथायथं छन्दांसि वक्ष्यमाणानि प्रवर्तन्ते। अतः पादलक्षणकथनं नासङ्गतमिति भावः। यद्यप्यतिच्छन्दस्सु त्रयोदशाक्षरादयः पादाः सन्ति, तथाप्येतेषामेव पादानामतिक्रमेणाक्षरसम्पत्त्यानुगुण्येन विधृत्यादीन्यतिच्छन्दांसि भवन्तीति ध्येयम्। पादानां लक्षणं परिसमाप्य प्रकृतं प्रतिजानीते—

पथ्यान्येवाग्रे सप्त चतुरुत्तराणि छन्दांꣳसि व्याख्यास्याम इति।

पन्थानं प्रातर्माध्यन्दिनतृतीयसवनरूपं यज्ञमार्गं सवक्तुमर्हतीति पथ्यान्येव

सप्तगायत्र्यादिजगत्यन्तानि, चतुरुत्तराण्युत्तरोत्तरं च सङ्ख्यायातिरिक्तानि छन्दांसि, अग्रे विधृत्यादिभ्यः पूर्वम्, व्याख्यास्याम इति । यद्यपि चतुरुत्तराणि पङ्क्त्यादीनि तथापि तानि पथ्यान्येवेति प्रसङ्गादुक्तानीति न दोषः ।

इति निदानवृत्तौ प्रथमः खण्डः

चतुर्विंशत्यक्षरा गायत्री, त्रिपदाऽष्टाक्षरपादा इति ।

चतुर्विंशत्यक्षरा गायत्री भवतीति । तस्या इदं लक्षणम्—त्रिपदाऽष्टाक्षरपादेति । उदाहरणम्—

"अग्न आ याहि वीतये" इति । SV. 1. 1; 2. 10; RV. 6. 16. 10.

अथापि चतुष्पदा भवति, षडक्षरपादेति ।

अथाप्यन्येनापि प्रकारेण भवति । गायत्रीप्रकारान्तरमेव दर्शयति—चतुष्पदा भवति, षडक्षरपादेति । तदुदाहृत्य दर्शयति—

तत्रापि पाञ्चाला उदाहरन्ति—

"पेटिलालकन्ते पेटाविटकन्ते ।

तत्र किकुबद्धस्तज्जग्धृ परेहि" इति ।

तत्रापि प्रकारान्तरं पाञ्चालाः शाखाविशेषाध्येतारः पेटिलालक इत्युदाहरन्ति । शौनकस्तु

"इन्द्रः शचीपतिर्बलेन वीळितः ।

दुश्च्यवनो वृषा समत्सु सासहिः ॥" R Pr. 16. 17.

इत्युदाजहारेति । ननु त्रिपदाऽष्टाक्षरपादेत्येतावता तल्लक्षणसिद्धिः ।

अष्टाविंशत्यक्षरोष्णिक् त्रिपदैव, पूर्वावष्टाक्षरावुत्तमो द्वादशाक्षर इति ।

अष्टाविंशत्यक्षरोष्णिग् भवति । तस्या लक्षणम्—पूर्वावष्टाक्षरपादौ, उत्तमो द्वादशाक्षर इति । उदाहरणम्—

"अग्ने वाजस्य गोमतः" इति । SV. 1. 99; 2. 911; RV. 1. 79. 4.

अथ यत्र मध्ये द्वादशाक्षरा सा ककुबिति ।

यत्र ऋचां मध्ये द्वादशाक्षरपादो भवति, अभितोऽष्टाक्षरौ, सा ककुप् । यथा—

"पवस्व मधुमत्तमः" इति । SV. 1. 578; 2. 42; RV. 9. 108. 1; PB. 11. 10. 3.

यत्र प्रथमः सा पुरउष्णिगिति ।

यत्र ऋचि द्वादशाक्षरपादः प्रथमः, उत्तरावष्टाक्षरौ, सा पुरउष्णिग् भवति। उदाहरणम्—

"आविर्मर्या आ वाजं वाजिनो अग्मन्" इति। SV. 1. 435.

अथापि चत्वारः सप्ताक्षरा इत्युदाहरन्ति—

"नदं व ओदतीनाम्" इति। SV. 2. 862; RV. 8. 69. 2.

अथाप्यन्यापि भवत्युष्णिक्। तस्या लक्षणम्—चत्वारः सप्ताक्षराः पादा इति शेषः। स्पष्टमन्यत्।

द्वात्रिंशदक्षराऽनुष्टुप्, चतुष्पदाऽष्टाक्षरपादेति।

अष्टाक्षरपादचतुष्टयवत्यनुष्टुब् भवति। यथा—

"गायन्ति त्वा गायत्रिणः" इत्यादिः। SV. 1. 342; 2. 694; RV. 1. 10. 1.

अथापि त्रिपदा भवति।

अन्यापि त्रिपदा भवति। कथमित्यत आह—

मध्येऽष्टाक्षरोऽभितो द्वादशाक्षराविति।

यथा—

"पर्यू षु प्र धन्व वाजसातये" SV. 1. 428; 2. 714; RV. 9. 110. 1.
"अनु हि त्वा सुतं सोम मदामसि" इति। SV. 1. 432; 2. 716; RV. 9. 110. 2.

तां पिपीलिकामध्येत्याचक्षत इति।

तामष्टाक्षरपादमध्यामनुष्टुभं पिपीलिकामध्येत्याचक्षते ब्रह्मवादिनः, तथा च ब्राह्मणम्—"पिपीलिकामध्यासु स्तुवन्ति" इति। PB. 15. 11. 8.

देवताध्याये च पिपीलिकामध्येत्यौपमिकमिति। पिपीलिकाया मध्यमिव मध्यं यस्या इत्युपमा, तथाऽऽचक्षत इति तदर्थः।

मध्येज्योतिरिति बह्वृचा इति।

तां पिपीलिकामध्यां बह्वृचा मध्येज्योतिरित्याचक्षते। तेषामाख्याप्रकारमेव दर्शयति—

एष पादो यतो यतः परिक्रामेत्

तिष्ठेत्, तत्र सर्वत्रापि तं पादं ज्योतिषमित्याचक्षते। ननु मध्येज्योतिषमेवैनां कथं ब्रुवते—इत्यतो नामान्यतिदिशति।

पुरस्ताज्ज्योतिर्मध्येज्योतिरुपरिष्टाज्ज्योतिरिति।

मध्येज्योतिषः पुनरनुक्रमेण पुरस्ताज्ज्योतिरुपरिष्टाज्ज्योतिषोऽनुष्टुबार्धमुदाहरणम्। पुरस्ताज्ज्योतिषो मृग्यम्, उपरिष्टाज्ज्योतिषस्तु—

"मा कस्मै धातमभ्यमित्रिणे नो मा कुत्रा नो गृहेभ्यो धेनवो गुः।
स्तनाभुजो अशिश्वीः॥" इति। RV. 1. 120. 8.

षट्त्रिंशदक्षरा बृहती चतुष्पदैवेति।

अनुष्टुबपेक्षया पादाधिक्यव्यवच्छेदार्थमेवकारः। अत्र प्रथमः पादो द्वादशाक्षरो भवति। इतरे त्रयोऽष्टाक्षराः। एवं सति बृहतीत्युच्यते। तथा च पिङ्गलनागः—

"बृहती जागतस्त्रयश्च गायत्राः" P. 3. 26.

"पथ्या पूर्वश्चेत्तृतीयः।" इति। P. 3. 27.

उदाहरणम्—

"अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः।
त्वं तस्यामित्रहन्वधर्दासस्य दम्भय॥" इति। RV. 10. 22. 8.

इयमेव पुरस्ताद्बृहतीति वक्ष्यते। पथ्याबृहत्याः पादस्थितिमाह—

त्रयोऽष्टाक्षरा उपोत्तमो द्वादशाक्षरस्तां पथ्येत्याचक्षत इति।

अपि च स्कन्धोग्रीवीति।

यदि द्वादशाक्षरः पाद उपोत्तमो भवति प्रथमद्वितीयचतुर्थास्त्रयोऽष्टाक्षरास्तां पथ्यां बृहतीं स्कन्धोग्रीवीत्याचक्षत इति। बृहतीषु इयमेव पथ्या न्याय्या भवति, न पूर्वोक्तेति भावः। यथा—

"यज्ञायज्ञा वो अग्नये" इति। SV. 1. 35; 2. 53; RV. 6. 48. 1.

अथ यत्र प्रथमो द्वादशाक्षरः सा पुरस्ताद्बृहतीति।

स्पष्टम्। उदाहरणं पूर्वोक्तम्।

यत्र द्वितीयः सोरोबृहती, सैव न्यङ्कुसारिणीति।

यत्र ऋचि द्वादशाक्षरपादो द्वितीयो भवति सोरोबृहती, स्कन्धोग्रीवीति चोच्यते, न्यङ्कुसारिणीति चोच्यते। उदाहरणम्—

"मत्स्यपायि ते महः" इति। SV. 2. 782; RV. 1. 175. 1.

यत्रोत्तमः सोपरिष्टाद्बृहतीति।

स्पष्टम्। यथा—

"विश्वाः पृतनाः" इति SV. 1. 370; 2. 280; RV. 8. 97. 10; PB. 12. 10. 2.

तृचे

"नेमिं नमन्ति चक्षसा" इति SV. 2. 281; RV. 8. 97. 12.

उभे ऋचौ ।

अथापि चत्वारो नवाक्षरा इत्युदाहरन्ति ।

"उपेदमुपपर्चनम्" इति । RV. 6. 28. 8.

अन्यापि बृहती भवति । कथं चत्वारो नवाक्षराः पादा इति—

"उपेदमुपपर्चनमासु गोषूप पृच्यताम् ।" इति ibid.

LC. 3. 3. 4.

सूत्रपठितानि तत्राक्षराणि विकर्षेण गणनीयानि ।

अथापि त्रिपदा भवति, द्वादशाक्षरपादा ।

"प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यम्" इति । SV. 2. 844;

RV. 9. 110. 8.

ताꣳसतोबृहतीत्याचक्षत इति ।

स्पष्टम् । तथा च ब्राह्मणम्—

" 'प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यम्' इति

सतोबृहत्यो भवन्ति" इति । PB. 16. 11. 8.

बार्हतमपि तृचꣳ सतोबृहत्य इत्येवाचक्षते । यथा—

"वयं घ त्वा सुतावन्तः" इति । SV. 1. 261; 2. 214; RV. 8. 33. 1; PB. 12. 4. 3; 14. 4. 1.

बार्हतं बृहतः सम्बन्धि तृचमेकस्तोत्रसाधनीभूतम् ऋक्त्रयमपि सतोबृहत्य इत्येवाचक्षत इति । यथा—

"वयं घ त्वा सुतावन्तः" इति । ibid.

तथा च ब्राह्मणम्—

" 'वयं घ त्वा सुतावन्तः' इति

सतोबृहत्यो वर्षीयच्छन्द आक्रमते" इति । PB. 12. 4. 3; 14. 4. 1.

"आ त्वा सहस्रमा शतम्" SV. 1. 245; 2. 741; RV. 8. 1. 24.

"क ईं वेद सुते सचा" इति SV. 1. 297; 2. 1046; RV. 8. 33. 7; PB. 14. 10. 1.

चोदाहरणम् ।

इति निदानवृत्तौ द्वितीयः खण्डः

चत्वारिंशदक्षरा पङ्क्तिः, पञ्चपदाऽष्टाक्षरपादेति ।

स्पष्टम् । यथा—

"स्वादोरित्था विषूवतः" इति । SV. 1. 409; 2. 355; RV. 1. 84. 10; PB. 13. 4. 16.

अथापि चतुष्पदा भवति, द्वादशाक्षरोऽष्टाक्षर इति व्यत्यास इति ।

चतुष्पदापि पङ्क्तिर्भवति, तस्या द्वौ पादौ द्वादशाक्षरौ द्वावष्टाक्षरौ, तेषां चतुर्णामपि द्वादशाक्षरोऽष्टाक्षर इति व्यत्यासः कार्यः ।

तां सिद्धाविष्टारपङ्क्तिरित्याचक्षत इति ।

एवं व्यत्यस्तपादां सिद्धाविष्टारपङ्क्तिरित्याचक्षत इति । यथा—

"न त्वावाँ अन्यो दिव्यो न पार्थिवः" इति । SV. 2. 31; RV. 7. 32. 23.

विपर्यासे विपरीता स्यात् सैवेति ।

उक्तपादव्यत्यासे विपर्यासे सति अष्टाक्षरो द्वादशाक्षर इति सैव विष्टारपङ्क्तिर्विपरीता सिद्धाविष्टारपङ्क्तिर्भवति । यथा—

"य ऋष्वः श्रावयत्सखा विश्वेत्स वेद जनिमा पुरुष्टुतः ।
तं विश्वे मानुषा युगेन्द्रं हवन्ते तविषं यतस्रुचः ॥" इति ।
RV. 8. 46. 12.

आस्तारपङ्क्तिलक्षणम्—

अथ यत्र पूर्वावष्टाक्षरावुत्तरौ द्वादशाक्षरौ साऽऽस्तारपङ्क्तिरिति ।

यत्र ऋचि पूर्वौ प्रथमद्वितीयौ पादावष्टाक्षरौ, उत्तरौ तृतीयचतुर्थौ पादौ द्वादशाक्षरौ, साऽऽस्तारपङ्क्तिरिति । उदाहरणम्—

"अग्निं न स्ववृक्तिभिः" इति । SV. 1. 420; RV. 10. 21. 1.

अत्र हेतुवादमाह—

आस्तीर्णाविवैतौ पङ्क्तिपादाविति ।

एतौ द्वादशाक्षरपादौ परतः स्तीर्णाविव । तदुक्तं पिङ्गलनागेन, द्वादशाक्षरावित्यनुवर्तमाने "आस्तारपङ्क्तिः परतः" इति P. 3. 40.

स्तीर्णाविति हेतौ, ततो हेतोरित्यर्थः । उदाहरणम्—

"अग्निं न स्ववृक्तिभिः" इति । SV. 1. 420; RV. 10. 21. 1.

अथ यत्र पूर्वौ द्वादशाक्षरावुत्तरावष्टाक्षरौ सा प्रस्तारपङ्क्तिः । प्रस्तीर्णाविवैतौ पङ्क्तिपादाविति ।

प्रस्तीर्णौ प्रथमतः स्तीर्णौ, गतमन्यत् । तदुक्तं पिङ्गलनागेन—

"प्रस्तारपङ्क्तिः पुरतः" इति । P. 3. 41.

उदाहरणम् ऋग्वेदे—

"भद्रमिद्भद्रा" इति । RV. 7. 96. 3.

अथ यत्र मध्येऽष्टाक्षरावभितो द्वादशाक्षरौ सा सꣳस्तारपङ्क्तिः, सꣳस्तीर्णाविवैतौ पङ्क्तिपादाविति ।

संस्तीर्णौ सम्यक् बहिःस्तीर्णौ विस्तृतौ । तथा च पिङ्गलनागः—

"संस्तारपङ्क्तिर्बहिः" इति । P. 3. 43.

स्पष्टम् । उदाहरणम् ऋग्वेदे—

"पितुभृतो न" इति । RV. 10. 172. 3.

अथ यत्र मध्ये द्वादशाक्षरावभितोऽष्टाक्षरौ सा विष्टारपङ्क्तिः, विष्टब्धाविवैतौ पङ्क्तिपादाविति ।

विष्टब्धौ विभातोऽन्तः स्तब्धाविव । गतमन्यत् । तदुक्तं पिङ्गलनागेन—

"विष्टारपङ्क्तिरन्तः" इति । P. 3. 42.

उदाहरणम्—

"अग्ने तव श्रवो वयः" इति । SV. 2. 1166; RV. 10. 140. 1.

अथ प्रगाथलक्षणमाह—

तद्यत्र सिद्धाविष्टारपङ्क्तिर्बृहत्या वा ककुभा वोत्तरा भवति तां प्रगाथ इत्याचक्षत इति ।

तदिति लुप्तविभक्तिकं पदम् । तत्पूर्वोक्ता सा पङ्क्तिषु मध्ये यत्र सूक्ते सिद्धाविष्टारपङ्क्तिर्बृहत्या वा ककुभा वोत्तरा भवति तां सिद्धाविष्टारपङ्क्तिं प्रगाथ इत्याचक्षते ब्रह्मवादिन इति । तदुक्तं शौनकेन—

"बार्हतो बृहतीपूर्वः ककुप्पूर्वस्तु काकुभः ।" इति । RPr. 18. 1.

सूत्रकारश्च—

"चतुश्शतमैन्द्रा बार्हताः प्रगाथा दाशतयीषु" इति । Nid. p.82.18

उदाहरणम्—

"दुहान ऊधर्दिव्यम्" SV. 2. 26; RV. 9. 107. 5.

"यस्य ते पीत्वा" इति च । SV. 2. 43; RV. 9. 108. 2.

आनुष्टुभा अपि प्रगाथा भवन्तीत्येके । अनुष्टुप् प्रथमा, गायत्र्यावुत्तर इति ।

आनुष्टुभा अपि प्रगाथा भवन्तीत्येके आचार्याः । तदिदं लक्षणम्—अनुष्टुप् प्रथमा, गायत्र्यावुत्तरे इति । तथा च ब्राह्मणम्—

"त एतमनुष्टुप्शिरसं प्रगाथमपश्यन्" इति । PB. 9. 1. 1.

शौनकश्च—"अनुष्टुब्द्वे च गायत्र्यावेष आनुष्टुभः स्मृतः ।" इति। RPr. 18. 3.

अत्रोदाहरणं स्वयमेव दर्शयति । यथा—

"पुरोजिती वो अन्धसः" SV. 1. 545; 2. 47; RV. 9. 101. 1; PB. 8. 5. 7; 14. 5. 5.

"आ त्वा रथं यथोतये" SV. 1. 354; 2. 1121; RV. 8. 68. 1.

"विशोविशो वो अतिथिम्" SV. 1. 87; 2. 914; RV. 8. 74. 1.

"पान्तमा वो अन्धसः" इति । SV. 1. 155; 2. 63. RV. 8. 92. 1; PB. 9. 1. 6.

अथाक्षरपङ्क्त्यो विंशत्यक्षराश्चतुष्पदाः पञ्चाक्षरपादा इति ।

अथ चत्वारिंशदक्षराभ्यः पङ्क्तिभ्योऽन्या अक्षरपङ्क्तयः, तासामिदं लक्ष[ण]म्—विंशत्यक्षराश्चतुष्पदाः पञ्चाक्षरपादा इति । उदाहरणम्—

"पवस्व सोम महान्त्समुद्रः" इति । SV. 1. 429; 2. 591; RV. 9. 109. 4; PB. 14. 11. 5.

द्विपदामेनामेके प्रतिजानत इति ।

एके आचार्या एनामक्षरपङ्क्तिं द्विपदां प्रतिजानते । दशाक्षरपादास्तर्हि ताः

"समं स्यादश्रुतत्वात्" इति J. N. M. 10. 3. 13. 53.

न्यायात् समविभागस्योचितत्वात् । तथा च संहिताध्ययनम्—

"पवस्व सोम महान्त्समुद्रः" इत्यादिः । ibid.

पञ्चविंशत्यक्षराऽपि भवति, पञ्चपदा पञ्चाक्षरपादेति ।

पञ्चपदाप्यक्षरपङ्क्तिर्भवति, पञ्चविंशत्यक्षरा पञ्चाक्षरपादा । तथा ब्राह्मणकल्पौ "अष्टा(?अत्रा)क्षरपङ्क्तिषु ज्यैष्ठ्यकामायोक्थानि प्रणयेयुः" इति ब्राह्मणस्य कल्पः

"अग्ने तमद्याश्वं न स्तोमैः" इति । SV. 1. 434; 2. 1127; RV. 4. 10. 1.

साकमश्वमिति ।

तां पदपङ्क्तिरित्याचक्षत इति ।

तां पञ्चपदामक्षरपङ्क्तिं पदपङ्क्तिरित्याचक्षते ब्रह्मवादिन इति । तथा च पिङ्गलनागः, पञ्चका इत्यनु[वर्त]माने—

"पदपङ्क्तिः पञ्च ।" P. 3. 46.

"चतुष्कषट्कौ त्रयश्च ।" इति । P. 3. 47.

"अग्ने तमद्याश्वम्" SV. 1. 434; 2. 1127; RV. 4. 10. 1.

इत्यादौ त्रयः पादाः, चतुष्कषट्कौ द्वौ पादाविति तदुक्तलक्षणसङ्गतिः ।

इति निदानवृत्तौ छन्दोविचितिभाष्ये तृतीयः खण्डः

चतुश्चत्वारिंशदक्षरा त्रिष्टुप्, चतुष्पदैकादशाक्षरपादेति ।

गतम् । यथा—

"प्र तु द्रव" इति । SV. 1. 523; 2. 27; RV. 9. 87. 1; PB. 11. 3. 1.

अथ यत्रोत्तमोऽष्टाक्षरस्तां ज्योतिष्मतीत्याचक्षत इति ।

यत्र त्रिष्टुभि उत्तमः पादोऽष्टाक्षरो भवति, अवशिष्टानि षट्त्रिंशदक्षराणि, सदृशो विभागाद् द्वादशाक्षरपादास्त्रय इति गम्यते, तामेवंरूपां ज्योतिष्मतीत्याचक्षते । अतएव शौनक आह—

"त्रयश्च द्वादशाक्षरा एकश्चाष्टाक्षरः क्वचित् ।
सैषा ज्योतिष्मती नाम ततो ज्योतिर्यतोऽष्टकः ॥" इति । RPr. 16. 70.

यथा—

"अग्निनेन्द्रेण" इति । RV. 8 35. 1.

पञ्चपदाऽपि भवति, चत्वारोऽष्टाक्षरा एको द्वादशाक्षर इति ।

पञ्चपदापि भवति त्रिष्टुप् । तस्याः पादानाह—चत्वार इति । अस्यास्त्रिष्टुभो महाबृहतीति संज्ञामाह शौनकः—

"चत्वारोऽष्टाक्षराः पादा एकश्च द्वादशाक्षरः ।
सा महाबृहती नाम ॥" RPr. 16. 71.

"यवमध्या तु मध्यमे ।" RPr. 16. 72.

इत्युद...नान्नव भवतीनामिति (?) ।

अष्टाचत्वारिंशदक्षरा जगती, चतुष्पदा द्वादशाक्षरपादेव ।

स्पष्टम् । उदाहरणम्—

"अभि प्रियाणि पवते" इति । RV. 9. 97. 12.

अथ यत्रोत्तमोऽष्टाक्षरस्तां ज्योतिष्मतीत्याचक्षत इति ।

अथ यत्र जगत्यामुत्तमः पादोऽष्टाक्षरो भवति तां ज्योतिष्मतीं जगतीमाहुः । तथा च पिङ्गलः—

"एकेन त्रिष्टुब्ज्योतिष्मती" इति । P. 3. 50.

एकेनाष्टाक्षरपादेन युक्तायास्त्रिष्टुभो ज्योतिष्मतीत्वमभिधाय जगत्या अप्यष्टाक्षरपादयोगे ज्योतिष्मतीत्वमुक्तम्—

"तथा जगती ।" इति । P. 3. 51.

अत्रैकस्यैवोत्तमपादस्याष्टाक्षरतयावशिष्टे चत्वारिंशत्यक्षरेषु पादक्लृप्तिरूहनीया ।

पञ्चपदाऽपि भवति, त्रयोऽष्टाक्षरा द्वौ द्वादशाक्षराविति ।

पञ्चपदाऽपि भवति जगती । तस्याः पादानाह—त्रयोऽष्टाक्षरा द्वौ द्वादशाक्षराविति । इयं महासतोबृहतीति बह्वृचाः । तथा च सर्वानुक्रमणी—

"अष्टिनस्त्रयः स्वौ च द्वौ महासतोबृहती" इति । (SAn. p. 4. 14-15.)

उदाहरणम्—

"आ यः पप्रौ भानुना" इति । RV. 6. 48. 6.

स एष समासः । आष्टपदतायाः प्रतिक्रामतीति ।

जगत्यां स एष समासः । न्यूनाक्षरविलक्षणपादाविति शेषः । आष्टपदताया अष्टपदताम-भिव्याप्य क्रमते । एवंभूतायास्तस्या नामधेयमाह—

सैषैवꣳ सती विष्टारपङ्क्तिः प्रवृद्धपदेति ।

एवं सती आष्टपदा सती जगती विष्टारपङ्क्तिः प्रवृद्धपदेति नाम ।

षट्पदाऽपि भवति, अष्टाक्षरपादा ।

"उभे यदिन्द्र रोदसी" इति । SV. 1. 379; 2. 440; RV. 10. 134. 1; PB. 13. 10. 3.

षट्पदाऽपि भवति जगती । अत्रोदाहरणम्—

"उभे यदिन्द्र रोदसी" इति । ibid.

एनां महापङ्क्तिरित्याह शौनकः—

"महापङ्क्तिः षडष्टकाः ॥" इति । RPr. 16. 75.

पथ्यान्येवाग्र इति प्रतिज्ञातमर्थमुपसंहरति—

एतानि खलु सप्त चतुरुत्तराणि छन्दाꣳसि न्याख्यातानीति ।

सर्वेषामपि न्यायत्वे पथ्यत्वे च प्राप्ते आह—

प्रथमं प्रथमं त्वेवात्र न्यायं पथ्यं विद्यात् ।

अत्र चतुर्विंशत्यक्षरा गायत्रीत्यारभ्य

"उभे यदिन्द्र रोदसी" इति SV. 1. 379; 2. 440; RV. 10. 134. 1; PB. 13. 10. 3.

एवमन्ते सूत्रे उक्तेषु छन्दस्सु मध्ये प्रथमं प्रथममेवात्र छन्दो न्याय्यं न्यायादनपेतं पथ्यं पथि सर्वत्र यज्ञमार्गे प्रयोगार्हं विद्यात् । इतरत्तु यत्र वचनमस्ति तत्रैव प्रयोज्यमिति भावः । अथ द्विपदाच्छन्दो वक्तुमुपक्षिपति ।

[एतासामेव द्विपदा भवन्तीति ।]'

एतासामेव गायत्र्यादीनामन्यतमत् ।

यत्र द्वावष्टाक्षरौ सा गायत्र्याः । यत्र द्वादशा[क्षराष्टा]क्षरौ सा विष्टारपङ्क्तेः । यत्रैकादशाक्षरौ सा त्रिष्टुभः । यत्र द्वादशाक्षरौ सा जगत्या इति ।

यत्र क्वचिद् द्वावष्टाक्षरपादौ सा गायत्र्या द्विपदा, तस्या ऋचो द्विपदागायत्रीछन्द इत्यर्थः । एवमुत्तरत्रापि व्याख्येयम् । उदाहरणानि—

"एष ब्रह्मा य ऋत्वियः" SV. 1. 438; 2. 1118.

"विश्वतोदावन्" SV. 1. 437.

"उषा अप स्वसुष्टमः" SV. 1. 451; RV. 10. 172. 4.

"ब्रह्माण इन्द्रं महयन्तः" SV. 1. 439; RV. 5. 31. 4.

"प्र मे पतियानः" इति । SMB. 1. 1. 8; GG 2. 1. 20.

विषमपदाः

"शं पदम्" SV. 1. 441.

"प्र व इन्द्राय" SV. 1. 446.

"विश्वस्य" SV. 1. 450.

"इमा नु कम्" इति । SV. 1. 452; RV. 10. 157. 1.

"शं पदम्" SV. 1. 441.

इत्यादीनां चतसृणाम् ऋचां विषमपदाच्छन्दः । विषमं पदं यस्या सा विषमपदेति योगार्थानयमभिप्रेत्य तासां क्रमेण विषमपदां दर्शयति—

नवाक्षरचतुर्दशाक्षरावेकादशाक्षरत्रयोदशाक्षरौ षोडशाक्षरदशाक्षरावेकादशाक्षराष्टाक्षराविति ।

अष्टाक्षरपादयुक्तच्छन्दसां लक्षणमुक्त्वा दशाक्षरपादयुक्तस्य छन्दसो लक्षणमाह—

दशाक्षरपादा विराज एकपदाप्रभृतयः आचतुष्पदाभ्य इति ।

दशाक्षरः पादो यासां ता दशाक्षरपादाः, विराज एकपदाप्रभृतय आचतुष्पदाभ्यः, एकपदा विराट् तथा द्विपदा त्रिपदा चतुष्पदेति चतस्रो विराज इत्यर्थः । उदाहरणानि—

३ २ ३ २ ३ १ २ ३१२
"सुमन्मा वस्वी रन्ती सूनरी ।" SV. 2. 1004.

१ २ ३ २ ३ १ २
"इन्दुः पविष्ट चारुर्मदाय" SV. 1. 431; RV. 9. 109. 13.

२ ३ १ २ ३ १ २
"पिबा सोममिन्द्र मन्दतु" SV. 1. 398; RV. 7. 22. 1.

३ १ २र
"चक्रं यदस्य" इति । SV. 1. 331; RV. 10. 73. 9.

एकादशाक्षरपादा अपि त्रिपदा विराज इत्येवाचक्षते । यथा—

३ २उ ३
"अग्निं नरः" इति । SV. 1. 72; 2. 723; RV. 7. 1. 1.

यथा—

३ २उ ३
"अग्निं नरः" इति । ibid.

दशाक्षरपादवदेकादशा[क्षरपादा] अपि त्रिपदा विराजः । तथा च ब्राह्मणं स्वयमेवोदाहरणं दर्शयति । यथा—"अग्निं नरः" इति । तथा च ब्राह्मणम्—

"विराट्सु वामदेव्यमग्निष्टोमसाम भवति" इति । PB. 15. 12. 1.

द्विरुक्तिः पटलसमाप्त्यर्था ।

इति निदानवृत्तौ प्रथमः पटलः

चतुरुत्तराणां सप्तानां छन्दसां व्याख्यानानन्तरं छन्दसां विचयं व्याख्यास्याम इति प्रतिज्ञातार्थशेषं व्याख्यातुमादावतिच्छन्दसां व्याख्यानं प्रतिजानीते—

ऊर्ध्वं जगत्या अतिच्छन्दस इति ।

जगत्या अष्टाचत्वारिंशदक्षराया ऊर्ध्वमधिकमतिच्छन्दसोऽधिकाक्षरयुक्तानि छन्दांसि, ऋगभिप्रायं स्त्रीत्वम्, व्याख्यास्याम इति शेषः ।

द्वापञ्चाशदक्षरप्रभृतय इति ।

स्पष्टम् । ताः कतिविधाः किंपर्यन्ता इत्यत आह—

चतुरुत्तरौ द्वौ सप्तवर्गौ, चतुश्शताक्षराणां पराध्येंति ।

चत्वारि चत्वार्यक्षराण्युत्तराण्यधिकानि ययोस्तौ, सप्तानां वर्गस्सप्तवर्गस्तौ, चतुर्दश इति यावत्, चतुश्शताक्षराणां छन्दसां पराध्यां पर्यन्तम् ।

तासां नामधेयानीति—

गतम् ।

विधृतिः शक्कर्यष्टिरत्यष्टिरꣳहस्सरित्सम्पेति पूर्वस्य ।

सप्तवर्गस्येति शेषः ।

सिन्धुः सलिलमम्भो गगनमर्णव आपस्समुद्र इत्युत्तरस्येति ।

सप्तवर्गस्येति शेषः । अत्रोदाहरणानि । द्विपञ्चाशदक्षरं विधृतिच्छन्दः । उदाहरणम्—

"प्र वो महे मतयः" SV. 1. 462; RV. 5. 87. 1.

षट्पञ्चाशदक्षरं शक्करीच्छन्दः—

"प्रो ष्वस्मै पुरोरथम्" SV. 2. 1151; RV. 10. 133. 1.

षष्ट्यक्षरमष्टिच्छन्दः—

"साकं जातः क्रतुना" SV. 2. 837; RV. 2. 22. 3.

चतुःषष्ट्यक्षरमत्यष्टिः—

"अया रुचा हरिण्या" SV. 1. 463; 2. 940; RV. 9. 111. 1; PB. 16. 16. 8.

अष्टषष्ट्यक्षरमंहःछन्दः—

"अग्निꣳ होतारम्" SV. 1. 465; 2. 1163; RV. 1. 127. 1.

इयं बह्वृचानामत्यष्टिच्छन्दः । यथा कात्यायनः—"अत्यष्टिः" (SAn. 1. 127.)

"अग्निꣳ होतारम्" इति । ibid.

द्विसप्तत्यक्षरं सरिच्छन्दोऽवमंहः । षट्सप्तत्यक्षरं सम्पाच्छन्दः । स हि शब्दः, सुब्रह्मण्या निगदश्चोदाहरणम् । सिन्धुः सलिलमित्युत्तमवर्गस्योदाहरणं मृग्यम् । केचिदित्थमुदाहरन्ति— इलान्दस्य स्तोत्रीया सिन्धुच्छन्दउदाहरणम् । अत्र हि "अर्द्धर्चेष्वनुगानानि" (Nid. p.) इति सूत्रेणैकैका स्तोत्रीयाऽशीत्यक्षरेषु गीयत इति । अत्र विधायकब्राह्मणे समुद्रं बाणतः छन्दःसलिलमिति समुद्रः सिन्धुपर्याय इति दृष्ट्वा चतुरशीत्यक्षरं सलिलं छन्दः । तस्योदाहरणमाह षड्गुरुशिष्यः—

"भगो अनुप्रयुङ्क्ताम्" AV. 12. 1. 40.

इत्यादि । अ(म्भ)च्छन्दउदाहरणम्—

"तच्चक्षुर्देवहितम्" RV. 7. 66. 16; VS. 36. 24.

इत्यादि । द्विनवत्यक्षरं गगनच्छन्दः, तस्य महानाम्नीषूदाहरणं प्रथमा स्तोत्रीया । षण्णवत्यक्षरमर्णवच्छन्दः, महानाम्नीष्वेव द्वितीयस्तोत्रीयोदाहरणम् । शताक्षरमापच्छन्दः

"देवो अग्निः स्विष्टकृद्देवान्यक्षद्यथायथम्" इति । VS. 21. 58; MS. 3. 11. 5.

चतुश्शताक्षरं समुद्रच्छन्दः । उदाहरणं महानाम्नीषु तृतीया ।

तान्येतानि सर्वाणि कृतच्छन्दांᳬसि भवन्तीति ।

कृतस्य छन्दांसि कृतच्छन्दांᳬसि । कृतो नाम यो द्यूतसमये प्र(सिद्ध)श्चतुरङ्क-स्तद्वाचकेन तच्छन्दसा चतुष्कलं लक्ष्यते । तस्य छन्दांसि तत्प्रभृतीनि यावत् । तदुक्तं शौनकेन—

"चतुरक्षराच्चतुरुत्तरमुद्यन्ति" [इति] । RPr. 17. 19.

आचतुरक्षराच्चतुरक्षरं कृतिच्छन्द आरभ्य चतुरक्षरं चतुर उद्यन्ति यद् गच्छन्ती-त्यर्थः । तत्र कृत्यादीनामेव संज्ञान्तरमभिहितं न तु संज्ञिभेद इति बोध्यम् । ननु चतुर्विंशति-प्रभृतीन्येकविंशतिच्छन्दांस्यभिहितानि, कथं चतुष्कलप्रभृतित्वमित्यत आह—

अथ प्राञ्चि गायत्र्याः पञ्च कृतच्छन्दांᳬसि—

कृतिश्चतुरक्षरा, प्रकृतिरष्टाक्षरा, संकृतिर्द्वादशाक्षरा, अभिकृतिः षोडशाक्षरा, उत्कृतिर्विंᳬशत्यक्षरेति ।

ततश्च कृतिनामकस्य छन्दसोऽक्षरचतुष्करूपत्वात्तत्प्रभृतित्वं प्रकृत्यादेरिव गायत्र्यादी-नामप्युपपन्नमिति भावः । उदाहरणानि—

एवा ह्येव SV. Maha. 10.

"इन्द्रो विश्वस्य राजति" SV. 1. 456.

इत्यादीनि यथादर्शनं योज्यानि ।

एतासामन्तरेष्वन्तस्थाछन्दांᳬसि । द्वाविंᳬशत्यक्षरप्रभृतय इति ।

एतासां गायत्रीणामन्तरेषु मध्यदेशेषु द्वाविंशत्यक्षरादिष्वन्तस्था अन्तस्तिष्ठन्ति [इति] अन्तस्था राड्विराडित्यादयः । अत्रान्तरेष्वन्त इति

"वसुपते वसूनाम्" SV. 1. 317; RV. 10. 47. 1.

"गोपतिᳬ शूर गोनाम्" ibid.

इत्यत्रेवापौनरुक्त्यमिति परिहरणीयम् । छन्दांसि इति नपुंसकनिर्देशो नित्यनपुंसक-त्वात् । एतदेव विविच्य दर्शयति—

द्वाविंᳬशत्यक्षरप्रभृतयश्चतुरुत्तरास्त्रयः सप्तवर्गाः, द्विशताक्षराऽऽसां पराध्येति ।

स्पष्टम् ।

तासां नामधेयानि—

राट् सम्राट् विराट् [स्वराट्] स्ववशिनी परमेष्ठाऽन्तस्थेति पथ्यस्य ।

[प्रत्नं] चामृतं च वृषा च जीवं च तृप्तं च रसं च शुक्रमित्युत्तरस्य ।

अर्णश्चाम्भश्चाम्बु च वार्याप उदकमित्युत्तमस्येति ।

स्पष्टम् ।

तान्येतानि सर्वाणि द्वापरच्छन्दा᳸सि भवन्तीति ।

द्वापरो नाम यो द्यूतसमये प्रसिद्धो द्व्यङ्कः । यदाहुः—द्वाविंशतीन्येतानि छन्दांसि, तत्कथं द्विकप्रभृतित्वमित्यत आह—

अथ प्राञ्चि द्वावि᳸शत्यक्षरतायाः पञ्चान्तस्थाच्छन्दा᳸सि द्व्यक्षरप्रभृतीनि चतुरुत्तराण्यारोहीणि । हर्षिका शर्षिका सर्षिका [सर्वमात्रा] विराट्कामेतीति ।

गतम् । ततश्च द्वापरच्छन्दोरूपद्विकप्रभृतित्वमुपपद्यत इति भावः । द्वापरच्छन्दसामुदाहरणं यथादर्शनं योज्यम् ।

निदानवृत्तौ द्वितीयपटले प्रथमः खण्डः

अथ निचृद्भुरिजः । या एकेनाक्षरेणोनास्ता निचृतः । अथ [या] एकेन ज्यायस्यस्ता भुरिजः [इति] ।

व्याख्यास्याम इति [शेषः] । गायत्र्यादिषु या ऋच एकेनाक्षरेणोनास्ता निचृतः । उदाहरणम्—

"तत्सवितुर्वरेण्यम्" इति SV. 2. 812; RV. 3. 62. 10.

सुगायत्री । अथ या ऋच एकेनाक्षरेण ज्यायस्य अधिकास्ता भुरिजः ।

"सदा व इन्द्रश्चर्कृषदा" इति SV. 1. 196.

भुरिग्गायत्री ।

तान्येतानि सर्वाणि त्रेताकलिच्छन्दा᳸सि भवन्ति इति ।

तान्येतानि सर्वाणि निचृतो भुरिजश्च क्रमेण·········

·········वचनेन अन्येन ज्ञानं छन्दोविशेषं ज्ञानं नास्तीति विद्यात् ।

अथ देवासुरच्छन्दा᳸सीति ।

व्याख्यास्याम इति शेषः ।

एकाक्षरप्रभृतीन्येकोत्तराण्यारोहीणि देवच्छन्दा᳸सीति ।

आरोहीणि गायत्र्यादीनि जगत्यन्तान्येकोत्तराणि देवानां तान्येवैकाक्षराणीति । स्पष्टमन्यत् । पूर्वं पूर्वं छन्दोत्तरोत्तराणि छन्दांस्यारोहन्तीत्यारोहीणि । तथा च शौनकः—

"दैवान्यपि च सप्तैव ।" इति । RPr. 16. 3.

एवं सति जगत्यादेरक्षरपरिमाणं दर्शयति—

सप्ताक्षरा जगत्यष्टाक्षराऽतिच्छन्दा इति ।

स्पष्टम् । देवच्छन्दांस्यभिधायासुरच्छन्दांस्याह—

पञ्चदशाक्षरप्रभृतीन्येकावाञ्चि प्रत्यवरोहीण्यसुरच्छन्दाꣳसीति ।

एकमक्षरमवाक्प्रातिलोम्येनाञ्चतीत्येकावाञ्चि, अतएव प्रत्यवरोहीणि, पञ्चदशाक्षरा गायत्री चतुर्दशाक्षरोष्णिगित्येवं प्रत्यवरोहन्तीति प्रत्यवरोहीणि । गतमन्यत् । तथा च शौनकः—

"सप्त चैवासुराण्यपि ।" इति । RPr. 16. 4.

"एकावमान्यसुराणां ततः पञ्चदशाक्षरात् । " इति । RPr. 16. 6.

एवं सति जगत्यादेरक्षरपरिमाणं दर्शयति—

नवाक्षरा जगत्यष्टाक्षरैवातिच्छन्दा इति ।

स्पष्टम् ।

अथ प्रजापतेश्छन्दाꣳसि, अष्टाक्षरप्रभृतीनि चतुरुत्तराण्यारोहीणि । द्वात्रिꣳशदक्षरा जगती । षट्त्रिꣳशदक्षराऽतिच्छन्दा इति ।

स्पष्टम् । अत्र शौनकः—

"गायत्र्युष्णिगनुष्टुप् च बृहती च प्रजापतेः ।
पङ्क्तिस्त्रिष्टुब् जगती च सप्त छन्दांसि तानि वै ।
अष्टाक्षरप्रभृतीनि ॥" RPr. 16.1.

"चतुर्भूयः परस्परम् ।" इति । RPr. 16. 2.

अथ ऋषिच्छन्दांस्याह—

तेषां त्रयं त्रयꣳ समेत्यैकैकमृषिच्छन्दो भवतीति ।

तेषां देवासुरप्रजापतिच्छन्दसां त्रयं समेत्य समानजातीयमेकीभूय, एकैकमृषीणां छन्दो भवति । ततश्च दैवी गायत्र्येकाक्षरा, असुरगायत्री पञ्चदशाक्षरा, प्रजापतिगायत्र्यष्टाक्षरा, तासां मेलने चतुर्विंशत्यक्षरा गायत्री त्रिपदाष्टाक्षरपादा भवति । एवमुष्णिगाद्यतिच्छन्दःपर्यन्तेषु द्रष्टव्यान्यृषिच्छन्दांसि । "गायत्री चतुर्विंशत्यक्षरा च" इति (cp. RPr. 16.16.) शौनकोक्तेः । तत्रोपष्टम्भकमाह—

[तदेष श्लोकः—]

कास्वित् स्त्रियो द्व्यक्षरमेकविꣳशतिस्सप्त (?) भूत्वानुभवन्ति कर्मभिः । पञ्चाशतः पञ्च नपुंसकानां द्वे चाधिके बिभ्रति त्र्यक्षराणाम् ॥ इति ।

तत्तद्ब्रह्मवादिभिरुदाहृतः श्लोकः प्रमाणमिति शेषः । कास्वित् स्त्रियः स्त्रीलिङ्गा गायत्र्यादिशब्दवाच्या एकविंशतिसङ्ख्या देवासुरप्रजापतिगायत्र्यादयः कर्मभिर्हेतुभिः कर्मानुष्ठानायेति यावत्, सप्त भूत्वानुभवन्ति, अक्षरमिति जात्येकवचनम्, अक्षराणि प्राप्नुवन्तीत्यर्थः । भवतेः प्राप्तौ परस्मैपदं छान्दसम् । कत्यक्षराण्यनुभवन्तीति । अत आह—नपुंसकानां नपुंसकशब्दवाच्यानामक्षराणां पञ्चाशतः पञ्चाशदुत्तरं द्विशतं द्वे चाक्षरेऽधिके द्विशतं पञ्चाशतं च

विभ्रति देवा······त्रीणि छन्दांसि चतुर्विंशत्यक्षरादितयैकीभूय कर्मणि निर्वहन्तीत्याशयः। तदिदमाह—

देवासुराणां छन्दोभिरात्मनश्च प्रजापतिः ।
सप्तवर्गं चकारैकमृषीणां यज्ञवोढवे ॥ इति ।

स्पष्टम् । तथा च शौनकः—

"तानि त्रीणि समागत्य सनामानि सनाम तत् ।
एकं भवत्यृषिच्छन्दस्तथा गच्छन्ति सम्पदम् ॥" इति । RPr. 16. 7.

"एवं त्रिप्रकृतीन्याहुर्युक्तानि चतुरुत्तरम् ।
ऋषिच्छन्दांसि ॥ RPr. 16. 8.
तैः प्रायो मन्त्रः श्लोकश्च वर्तते ॥" इति । RPr. 16. 9.

प्रसङ्गादाह—

यस्य कस्यचिच्छन्द[स]स्सम्पदं कश्चिदिच्छति ।
चतुर्थं तस्य सङ्ख्याय तावतीराहरेदृचः ॥
यदि तच्छन्द आहरेदन्यदन्यस्य सम्पदे ।
चतुर्थं तस्य सङ्ख्याय विद्यात्तास्तावतीर्ऋचः ॥ इति ।

यस्य कस्यचिच्छन्दसः । क्षुद्रकल्पे यज्ञविभ्रष्टप्रायश्चित्तविधाने—

"यज्ञविभ्रष्टश्रायन्तीयं ब्रह्मसाम ।
३ २ ३ १ २
'वयमु त्वामपूर्व्य' इति। SV. 1. 408; 2. 58; RV. 8. 21. 1.
PB. 12. 12. 3.

कालेयं समानमितरज्ज्योतिष्टोमेन। तस्य सम्पत् । सप्तदशाष्टादशाक्षराणि श्रायन्तीयादतिरिच्यन्ते, तावत्कालेयाल्लुप्यन्ते तत्सम्पन्नम्" इति । KṢ 1. 4.

आदौ प्रकृतस्य नौधसस्य निर्वर्तिकायाः

१ २ ३ १
"तं वो दस्मम्" SV. 1. 236; 2 35; RV. 8. 88. 1.

इत्यस्याः सम्पदं कश्चित्कल्पकार इच्छति। यैरुक्तैश्छन्दोभिर्माध्यन्दिनैः स्तुत्वा तानि त्रिष्टुभमभिसम्पद्यन्ते शास्त्रविहितत्रिष्टुप्सम्पत्सिद्धये, तदर्थं तस्य प्रकृतस्य बृहतीच्छन्दसश्चतुर्थं पादमियत्पादा इयदक्षरा इतिं सङ्ख्याय पादान् सम्यक् परिगणय्य श्रायन्तीयानुष्ठानेन

१ २ ३ १ २र
"प्रति भागं न दीधिमः" SV. 1. 267; 2. 669; RV. 8. 99. 3.

इत्यादेरभ्यस्तस्य चतुर्थपादस्याक्षरसङ्ख्यया षट्त्रिंशदधिकशताक्षराणामाधिक्यात् स्तोत्रान्तरे यावदक्षराया ऋच आहरणे प्राकृती त्रिष्टुप् सम्पत्सिध्यति तावतीराहरेदृचः ।

३ २ ३ १
"वयमु त्वाम्" इति । SV. 1. 408; 2. 58; RV. 8. 21. 1;
PB. 12. 12. 3.

ककुभ आहरेदाहरिष्यति यदि तच्छन्दः ।

"वयमु त्वाम्" इति । ibid.

ककुभ आहरेदन्यत्

"तरोभिर्वो विदद्वसुम्" SV. 1. 237; 2. 37; RV. 8. 66. 1; PB. 11. 4. 5.

इत्यादिऋग्जातमन्यस्य श्रायन्तीयं ब्रह्मसाम निमित्तरहितस्य क्रतोः सम्पदे सम्पत्सिद्धये भवति, तस्य नैमित्तिकस्य श्रायन्तीयादेश्चतुर्थं सप्तदशावृत्त्याभ्यस्तं पदं सङ्ख्याय परिगणय्याहृतास्ताः

"वयमु त्वाम्" इति SV. 1. 408; 2, 58; RV. 8. 21. 1.

ककुभस्तावती ऋचः

"तरोभिर्वो विदद्वसुम्" SV. 1. 237; 2. 37; RV. 8. 66. 1.

इत्याद्या ऋच इति विद्यात् । नैमित्तिकाधिक्ये इदमुदाहरणम् । नैमित्तिकन्यूनतायामपीदं यथायोग्यं योजनीयमिति ।

इति निदानवृत्तौ द्वितीयपटले द्वितीयः खण्डः

अथ प्रसङ्गादृचां पादे यत्नानुसारेणाध्ययनेऽवसाननियमं विधत्ते—

अथावसानानीति ।

व्याख्यास्याम इति शेषः ।

एकपदद्विपदानामन्ततोऽवसानमिति ।

एकपदद्विपदानामृचां यावदृचमधिकृत्यान्त[न्त]तोऽवस्येत् । यथा—

"इन्द्रो विश्वस्य राजति" SV. 1. 456.

"परि प्र धन्व" इति । SV. 1. 427; 2. 717; RV. 9. 109. 1.

त्रिपदाप्रभृतीनां द्वावुक्त्वा शेषमाह—[आ]षट्पदाभ्य इति ।

त्रिपदाप्रभृतीनां त्रिविधानामादितो द्वावुक्त्वा विरम्य शेषं शिष्टं पदजातमाह—ब्रूयादित्यर्थः । उदाहरणम्—

"अग्न आ याहि वीतये" SV. 1. 1; 2. 10; RV. 6. 16. 10.

"यज्ञायज्ञा वो अग्नये" SV. 1. 35; 2. 53; RV. 6. 48. 1.

"स्वादोरित्था विषूवतः" इति । SV. 1. 409; 2. 355; RV. 1. 84. 10.

अमुमुत्सर्गं त्रिपदायां क्वचिदपवादयति—

भवति तत्र त्रिपदायामन्ततोऽवसानम्—

"दुहीयन्मित्रधितये" इति । RV. 1. 120. 9.

त्रिपदासु मध्ये

"दुहीयन्मित्रधितये" इति ibid.

त्रिपदायामन्ततोऽवसानं भवति न मध्ये । यथा—

"दुहीयन्मित्रधितये युवाकु राये च नो मिमीतं वाजवत्यै ।
इषे च नो मिमीतं धेनुमत्यै ॥" इति । ibid.

यथा चतुष्पदायां त्रिषु—

"आ नो वयोवयःशयम्" इति । SV. 1. 353.

चतुष्पदायां त्रिषु पादेषु विरम्यानन्तरम्

"उग्रं वचो अपावधीः" ibid.

इति चतुष्पादं ब्रूयात् ।

तथा पञ्चपदायाम्—

"यन्मे यमम्" इति । PB. 1. 5. 18; LÇ. 2. 10. 9.

"यन्मे यमम्" इति ibid.

पञ्चपदायां तथा त्रिषु पादेषु विरम्य पश्चात्—

"जीवातवे न मृत्यवे" RV. 10. 60. 9; PB. 1. 5. 18.

इत्यादि ब्रूयात् ।

अथापि चतुष्पदेषु—

"अग्ने तमद्य" इति । SV. 1. 434; 2. 1127; RV. 4. 10. 1.

अथापि पञ्चपदान्तरे

"अग्ने तमद्य" ibid.

इत्यत्र चतुष्पादेषु विरम्य, अथ

"ऋध्यामा त ओहैः" ibid.

इत्येवं ब्रूयात् ।

अथापि द्वौ द्वावथैकम्—

"अभि न इळा यूथस्य माता" इति । RV. 5. 41. 19.

अथापि पञ्चपदान्तरे

"अभि न इळा यूथस्य माता" ibid.

इत्यत्र द्वौ द्वौ पादावुक्त्वा विरम्य पुनर्द्वौ पादावुक्त्वाऽथैकं पादं ब्रूयात्। पाठस्तु

"अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः।
सिषक्तु न ऊर्जव्यस्य पुष्टेः॥" इति। ibid.

अथापि द्वावुक्त्वाऽथैकमथ द्वौ—

"तव त्यन्नर्यं नृतः" इति। SV. 1. 466; RV. 2. 22. 4.

अथापि पञ्चपदान्तरे—

"तव त्यन्नर्यं नृतः" ibid.

इत्यत्र द्वौ पादावधीत्याथैकं पादमुक्त्वाथ द्वौ पादौ ब्रूयात्।

षट्पदायां द्वयोर्द्वयोरवसानम्—

"उभे यदिन्द्र रोदसी" इति। SV. 1. 379; 2. 440; RV. 10. 134. 1; PB. 13. 10. 3.

स्पष्टम्।

[अथापि त्रिषु—

"अपि वृश्च पुराणवत्" इति।] RV. 8. 40. 6.

सप्तपदायां त्रीनुक्त्वा द्वौ द्वौ परौ—

"अग्निं होतारं मन्य दास्वन्तम्" इति। SV. 1. 465; 2. 1163; RV. 1. 127. 1.

सप्तपदायामृचि त्रीन् पादानुक्त्वा विरम्य पश्चाच्चतुरः पादान् द्वौ द्वौ ब्रूयात्।

उदाहरणम्—

"अग्निं होतारम्" इति। ibid.

अथापि द्वौ द्वावथ त्रीन्—

"प्रो ष्वस्मै पुरोरथम्" इति। SV. 2. 1151; RV. 10. 133. 1.

अथापि सप्तपदान्तरे—

"प्रो ष्वस्मै" ibid.

इत्यत्र द्वौ द्वौ पादावुक्त्वा, अथ त्रीन् पादान् ब्रूयात्। स एष समासः। आष्टपदताया इति, उक्ताष्टपादानामृचां वृद्धयन्तमवसानं नियतं न...के (?)। अथ तर्हि यत्र क्वाप्यनियमेनावसितव्यम्। नेत्याह—

तत्र मध्य एव पादस्य नावस्येदिति ।

तत्र मध्य एव पादस्य पदस्य वा नावस्येत्, अवसानं न कुर्यात् । ननु पदान्ते यत्र क्काप्यवसानं स्यादित्यतिप्रसङ्गमाशङ्कयाह—

अर्थाभिप्रापणान् न्यूनीभावोऽर्थाभिप्रापणादतिरेक इति ।

अर्थाभिप्रापणं वाक्यार्थावगतिः । ल्यब्लोपे पञ्चमी । वाक्यावगतिमपेक्ष्य न्यूनीभावमवसानस्य शैघ्र्यमतिरेको दैर्घ्यं च भवति । ननु गायत्र्यादिषु तासां पादेषु च तत्र तत्रोक्तपरिमाणान्न्यूनता दृश्यते । ततः कुत इत्यत आह—

अथ यत्रैतदक्षरमागच्छति नामिति वामिति वा तद्रहितोनीकरोतीति ।

अथशब्दो न्यूनीभावप्रारम्भार्थः । यत्र पादावसानेष्वेतदक्षरं नामिति वामिति आगच्छति, इत्यवधारणार्थम्, तत्र तत्रोनीकरोत्येव पादम् । यथा—

"नभन्तामन्यकेषाम्" इति SV. 2. 1151–1153; RV. 10. 133. 36.

न्यूनीभावहेतून् सन्धीन् तदभावेऽन्यूनतां च दर्शयति—

एकाक्षरभाविनो वा सन्धय इति ।

एकाक्षरं भवितुं शीलमेषामित्येकाक्षरभाविनः सन्ध्यक्षराणि खलु द्वे द्वे अक्षरे एकमक्षरं भूत्वा वर्तन्ते। अतः छन्दस्यक्षरलोपो विकर्षे तु न लोप इति भावः। तत्रोपष्टम्भकप्रमाणं दर्शयति—

तदप्येतौ श्लोकौ भवतः—

चत्वारि सन्धिजातानि यैः श्लोको ह्रसते नच ।
प्रश्लिष्टमभिनिहितं क्षिप्रसन्धिरभिध्रुवम् ॥
एतानि सन्धिजातानि मिमानश्छन्दसोऽक्षरैः ।
द्वैधं कुर्यादसम्पूर्णे सम्पूर्णे किञ्चनेङ्गयेत् ॥ इति ।

सन्धिजातानि चत्वारि, तान्येव दर्शयति—प्रश्लिष्टमित्यादि । प्रश्लिष्टं प्रश्लेषयुक्तमक्षरम्

"ऋचि प्रश्लिष्टाः स्वरसन्धयः ।" (Ph. p. 88. 2)

इति फुल्लकारैरुक्तमुदाहृतं गुणवृद्धिसवर्णदीर्घरूपम्, अभिनिहितं समयेऽप्याभिमुख्येन हतमस्थितम्, पूर्वरूपापरलक्षणा क्षिप्रसन्धिः । अभिध्रुवश्चायवान्तसन्धिः । भूयांस्तु विशेषः । पदकाले विकर्षो यत्र सा क्षिप्रसन्धिः । यथा—

"त्वामग्ने पुष्करादध्यथर्वा निरमन्थत ।" इति । SV. 1. 9; RV. 6. 16. 13.

आदौ यथा पदकाले यत्र न विकर्षः सोऽभिध्रुवम् । यथा—

"भरद्वाजे समिधानो यविष्ठ्य" इति । SV. 1. 37; RV. 6.48.7.

एवमादावक्षरैश्छन्दसो मिमानः माता असम्पूर्णे छन्दोद्वैधं कुर्यादिति विकर्षेण गणयेत्, सम्पूर्णे सति किमप्यक्षरं न गणयेन्न चालयेदिति। छन्दोविचितिज्ञानस्य फलं दर्शयति—

छन्दसां विचयं जानन् यः शरीराद्विमुच्यते ।

छन्दसामेति सालोक्यमानन्त्यायाश्नुते श्रियमिति श्रियमिति ॥

द्विरुक्तिः पटलसमाप्त्यर्था ।

इति निदानवृत्तौ द्वितीयः पटलः

तत्र मध्य एव पादस्य नावस्येदिति ।

तत्र मध्य एव पादस्य पदस्य वा नावस्येत्, अवसानं न कुर्यात् । ननु पदान्ते यत्र क्वाप्यवसानं स्यादित्यतिप्रसङ्गमाशङ्क्याह—

अर्थाभिप्रापणान् न्यूनीभावोऽर्थाभिप्रापणादतिरेक इति ।

अर्थाभिप्रापणं वाक्यार्थावगतिः । ल्यब्लोपे पञ्चमी । वाक्यावगतिमपेक्ष्य न्यूनीभावमवसानस्य शैघ्र्यमतिरेको दैर्घ्यं च भवति । ननु गायत्र्यादिषु तासां पादेषु च तत्र तत्रोक्तपरिमाणान्न्यूनता दृश्यते । ततः कुत इत्यत आह—

अथ यत्रैतदक्षरमागच्छति नामिति वामिति वा तद्रहितोनीकरोतीति ।

अथशब्दो न्यूनीभावप्रारम्भार्थः । यत्र पादावसानेष्वेतदक्षरं नामिति वामिति आगच्छति, इत्यवधारणार्थम्, तत्र तत्रोनीकरोत्येव पादम् । यथा—

  २र   ३ १ २
"नभन्तामन्यकेषाम्" इति SV. 2. 1151–1153; RV. 10. 133. 36.

न्यूनीभावहेतून् सन्धीन् तदभावेऽन्यूनतां च दर्शयति—

एकाक्षरभाविनो वा सन्धय इति ।

एकाक्षरं भवितुं शीलमेषामित्येकाक्षरभाविनः सन्ध्यक्षराणि खलु द्वे द्वे अक्षरे एकमक्षरं भूत्वा वर्तन्ते । अतः छन्दस्यक्षरलोपो विकर्षे तु न लोप इति भावः । तत्रोपष्टम्भकप्रमाणं दर्शयति—

तदप्येतौ श्लोकौ भवतः—

चत्वारि सन्धिजातानि यैः श्लोको ह्रसते नच ।
प्रश्लिष्टमभिनिहितं क्षिप्रसन्धिरभिध्रुवम् ॥
एतानि सन्धिजातानि मिमानश्छन्दसोऽक्षरैः ।
द्वैधं कुर्यादसम्पूर्णे सम्पूर्णे किञ्चनेङ्गयेत् ॥ इति ।

सन्धिजातानि चत्वारि, तान्येव दर्शयति—प्रश्लिष्टमित्यादि । प्रश्लिष्टं प्रश्लेषयुक्तमक्षरम्
"ऋचि प्रश्लिष्टाः स्वरसन्धयः ।" (Ph. p. 88. 2)

इति फुल्लकारैरुक्तमुदाहृतं गुणवृद्धिसवर्णदीर्घरूपम्, अभिनिहितं समयेऽप्याभिमुख्येन हतमस्थितम्, पूर्वरूपापरलक्षणा क्षिप्रसन्धिः । अभिध्रुवमायवान्तसन्धिः । भूयांस्तु विशेषः । पदकाले विकर्षो यत्र सा क्षिप्रसन्धिः । यथा—

  १ २३ १ २ ३१ २र३ १२
"त्वामग्ने पुष्करादध्यथर्वा निरमन्थत ।" इति । SV. 1. 9; RV. 6. 16. 13.

आदौ यथा पदकाले यत्र न विकर्षः सोऽभिध्रुवम् । यथा—

"भरद्वाजे समिधानो यविष्ठ्य" इति । SV. 1. 37; RV. 6. 48. 7.

एवमादावक्षरैश्छन्दसो मिमानः माता असम्पूर्णे छन्दोद्वैधं कुर्यादिति विकर्षेण गणयेत्, सम्पूर्णे सति किमप्यक्षरं न गणयेन्न चालयेदिति । छन्दोविचितिज्ञानस्य फलं दर्शयति—

छन्दसां विचयं जानन् यः शरीराद्विमुच्यते ।

छन्दसामेति सालोक्यमानन्त्यायाश्नुते श्रियमिति श्रियमिति ॥

द्विरुक्तिः पटलसमाप्त्यर्था ।

इति निदानवृत्तौ द्वितीयः पटलः

INDICES

INDEX OF METRES

INDEX OF SAMANS

INDEX OF SACRIFICES

Star-marked names are not given in the Nidān-Sūtra, but some of them are discussed though unnamed. They are given here as they help in understanding the rites given by the Nidāna-Sūtra The numbers in the following refer to Prapāṭhaka and Khaṇḍa.

INDEX OF RITUALISTS

[एके, आचार्याः etc. are not included in the Index]

आथर्वणिकाः

अथापि शश्वदेना अनुपसृष्टा आथर्वणिका अधीयते । ३९. २

ऐतरेयिणः

अपि चैवं रहस्यब्राह्मणे दर्शयति—ज्योतिष्प्रायणो ज्योतिरुदयनः षडहोऽभिप्लव इति चैतरेयिणाम् । ८१. १८.

औपमन्यवः

नैषा सर्वस्मिन् दशरात्र उपपद्यत इत्यौपमन्यवः । ७५. १७

कापटवः

नास्य भूयान् दशमेनाह्ना सम्बन्धो यथो च प्रथमेनेति कापटवः । ७२. २१

कापर्दयः

पृष्ठ्यस्तोमः पञ्चाह इति कापर्दयः । १७०. १९

कालबविनः

अथ कालबविनो यथासमाम्नायमेव कुर्वन्ति । १०२. १४

अथापि कालबविनो व्यूहेनादिशन्ति । १७१. १६

चतुरस्तृचैकर्चान् व्यत्यासेन कालबविनः । ९९. २

कौत्सः

अहरिति कौत्सः । ३४. १८

कृता राथन्तरीडा कृता बार्हतीति कौत्सः । ५७. १९

जनित्रे एवानुकल्पयेदिति कौत्सः । १४६. ११

समसितव्यात्रिष्टुब्जगतीर्मन्य इति कौत्सः । ९०. ११

गौतमः

अत्रापि सतोबृहत्यतिशेष॰ समाप्येत्येव गौतमः । ८३. २२

अभिप्लवपञ्चाह इति गौतमः । १७१. ७

अरुणायां छुह्यामुदवसानीयाभिरिष्टिभिर्यजेरन्निति गौतमः । १८५. १६

अस्तीति गौतमः । २१. १०

"आच्छदिषो व्यूहनाच्छ्रोभूत एनामूर्ध्वाग्रैः कुशैर्वेष्टयित्वैवंजातीयेनैवोर्द्धदशेन वसनेन प्रदक्षिणं परिवेष्ट्य च स्पृष्टोऽनपश्रित उद्गायेत् ।" इति गौतमः । १८. २-४

आपादयितव्या॰स्तन्त्राणि मन्य इति गौतमः । १६७. २४

आवृत्त इति गौतमः । १६९. ११

आवृत्ताविति गौतमः । १७६. १७

आवृत्ते पृष्ठ्येऽभीवर्त्तलोके सामानि प्रतिकल्पयेदिति गौतमः । ९०. १३

तैत्तिरीयाः

धानञ्जय्यः

राणायणीपुत्रः

शम्बूपुत्रौ नात्र च नेति राणायणीपुत्रः । १५२. २१

लामकायनः

अनवधारितकाम इति लामकायनः । १३२. २२
उभयं भवतीति लामकायनः, उभयथा ब्राह्मणं भवति । १६५. १
ऋगक्षर इति लामकायनः । ६०. ३
एतासु कुर्यादिति लामकायनः । ११९. ८
नवपदाः पुरा बभूवुरिति लामकायनः । ६२. १८
स प्रायात्रेकाहौ व्याविवर्तयिषन्नेतस्मिन् तदेकविँशे पराक्रम्य त्रिकेण वज्रेण बलं विभेदिति लामकायनः । १२५. ७, ८

वदनायनः

तद्यथाश्वत्थलो वृक्षो नैवाश्वत्थ इति वदनायनः । १६५. १०

वसिष्ठः

तपोऽतप्यत रथन्तरमुत्तरयोरिति वसिष्ठः । २३. ३

वार्षगण्यः

ऊधसोऽभ्यासब्राह्मणं मन्य इति वार्षगण्यः । ६२. ५
एतच्छातशूर्पो वार्षगण्य आसाञ्चक्रे । ७६. २०
चतुर्थमेवानुगानं तृचे स्यादिति वार्षगण्यः । १०४. २४
निभ्नब्राह्मणमेवाहमिदं मन्य इति वार्षगण्यः । ३४. २४
प्रथमायामिति वार्षगण्यः । ३३. २१
याथाकामी पथ्यानां दक्षिणावतामिति वार्षगण्यः । ९६. ६

शाकपूणिः

तासु विवदन्ते—ऐन्द्रयः प्राजापत्यः सार्पराज्ञ्यश्चान्द्रमस्यः सौर्य इति शाकपूणिः । ७३. ५, ६

शाट्यायनिनः

अभ्यास्यायामेकर्चौ, अद एकस्यां प्रथमायाम्, अदस्तिसृषु परासु, अदस्तिसृषु पूर्वासु, अदोऽभ्यास्यायामिति शाट्यायनिनः । ९९. ३, ४

शाण्डिल्यः

अथ षोडशिनि सर्वैव चतुस्त्रिँशदक्षरेति शाण्डिल्यः । ४८. २१
अथातिरात्रे सर्वैव द्वात्रिँशदक्षरेति शाण्डिल्यः । ४९. २
अथैतौ विश्वजिदभिजितौ पृष्ठ्यपृष्ठ्यस्तोमयोरन्तस्य वेति शाण्डिल्यः । ९९. १३
आग्निष्टोमीं प्रथमां मन्य इति शाण्डिल्यः । ४३. २
उच्चावचदृष्टीनीति शाण्डिल्यः । २५. ६

(शाण्डिलम्)

शाण्डिल्यायनः

(शाण्डिल्यायनीयम्)

INDEX OF WORKS QUOTED BY NAME